श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वाल्मीकीयरामायणस्य

॥ उत्तरकाण्डम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1	प्रथमः सर्गः	7
2	द्वितीयः सर्गः	12
3	तृतीयः सर्गः	16
4	चतुर्थः सर्गः	20
5	पञ्चमः सर्गः	24
6	षष्ठः सर्गः	29
7	सप्तमः सर्गः	37
8	अष्टमः सर्गः	43
9	नवमः सर्गः	47
10	दशमः सर्गः	52
11	एकादशः सर्गः	57
12	द्वादशः सर्गः	63
13	त्रयोदशः सर्गः	67
14	चतुर्दशः सर्गः	72
15	पञ्चदशः सर्गः	76
16	षोडशः सर्गः	81
17	सप्तदशः सर्गः	86
18	अष्टादशः सर्गः	91
19	एकोनविंशः सर्गः	95

20	**विंशः सर्गः**	**99**
21	**एकविंशः सर्गः**	**103**
22	**द्वाविंशः सर्गः**	**108**
23	**त्रयोविंशः सर्गः**	**114**
24	**चतुर्विंशः सर्गः**	**120**
25	**पञ्चविंशः सर्गः**	**125**
26	**षड्विंशः सर्गः**	**131**
27	**सप्तविंशः सर्गः**	**137**
28	**अष्टाविंशः सर्गः**	**143**
29	**एकोनत्रिंशः सर्गः**	**148**
30	**त्रिंशः सर्गः**	**153**
31	**एकत्रिंशः सर्गः**	**159**
32	**द्वात्रिंशः सर्गः**	**164**
33	**त्रयस्त्रिंशः सर्गः**	**172**
34	**चतुस्त्रिंशः सर्गः**	**175**
35	**पञ्चत्रिंशः सर्गः**	**180**
36	**षट्त्रिंशः सर्गः**	**187**
37	**सप्तत्रिंशः सर्गः**	**194**
38	**अष्टात्रिंशः सर्गः**	**197**
39	**एकोनचत्वारिंशः सर्गः**	**201**

40	चत्वारिंशः सर्गः	205
41	एकचत्वारिंशः सर्गः	209
42	द्विचत्वारिंशः सर्गः	212
43	त्रिचत्वारिंशः सर्गः	216
44	चतुश्चत्वारिंशः सर्गः	219
45	पञ्चचत्वारिंशः सर्गः	222
46	षट्चत्वारिंशः सर्गः	225
47	सप्तचत्वारिंशः सर्गः	229
48	अष्टचत्वारिंशः सर्गः	232
49	एकोनपञ्चाशः सर्गः	235
50	पञ्चाशः सर्गः	238
51	एकपञ्चाशः सर्गः	241
52	द्विपञ्चाशः सर्गः	245
53	त्रिपञ्चाशः सर्गः	248
54	चतुःपञ्चाशः सर्गः	251
55	पञ्चपञ्चाशः सर्गः	254
56	षट्पञ्चाशः सर्गः	257
57	सप्तपञ्चाशः सर्गः	261
58	अष्टपञ्चाशः सर्गः	264
59	एकोनषष्टितमः सर्गः	267

60	**प्रक्षिप्तेषु प्रथमः सर्गः**	**270**
61	**प्रक्षिप्तेषु द्वितीयः सर्गः**	**274**
62	**षष्टितमः सर्गः**	**280**
63	**एकषष्टितमः सर्गः**	**283**
64	**द्विषष्टितमः सर्गः**	**286**
65	**त्रिषष्टितमः सर्गः**	**289**
66	**चतुःषष्टितमः सर्गः**	**293**
67	**पञ्चषष्टितमः सर्गः**	**296**
68	**षड्षष्टितमः सर्गः**	**301**
69	**सप्तषष्टितमः सर्गः**	**303**
70	**अष्टषष्टितमः सर्गः**	**306**
71	**एकोनसप्ततितमः सर्गः**	**309**
72	**सप्ततितमः सर्गः**	**314**
73	**एकसप्ततितमः सर्गः**	**317**
74	**द्विसप्ततितमः सर्गः**	**320**
75	**त्रिसप्ततितमः सर्गः**	**323**
76	**चतुःसप्ततितमः सर्गः**	**326**
77	**पञ्चसप्ततितमः सर्गः**	**330**
78	**षड्सप्ततितमः सर्गः**	**333**
79	**सप्तसप्ततितमः सर्गः**	**339**

80	अष्टसप्ततितमः सर्गः	**342**
81	एकोनाशीतितमः सर्गः	**346**
82	अशीतितमः सर्गः	**349**
83	एकाशीतितमः सर्गः	**352**
84	द्व्यशीतितमः सर्गः	**355**
85	त्र्यशीतितमः सर्गः	**358**
86	चतुरशीतितमः सर्गः	**361**
87	पञ्चाशीतितमः सर्गः	**364**
88	षडशीतितमः सर्गः	**367**
89	सप्ताशीतितमः सर्गः	**370**
90	अष्टाशीतितमः सर्गः	**374**
91	एकोननवतितमः सर्गः	**377**
92	नवतितमः सर्गः	**380**
93	एकनवतितमः सर्गः	**383**
94	द्विनवतितमः सर्गः	**387**
95	त्रिनवतितमः सर्गः	**390**
96	चतुर्नवतितमः सर्गः	**393**
97	पञ्चनवतितमः सर्गः	**397**
98	षण्णनवतितमः सर्गः	**399**
99	सप्तनवतितमः सर्गः	**402**

100 अष्टनवतितमः सर्गः 405
101 नवनवतितमः सर्गः 409
102 शततमः सर्गः 412
103 एकाधिकशततमः सर्गः 415
104 द्व्यधिकशततमः सर्गः 418
105 त्र्यधिकशततमः सर्गः 420
106 चतुरधिकशततमः सर्गः 422
107 पञ्चाधिकशततमः सर्गः 425
108 षडधिकशततमः सर्गः 428
109 सप्ताधिकशततमः सर्गः 431
110 अष्टाधिकशततमः सर्गः 434
111 नवाधिकशततमः सर्गः 438
112 दशाधिकशततमः सर्गः 441
113 एकादशाधिकशततमः सर्गः 445

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रथमः सर्गः ॥

श्रीरामस्य राजसभायां महर्षीणामागमनं तैः सह तस्य वार्तालापः श्रीरामस्य प्रश्नाश्च

प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते।
आजग्मुर्मुनयः सर्वे राघवं प्रतिनन्दितुम्॥ **7.1.1** ॥ 1

कौशिकोऽथ यवक्रीतो गार्ग्यो गालव एव च।
कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये श्रिताः॥ **7.1.2** ॥ 2

स्वस्त्यात्रेयश्च भगवान् नमुचिः प्रमुचिस्तथा।
अगस्त्योऽत्रिश्च भगवान् सुमुखो विमुखस्तथा॥ **7.1.3** ॥ 3

आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम्।
नृषङ्गुः कवषो धौम्यः कौशेयश्च महानृषिः॥ **7.1.4** ॥ 4

तेऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम्।
वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रः सगौतमः॥ **7.1.5** ॥ 5

जमदग्निर्भरद्वाजस्तेऽपि सप्तर्षयस्तथा।
उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः॥ **7.1.6** ॥ 6

सम्प्राप्यैते महात्मानो राघवस्य निवेशनम्।
विष्ठिताः प्रतिहारार्थं हुताशनसमप्रभाः॥ **7.1.7** ॥ 7

वेदवेदाङ्गविदुषो नानाशास्त्रविशारदाः।
द्वाःस्थं प्रोवाच धर्मात्मा अगस्त्यो मुनिसत्तमः॥ **7.1.8**॥ 8

निवेद्यतां दाशरथेर्ऋषयो वयमागताः।
प्रतीहारस्ततस्तूर्णमगस्त्यवचनाद् द्रुतम्॥ **7.1.9**॥ 9

समीपं राघवस्याशु प्रविवेश महात्मनः।
नयेङ्गितज्ञः सद्वृत्तो दक्षो धैर्यसमन्वितः॥ **7.1.10**॥ 10

स रामं दृश्य सहसा पूर्णचन्द्रसमद्युतिम्।
अगस्त्यं कथयामास सम्प्राप्तमृषिसत्तमम्॥ **7.1.11**॥ 11

श्रुत्वा प्राप्तान् मुनींस्तांस्तु बालसूर्यसमप्रभान्।
प्रत्युवाच ततो द्वाःस्थं प्रवेशय यथासुखम्॥ **7.1.12**॥ 12

दृष्ट्वा प्राप्तान् मुनींस्तांस्तु प्रत्युत्थाय कृताञ्जलिः।
पाद्यार्घ्यादिभिरानर्च गां निवेद्य च सादरम्॥ **7.1.13**॥ 13

रामोऽभिवाद्य प्रयत आसनान्यादिदेश ह।
तेषु काञ्चनचित्रेषु महत्सु च वरेषु च॥ **7.1.14**॥ 14

कुशान्तर्धानदत्तेषु मृगचर्मयुतेषु च।
यथार्हमुपविष्टास्ते आसनेष्वृषिपुङ्गवाः॥ **7.1.15**॥ 15

रामेण कुशलं पृष्टाः सशिष्याः सपुरोगमाः।
महर्षयो वेदविदो रामं वचनमब्रुवन्।
कुशलं नो महाबाहो सर्वत्र रघुनन्दन॥ **7.1.16**॥ 16

त्वां तु दिष्ट्या कुशलिनं पश्यामो हतशात्रवम्।
दिष्ट्या त्वया हतो राजन् रावणो लोकरावणः॥ **7.1.17**॥ 17

नहि भारः स ते राम रावणः पुत्रपौत्रवान्।
सधनुस्त्वं हि लोकांस्त्रीन् विजयेथा न संशयः॥ **7.1.18**॥ 18

दिष्ट्या त्वया हतो राम रावणो राक्षसेश्वरः।
दिष्ट्या विजयिनं त्वाद्य पश्यामः सह सीतया॥ **7.1.19**॥ 19

लक्ष्मणेन च धर्मात्मन् भ्रात्रा त्वद्धितकारिणा।
मातृभिर्भ्रातृसहितं पश्यामोऽद्य वयं नृप॥ **7.1.20**॥ 20

दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः।
अकम्पनश्च दुर्धर्षो निहतास्ते निशाचराः॥ **7.1.21**॥ 21

यस्य प्रमाणाद् विपुलं प्रमाणं नेह विद्यते।
दिष्ट्या ते समरे राम कुम्भकर्णो निपातितः॥ **7.1.22**॥ 22

त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ।
दिष्ट्या ते निहता राम महावीर्या निशाचराः॥ **7.1.23**॥ 23

कुम्भश्चैव निकुम्भश्च राक्षसौ भीमदर्शनौ।
दिष्ट्या तौ निहतौ राम कुम्भकर्णसुतौ मृधे॥ **7.1.24**॥ 24

युद्धोन्मत्तश्च मत्तश्च कालान्तकयमोपमौ।
यज्ञकोपश्च बलवान् धूम्राक्षो नाम राक्षसः॥ **7.1.25**॥ 25

कुर्वन्तः कदनं घोरमेते शस्त्रास्त्रपारगाः।
अन्तकप्रतिमैर्बाणैर्दिष्ट्या विनिहतास्त्वया॥ **7.1.26**॥ 26

दिष्ट्या त्वं राक्षसेन्द्रेण द्वन्द्वयुद्धमुपागतः।
देवतानामवध्येन विजयं प्राप्तवानसि॥ **7.1.27**॥ 27

सङ्ख्ये तस्य न किञ्चित् तु रावणस्य पराभवः।
द्वन्द्वयुद्धमनुप्राप्तो दिष्ट्या ते रावणिर्हतः॥ **7.1.28**॥ 28

दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः।
मुक्तः सुररिपोर्वीर प्राप्तश्च विजयस्त्वया॥ **7.1.29**॥ 29

अभिनन्दाम ते सर्वे संश्रुत्येन्द्रजितो वधम्।
अवध्यः सर्वभूतानां महामायाधरो युधि॥ **7.1.30**॥ 30

विस्मयस्त्वेष चास्माकं तं श्रुत्वेन्द्रजितं हतम्।
एते चान्ये च बहवो राक्षसाः कामरूपिणः॥ **7.1.31**॥ 31

दिष्ट्या त्वया हता वीरा रघूणां कुलवर्धन।
दत्त्वा पुण्यामिमां वीर सौम्यामभयदक्षिणाम्॥ **7.1.32**॥ 32

दिष्ट्या वर्धसि काकुत्स्थ जयेनामित्रकर्शन।
श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम्॥ **7.1.33**॥ 33

विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत्।
भगवन्तः कुम्भकर्णं रावणं च निशाचरम्॥ **7.1.34**॥ 34

अतिक्रम्य महावीर्यौ किं प्रशंसथ रावणिम्।
महोदरं प्रहस्तं च विरूपाक्षं च राक्षसम्॥ **7.1.35**॥ 35

मत्तोन्मत्तौ च दुर्धर्षौ देवान्तकनरान्तकौ।
अतिक्रम्य महावीरान् किं प्रशंसथ रावणिम्॥ **7.1.36**॥ 36

अतिकायं त्रिशिरसं धूम्राक्षं च निशाचरम्।
अतिक्रम्य महावीर्यान् किं प्रशंसथ रावणिम्॥ **7.1.37**॥ 37

कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः।
केन वा कारणेनैष रावणादतिरिच्यते॥ **7.1.38**॥ 38

शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः।
यदि गुह्यं न चेद् वक्तुं श्रोतुमिच्छामि कथ्यताम्॥ **7.1.39**॥ 39

शक्रोऽपि विजितस्तेन कथं लब्धवरश्च सः।
कथं च बलवान् पुत्रो न पिता तस्य रावणः॥ **7.1.40**॥ 40

कथं पितुश्चाप्यधिको महाहवे
शक्रस्य जेता हि कथं स राक्षसः।
वराश्च लब्धाः कथयस्व मेऽद्य
पाप्रच्छतश्चास्य मुनीन्द्र सर्वम्॥ **7.1.41**॥ 41

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रथमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वितीयः सर्गः ॥

अगस्त्येन पुलस्त्यस्य गुणतपसोर्वर्णनं ततो विश्रवस उत्पत्तेः कथनं च

तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः।
कुम्भयोनिर्महातेजा वाक्यमेतदुवाच ह ॥ **7.2.1** ॥ 42

शृणु राम यथा वृत्तं तस्य तेजोबलं महत्।
जघान शत्रून् येनासौ न च वध्यः स शत्रुभिः ॥ **7.2.2** ॥ 43

तावत् ते रावणस्येदं कुलं जन्म च राघव।
वरप्रदानं च तथा तस्मै दत्तं ब्रवीमि ते ॥ **7.2.3** ॥ 44

पुरा कृतयुगे राम प्रजापतिसुतः प्रभुः।
पुलस्त्यो नाम ब्रह्मर्षिः साक्षादिव पितामहः ॥ **7.2.4** ॥ 45

नानुकीर्त्या गुणास्तस्य धर्मतः शीलतस्तथा।
प्रजापतेः पुत्र इति वक्तुं शक्यं हि नामतः ॥ **7.2.5** ॥ 46

प्रजापतिसुतत्वेन देवानां वल्लभो हि सः।
इष्टः सर्वस्य लोकस्य गुणैः शुभैर्महामतिः ॥ **7.2.6** ॥ 47

स तु धर्मप्रसङ्गेन मेरोः पार्श्वे महागिरेः।
तृणबिन्द्वाश्रमं गत्वाप्यवसन्मुनिपुङ्गवः ॥ **7.2.7** ॥ 48

तपस्तेपे स धर्मात्मा स्वाध्यायनियतेन्द्रियः।
गत्वाऽऽश्रमपदं तस्य विघ्नं कुर्वन्ति कन्यकाः॥ **7.2.8**॥ 49

ऋषिपन्नगकन्याश्च राजर्षितनयाश्च याः।
क्रीडन्त्योऽप्सरसश्चैव तं देशमुपपेदिरे॥ **7.2.9**॥ 50

सर्वर्तुषूपभोग्यत्वाद् रम्यत्वात् काननस्य च।
नित्यशस्तास्तु तं देशं गत्वा क्रीडन्ति कन्यकाः॥ **7.2.10**॥ 51

देशस्य रमणीयत्वात् पुलस्त्यो यत्र स द्विजः।
गायन्त्यो वादयन्त्यश्च लासयन्त्यस्तथैव च॥ **7.2.11**॥ 52

मुनेस्तपस्विनस्तस्य विघ्नं चक्रुरनिन्दिताः।
अथ रुष्टो महातेजा व्याजहार महामुनिः॥ **7.2.12**॥ 53

या मे दर्शनमागच्छेत् सा गर्भं धारयिष्यति।
तास्तु सर्वाः प्रतिश्रुत्य तस्य वाक्यं महात्मनः॥ **7.2.13**॥ 54

ब्रह्मशापभयाद् भीतास्तं देशं नोपचक्रमुः।
तृणबिन्दोस्तु राजर्षेस्तनया न शृणोति तत्॥ **7.2.14**॥ 55

गत्वाऽऽश्रमपदं तत्र विचचार सुनिर्भया।
न चापश्यच्च सा तत्र काञ्चिदभ्यागतां सखीम्॥ **7.2.15**॥ 56

तस्मिन् काले महातेजाः प्राजापत्यो महानृषिः।
स्वाध्यायमकरोत् तत्र तपसा भावितः स्वयम्॥ **7.2.16**॥ 57

सा तु वेदश्रुतिं श्रुत्वा दृष्ट्वा वै तपसो निधिम्।
अभवत् पाण्डुदेहा सा सुव्यञ्जितशरीरजा॥ **7.2.17**॥ 58

बभूव च समुद्विग्ना दृष्ट्वा तद्दोषमात्मनः।
इदं मे किंत्विति ज्ञात्वा पितुर्गत्वाऽऽश्रमे स्थिता॥ **7.2.18**॥ 59

तां तु दृष्ट्वा तथाभूतां तृणबिन्दुरथाब्रवीत्।
किं त्वमेतत्त्वसदृशं धारयस्यात्मनो वपुः॥ **7.2.19**॥ 60

सा तु कृत्वाञ्जलिं दीना कन्योवाच तपोधनम्।
न जाने कारणं तात येन मे रूपमीदृशम्॥ **7.2.20**॥ 61

किं तु पूर्वं गतास्म्येका महर्षेर्भावितात्मनः।
पुलस्त्यस्याश्रमं दिव्यमन्वेष्टुं स्वसखीजनम्॥ **7.2.21**॥ 62

न च पश्याम्यहं तत्र काञ्चिदभ्यागतां सखीम्।
रूपस्य तु विपर्यासं दृष्ट्वा त्रासादिहागता॥ **7.2.22**॥ 63

तृणबिन्दुस्तु राजर्षिस्तपसा द्योतितप्रभः।
ध्यानं विवेश तच्चापि अपश्यदृषिकर्मजम्॥ **7.2.23**॥ 64

स तु विज्ञाय तं शापं महर्षेर्भावितात्मनः।
गृहीत्वा तनयां गत्वा पुलस्त्यमिदमब्रवीत्॥ **7.2.24**॥ 65

भगवंस्तनयां मे त्वं गुणैः स्वैरेव भूषिताम्।
भिक्षां प्रतिगृहाणेमां महर्षे स्वयमुद्यताम्॥ **7.2.25**॥ 66

तपश्चरणयुक्तस्य श्राम्यमाणेन्द्रियस्य ते।
शुश्रूषणपरा नित्यं भविष्यति न संशयः॥ **7.2.26**॥ 67

तं ब्रुवाणं तु तद् वाक्यं राजर्षिं धार्मिकं तदा।
जिघृक्षुरब्रवीत् कन्यां बाढमित्येव स द्विजः॥ **7.2.27**॥ 68

दत्त्वा तु तनयां राजा स्वमाश्रमपदं गतः।
सापि तत्रावसत् कन्या तोषयन्ती पतिं गुणैः॥ **7.2.28**॥ 69

तस्यास्तु शीलवृत्ताभ्यां तुतोष मुनिपुङ्गवः।
प्रीतः स तु महातेजा वाक्यमेतदुवाच ह॥ **7.2.29**॥ 70

परितुष्टोऽस्मि सुश्रोणि गुणानां सम्पदा भृशम्।
तस्माद् देवि ददाम्यद्य पुत्रमात्मसमं तव॥ **7.2.30**॥ 71

उभयोर्वंशकर्तारं पौलस्त्य इति विश्रुतम्।
यस्मात् तु विश्रुतो वेदस्त्वयेहाध्ययतो मम॥ **7.2.31**॥ 72

तस्मात् स विश्रवा नाम भविष्यति न संशयः।
एवमुक्ता तु सा देवी प्रहृष्टेनान्तरात्मना॥ **7.2.32**॥ 73

अचिरेणैव कालेनासूत विश्रवसं सुतम्।
त्रिषु लोकेषु विख्यातं यशोधर्मसमन्वितम्॥ **7.2.33**॥ 74

श्रुतिमान् समदर्शी च व्रताचाररतस्तथा।
पितेव तपसा युक्तो ह्यभवद् विश्रवा मुनिः॥ **7.2.34**॥ 75

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वितीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ तृतीयः सर्गः ॥

विश्रवसो वैश्रवणस्योत्पत्तेस्तपसो वरप्राप्तेर्लङ्कायां निवासस्य च वर्णनम्

अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः।
अचिरेणैव कालेन पितेव तपसि स्थितः॥ **7.3.1** ॥ 76

सत्यवाञ्शीलवान् दान्तः स्वाध्यायनिरतः शुचिः।
सर्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः॥ **7.3.2** ॥ 77

ज्ञात्वा तस्य तु तद् वृत्तं भरद्वाजो महामुनिः।
ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम्॥ **7.3.3** ॥ 78

प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा।
प्रजान्वीक्षिकया बुद्ध्या श्रेयो ह्यस्य विचिन्तयन्॥ **7.3.4** ॥ 79

मुदा परमया युक्तो विश्रवा मुनिपुङ्गवः।
स तस्यां वीर्यसम्पन्नमपत्यं परमाद्भुतम्॥ **7.3.5** ॥ 80

जनयामास धर्मज्ञः सर्वैर्ब्रह्मगुणैर्वृतम्।
तस्मिञ्जाते तु संहृष्टः स बभूव पितामहः॥ **7.3.6** ॥ 81

दृष्ट्वा श्रेयस्करीं बुद्धिं धनाध्यक्षो भविष्यति।
नाम चास्याकरोत् प्रीतः सार्धं देवर्षिभिस्तदा॥ **7.3.7** ॥ 82

यस्माद् विश्रवसोऽपत्यं सादृश्याद् विश्रवा इव।
तस्माद् वैश्रवणो नाम भविष्यत्येष विश्रुतः॥ **7.3.8**॥ 83

स तु वैश्रवणस्तत्र तपोवनगतस्तदा।
अवर्धताहुतिहुतो महातेजा यथानलः॥ **7.3.9**॥ 84

तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः।
चरिष्ये परमं धर्मं धर्मो हि परमा गतिः॥ **7.3.10**॥ 85

स तु वर्षसहस्राणि तपस्तप्त्वा महावने।
यन्त्रितो नियमैरुग्रैश्चकार सुमहत्तपः॥ **7.3.11**॥ 86

पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत्।
जलाशी मारुताहारो निराहारस्तथैव च॥ **7.3.12**॥ 87

एवं वर्षसहस्राणि जग्मुस्तान्येकवर्षवत्।
अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह॥ **7.3.13**॥ 88

गत्वा तस्याश्रमपदं ब्रह्मेदं वाक्यमब्रवीत्।
परितुष्टोऽस्मि ते वत्स कर्मणानेन सुव्रत॥ **7.3.14**॥ 89

वरं वृणीष्व भद्रं ते वरार्हस्त्वं महामते।
अथाब्रवीद् वैश्रवणः पितामहमुपस्थितम्॥ **7.3.15**॥ 90

भगवन् लोकपालत्वमिच्छेयं लोकरक्षणम्।
अथाब्रवीद् वैश्रवणं परितुष्टेन चेतसा॥ **7.3.16**॥ 91

ब्रह्मा सुरगणैः सार्धं बाढमित्येव हृष्टवत्।
अहं वै लोकपालानां चतुर्थं स्रष्टुमुद्यतः॥ **7.3.17**॥ 92

यमेन्द्रवरुणानां च पदं यत् तव चेप्सितम्।
तद् गच्छ बत धर्मज्ञ निधीशत्वमवाप्नुहि॥ **7.3.18**॥ 93

शक्राम्बुपयमानां च चतुर्थस्त्वं भविष्यसि।
एतच्च पुष्पकं नाम विमानं सूर्यसन्निभम्॥ **7.3.19**॥ 94

प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज।
स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम्॥ **7.3.20**॥ 95

कृतकृत्या वयं तात दत्त्वा तव वरद्वयम्।
इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह॥ **7.3.21**॥ 96

गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम्।
धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान्॥ **7.3.22**॥ 97

भगवन् लब्धवानस्मि वरमिष्टं पितामहात्।
निवासनं न मे देवो विदधे स प्रजापतिः॥ **7.3.23**॥ 98

तं पश्य भगवन् कञ्चिन्निवासं साधु मे प्रभो।
न च पीडा भवेद् यत्र प्राणिनो यस्य कस्यचित्॥ **7.3.24**॥ 99

एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः।
वचनं प्राह धर्मज्ञ श्रूयतामिति सत्तम॥ **7.3.25**॥ 100

दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः।
तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा॥ **7.3.26**॥ 101

लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा।
राक्षसानां निवासार्थं यथेन्द्रस्यामरावती॥ **7.3.27**॥ 102

तत्र त्वं वस भद्रं ते लङ्कायां नात्र संशयः।
हेमप्राकारपरिखा यन्त्रशस्त्रसमावृता॥ **7.3.28**॥ 103

रमणीया पुरी सा हि रुक्मवैदूर्यतोरणा।
राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः॥ **7.3.29**॥ 104

शून्या रक्षोगणैः सर्वै रसातलतलं गतैः।
शून्या सम्प्रति लङ्का सा प्रभुस्तस्या न विद्यते॥ **7.3.30**॥ 105

स त्वं तत्र निवासाय गच्छ पुत्र यथासुखम्।
निर्दोषस्तत्र ते वासो न बाधस्तत्र कस्यचित्॥ **7.3.31**॥ 106

एतच्छ्रुत्वा स धर्मात्मा धर्मिष्ठं वचनं पितुः।
निवासयामास तदा लङ्कां पर्वतमूर्धनि॥ **7.3.32**॥ 107

नैर्ऋतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा।
अचिरेणैव कालेन सम्पूर्णा तस्य शासनात्॥ **7.3.33**॥ 108

स तु तत्रावसत् प्रीतो धर्मात्मा नैर्ऋतर्षभः।
समुद्रपरिखायां स लङ्कायां विश्रवात्मजः॥ **7.3.34**॥ 109

काले काले तु धर्मात्मा पुष्पकेण धनेश्वरः।
अभ्यागच्छद् विनीतात्मा पितरं मातरं च हि॥ **7.3.35**॥ 110

स देवगन्धर्वगणैरभिष्टुत -
स्तथाप्सरोनृत्यविभूषितालयः।
गभस्तिभिः सूर्य इवावभासयन्
पितुः समीपं प्रययौ स वित्तपः॥ **7.3.36**॥ 111

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे तृतीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्थः सर्गः ॥

राक्षसवंशवर्णनं हेतिविद्युत्केशसुकेशानामुत्पत्तिः

श्रुत्वागस्त्येरितं वाक्यं रामो विस्मयमागतः।
कथमासीत् तु लङ्कायां सम्भवो रक्षसां पुरा॥ **7.4.1**॥ 112

ततः शिरः कम्पयित्वा त्रेताग्निसमविग्रहम्।
तमगस्त्यं मुहुर्दृष्ट्वा स्मयमानोऽभ्यभाषत॥ **7.4.2**॥ 113

भगवन् पूर्वमप्येषा लङ्काऽऽसीत् पिशिताशिनाम्।
श्रुत्वेदं भगवद्वाक्यं जातो मे विस्मयः परः॥ **7.4.3**॥ 114

पुलस्त्यवंशादुद्भूता राक्षसा इति नः श्रुतम्।
इदानीमन्यतश्चापि सम्भवः कीर्तितस्त्वया॥ **7.4.4**॥ 115

रावणात् कुम्भकर्णाच्च प्रहस्ताद् विकटादपि।
रावणस्य च पुत्रेभ्यः किं नु ते बलवत्तराः॥ **7.4.5**॥ 116

क एषां पूर्वको ब्रह्मन् किंनामा च बलोत्कटः।
अपराधं च कं प्राप्य विष्णुना द्राविताः कथम्॥ **7.4.6**॥ 117

एतद् विस्तरतः सर्वं कथयस्व ममानघ।
कुतूहलमिदं मह्यं नुद भानुर्यथा तमः॥ **7.4.7**॥ 118

राघवस्य वचः श्रुत्वा संस्कारालङ्कृतं शुभम्।
अथ विस्मयमानस्तमगस्त्यः प्राह राघवम्॥ **7.4.8**॥ 119

प्रजापतिः पुरा सृष्ट्वा अपः सलिलसम्भवः।
तासां गोपायने सत्त्वानसृजत् पद्मसम्भवः॥ **7.4.9**॥ 120

ते सत्त्वाः सत्त्वकर्तारं विनीतवदुपस्थिताः।
किं कुर्म इति भाषन्तः क्षुत्पिपासाभयार्दिताः॥ **7.4.10**॥ 121

प्रजापतिस्तु तान् सर्वान् प्रत्याह प्रहसन्निव।
आभाष्य वाचा यत्नेन रक्षध्वमिति मानद॥ **7.4.11**॥ 122

रक्षाम इति तत्रान्यैर्यक्षाम इति चापरैः।
भुङ्क्ष्वेताभुङ्क्ष्वेतैरुक्तस्ततस्तानाह भूतकृत्॥ **7.4.12**॥ 123

रक्षाम इति यैरुक्तं राक्षसास्ते भवन्तु वः।
यक्षाम इति यैरुक्तं यक्षा एव भवन्तु वः॥ **7.4.13**॥ 124

तत्र हेतिः प्रहेतिश्च भ्रातरौ राक्षसाधिपौ।
मधुकैटभसङ्काशौ बभूवतुररिन्दमौ॥ **7.4.14**॥ 125

प्रहेतिर्धार्मिकस्तत्र तपोवनगतस्तदा।
हेतिर्दारक्रियार्थे तु परं यत्नमथाकरोत्॥ **7.4.15**॥ 126

स कालभगिनीं कन्यां भयां नाम महाभयाम्।
उदावहदमेयात्मा स्वयमेव महामतिः॥ **7.4.16**॥ 127

स तस्यां जनयामास हेती राक्षसपुङ्गवः।
पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम्॥ **7.4.17**॥ 128

विद्युत्केशो हेतिपुत्रः स दीप्तार्कसमप्रभः।
व्यवर्धत महातेजास्तोयमध्य इवाम्बुजम्॥ **7.4.18**॥ 129

स यदा यौवनं भद्रमनुप्राप्तो निशाचरः।
ततो दारक्रियां तस्य कर्तुं व्यवसितः पिता॥ **7.4.19**॥ 130

सन्ध्यादुहितरं सोऽथ सन्ध्यातुल्यां प्रभावतः।
वरयामास पुत्रार्थं हेती राक्षसपुङ्गवः॥ **7.4.20**॥ 131

अवश्यमेव दातव्या परस्मै सेति सन्ध्यया।
चिन्तयित्वा सुता दत्ता विद्युत्केशाय राघव॥ **7.4.21**॥ 132

सन्ध्यायास्तनयां लब्ध्वा विद्युत्केशो निशाचरः।
रमते स तया सार्धं पौलोम्या मघवानिव॥ **7.4.22**॥ 133

केनचित्त्वथ कालेन राम सालकटङ्कटा।
विद्युत्केशाद् गर्भमाप घनराजिरिवार्णवात्॥ **7.4.23**॥ 134

ततः सा राक्षसी गर्भं घनगर्भसमप्रभम्।
प्रसूता मन्दरं गत्वा गङ्गा गर्भमिवाग्निजम्।
समुत्सृज्य तु सा गर्भं विद्युत्केशरतार्थिनी॥ **7.4.24**॥ 135

रेमे तु सार्धं पतिना विस्मृत्य सुतमात्मजम्।
उत्सृष्टस्तु तदा गर्भो घनशब्दसमस्वनः॥ **7.4.25**॥ 136

तयोत्सृष्टः स तु शिशुः शरदर्कसमद्युतिः।
निधायास्ये स्वयं मुष्टिं रुरोद शनकैस्तदा॥ **7.4.26**॥ 137

ततो वृषभमास्थाय पार्वत्या सहितः शिवः।
वायुमार्गेण गच्छन् वै शुश्राव रुदितस्वनम्॥ **7.4.27**॥ 138

अपश्यदुमया सार्धं रुदन्तं राक्षसात्मजम्।
कारुण्यभावात् पार्वत्या भवस्त्रिपुरसूदनः॥ **7.4.28**॥ 139

तं राक्षसात्मजं चक्रे मातुरेव वयःसमम्।
अमरं चैव तं कृत्वा महादेवोऽक्षरोऽव्ययः॥ **7.4.29**॥ 140

पुरमाकाशगं प्रादात् पार्वत्याः प्रियकाम्यया।
उमयापि वरो दत्तो राक्षसीनां नृपात्मज॥ **7.4.30**॥ 141

सद्योपलब्धिर्गर्भस्य प्रसूतिः सद्य एव च।
सद्य एव वयःप्राप्तिर्मातुरेव वयःसमम्॥ **7.4.31**॥ 142

ततः सुकेशो वरदानगर्वितः
श्रियं प्रभोः प्राप्य हरस्य पार्श्वतः।
चचार सर्वत्र महान् महामतिः
खगं पुरं प्राप्य पुरन्दरो यथा॥ **7.4.32**॥ 143

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्थः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चमः सर्गः ॥

सुकेशसन्ततीनां माल्यवत्सुमालिमालिनां सन्तानस्य वर्णनम्

सुकेशं धार्मिकं दृष्ट्वा वरलब्धं च राक्षसम्।
ग्रामणीर्नाम गन्धर्वो विश्वावसुसमप्रभः॥ **7.5.1** ॥ 144

तस्य देववती नाम द्वितीया श्रीरिवात्मजा।
त्रिषु लोकेषु विख्याता रूपयौवनशालिनी॥ **7.5.2** ॥ 145

तां सुकेशाय धर्मात्मा ददौ रक्षःश्रियं यथा।
वरदानकृतैश्वर्यं सा तं प्राप्य पतिं प्रियम्॥ **7.5.3** ॥ 146

आसीद् देववती तुष्टा धनं प्राप्येव निर्धनः।
स तया सह संयुक्तो रराज रजनीचरः॥ **7.5.4** ॥ 147

अञ्जनादभिनिष्क्रान्तः करेण्वेव महागजः।
ततः काले सुकेशस्तु जनयामास राघव॥ **7.5.5** ॥ 148

त्रीन् पुत्राञ्जनयामास त्रेताग्निसमविग्रहान्।
माल्यवन्तं सुमालिं च मालिं च बलिनां वरम्॥ **7.5.6** ॥ 149

त्रींस्त्रिनेत्रसमान् पुत्रान् राक्षसान् राक्षसाधिपः।
त्रयो लोका इवाव्यग्राः स्थितास्त्रय इवाग्नयः॥ **7.5.7** ॥ 150

त्रयो मन्त्रा इवात्युग्रास्त्रयो घोरा इवामयाः।
त्रयः सुकेशस्य सुतास्त्रेताग्निसमतेजसः॥ **7.5.8**॥ 151

विवृद्धिमगमंस्तत्र व्याधयोपेक्षिता इव।
वरप्राप्तिं पितुस्ते तु ज्ञात्वैश्वर्यं तपोबलात्॥ **7.5.9**॥ 152

तपस्तप्तुं गता मेरुं भ्रातरः कृतनिश्चयाः।
प्रगृह्य नियमान् घोरान् राक्षसा नृपसत्तम॥ **7.5.10**॥ 153

विचेरुस्ते तपो घोरं सर्वभूतभयावहम्।
सत्यार्जवशमोपेतैस्तपोभिर्भुवि दुर्लभैः॥ **7.5.11**॥ 154

सन्तापयन्तस्त्रीन् लोकान् सदेवासुरमानुषान्।
ततो विभुश्चतुर्वक्त्रो विमानवरमाश्रितः॥ **7.5.12**॥ 155

सुकेशपुत्रानामन्त्र्य वरदोऽस्मीत्यभाषत।
ब्रह्माणं वरदं ज्ञात्वा सेन्द्रैर्देवगणैर्वृतम्॥ **7.5.13**॥ 156

ऊचुः प्राञ्जलयः सर्वे वेपमाना इव द्रुमाः।
तपसाऽऽराधितो देव यदि नो दिशसे वरम्॥ **7.5.14**॥ 157

अजेयाः शत्रुहन्तारस्तथैव चिरजीविनः।
प्रभविष्णवो भवामेति परस्परमनुव्रताः॥ **7.5.15**॥ 158

एवं भविष्यथेत्युक्त्वा सुकेशतनयान् विभुः।
स ययौ ब्रह्मलोकाय ब्रह्मा ब्राह्मणवत्सलः॥ **7.5.16**॥ 159

वरं लब्ध्वा तु ते सर्वे राम रात्रिञ्चरास्तदा।
सुरासुरान् प्रबाधन्ते वरदानसुनिर्भयाः॥ **7.5.17**॥ 160

तैर्बाध्यमानास्त्रिदशाः सर्षिसङ्घाः सचारणाः।
त्रातारं नाधिगच्छन्ति निरयस्था यथा नराः॥ **7.5.18**॥ 161

अथ ते विश्वकर्माणं शिल्पिनां वरमव्ययम्।
ऊचुः समेत्य संहृष्टा राक्षसा रघुसत्तम॥ **7.5.19**॥ 162

ओजस्तेजोबलवतां महतामात्मतेजसा।
गृहकर्ता भवानेव देवानां हृदयेप्सितम्॥ **7.5.20**॥ 163

अस्माकमपि तावत् त्वं गृहं कुरु महामते।
हिमवन्तमुपाश्रित्य मेरुं मन्दरमेव वा॥ **7.5.21**॥ 164

महेश्वरगृहप्रख्यं गृहं नः क्रियतां महत्।
विश्वकर्मा ततस्तेषां राक्षसानां महाभुजः॥ **7.5.22**॥ 165

निवासं कथयामास शक्रस्येवामरावतीम्।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः॥ **7.5.23**॥ 166

सुवेल इति चाप्यन्यो द्वितीयो राक्षसेश्वराः।
शिखरे तस्य शैलस्य मध्यमेऽम्बुदसन्निभे॥ **7.5.24**॥ 167

शकुनैरपि दुष्प्रापे टङ्कच्छिन्नचतुर्दिशि।
त्रिंशद्योजनविस्तीर्णा शतयोजनमायता॥ **7.5.25**॥ 168

स्वर्णप्राकारसंवीता हेमतोरणसंवृता।
मया लङ्केति नगरी शक्राज्ञप्तेन निर्मिता॥ **7.5.26**॥ 169

तस्यां वसत दुर्धर्षा यूयं राक्षसपुङ्गवाः।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः॥ **7.5.27**॥ 170

लङ्कादुर्गं समासाद्य राक्षसैर्बहुभिर्वृताः।
भविष्यथ दुराधर्षाः शत्रूणां शत्रुसूदनाः॥ **7.5.28**॥ 171

विश्वकर्मवचः श्रुत्वा ततस्ते राक्षसोत्तमाः।
सहस्रानुचरा भूत्वा गत्वा तामवसन् पुरीम्॥ **7.5.29**॥ 172

दृढप्राकारपरिखां हैमैर्गृहशतैर्वृताम्।
लङ्कामवाप्य ते हृष्टा न्यवसन् रजनीचराः॥ **7.5.30**॥ 173

एतस्मिन्नेव काले तु यथाकामं च राघव।
नर्मदा नाम गन्धर्वी बभूव रघुनन्दन॥ **7.5.31**॥ 174

तस्याः कन्यात्रयं ह्यासीद्धीश्रीकीर्तिसमद्युति।
ज्येष्ठक्रमेण सा तेषां राक्षसानामराक्षसी॥ **7.5.32**॥ 175

कन्यास्ताः प्रददौ हृष्टा पूर्णचन्द्रनिभाननाः।
त्रयाणां राक्षसेन्द्राणां तिस्रो गन्धर्वकन्यकाः॥ **7.5.33**॥ 176

दत्ता मात्रा महाभागा नक्षत्रे भगदैवते।
कृतदारास्तु ते राम सुकेशतनयास्तदा॥ **7.5.34**॥ 177

चिक्रीडुः सह भार्याभिरप्सरोभिरिवामराः।
ततो माल्यवतो भार्या सुन्दरी नाम सुन्दरी॥ **7.5.35**॥ 178

स तस्यां जनयामास यदपत्यं निबोध तत्।
वज्रमुष्टिर्विरूपाक्षो दुर्मुखश्चैव राक्षसः॥ **7.5.36**॥ 179

सुप्तघ्नो यज्ञकोपश्च मत्तोन्मत्तौ तथैव च।
अनला चाभवत् कन्या सुन्दर्यां राम सुन्दरी॥ **7.5.37**॥ 180

सुमालिनोऽपि भार्याऽऽसीत् पूर्णचन्द्रनिभानना।
नाम्ना केतुमती राम प्राणेभ्योऽपि गरीयसी॥ **7.5.38**॥ 181

सुमाली जनयामास यदपत्यं निशाचरः।
केतुमत्यां महाराज तन्निबोधानुपूर्वशः॥ **7.5.39**॥ 182

प्रहस्तोऽकम्पनश्चैव विकटः कालिकामुखः।
धूम्राक्षश्चैव दण्डश्च सुपार्श्वश्च महाबलः॥ **7.5.40**॥ 183

संह्रादिः प्रघसश्चैव भासकर्णश्च राक्षसः।
राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिताः॥ **7.5.41**॥ 184

कुम्भीनसी च इत्येते सुमालेः प्रसवाः स्मृताः॥ **7.5.42**॥ 185

मालेस्तु वसुदा नाम गन्धर्वी रूपशालिनी।
भार्यासीत् पद्मपत्राक्षी स्वक्षी यक्षीवरोपमा॥ **7.5.43**॥ 186

सुमालेरनुजस्तस्यां जनयामास यत् प्रभो।
अपत्यं कथ्यमानं तु मया त्वं शृणु राघव॥ **7.5.44**॥ 187

अनलश्चानिलश्चैव हरः सम्पातिरेव च।
एते विभीषणामात्या मालेयास्ते निशाचराः॥ **7.5.45**॥ 188

ततस्तु ते राक्षसपुङ्गवास्त्रयो
निशाचरैः पुत्रशतैश्च संवृताः।
सुरान् सहेन्द्रानृषिनागयक्षान्
बबाधिरे तान् बहुवीर्यदर्पिताः॥ **7.5.46**॥ 189

जगद्भ्रमन्तोऽनिलवद् दुरासदा
रणेषु मृत्युप्रतिमानतेजसः।
वरप्रदानादपि गर्विता भृशं
क्रतुक्रियाणां प्रशमङ्कराः सदा॥ **7.5.47**॥ 190

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्ठः सर्गः ॥

भगवतः शिवस्य संमत्या देवानां रक्षोवधार्थं श्रीविष्णोः शरणग्रहणं ततः समाश्वस्तानां च निवर्तनं देवानामुपरि रक्षसामाक्रमणं देवानां साहाय्यकरणाय श्रीविष्णोरागमनं च

तैर्वध्यमाना देवाश्च ऋषयश्च तपोधनाः।
भयार्ताः शरणं जग्मुर्देवदेवं महेश्वरम्॥ **7.6.1**॥ 191

जगत्सृष्ट्यन्तकर्तारमजमव्यक्तरूपिणम्।
आधारं सर्वलोकानामाराध्यं परमं गुरुम्॥ **7.6.2**॥ 192

ते समेत्य तु कामारिं त्रिपुरारिं त्रिलोचनम्।
ऊचुः प्राञ्जलयो देवा भयगद्गदभाषिणः॥ **7.6.3**॥ 193

सुकेशपुत्रैर्भगवन् पितामहवरोद्धतैः।
प्रजाध्यक्ष प्रजाः सर्वा बाध्यन्ते रिपुबाधनैः॥ **7.6.4**॥ 194

शरण्यान्यशरण्यानि ह्याश्रमाणि कृतानि नः।
स्वर्गाच्च देवान् प्रच्याव्य स्वर्गे क्रीडन्ति देववत्॥ **7.6.5**॥ 195

अहं विष्णुरहं रुद्रो ब्रह्माहं देवराडहम्।
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्॥ **7.6.6**॥ 196

इति माली सुमाली च माल्यवांश्चैव राक्षसाः।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः॥ **7.6.7**॥ 197

तन्नो देव भयार्तानामभयं दातुमर्हसि।
अशिवं वपुरास्थाय जहि वै देवकण्टकान्॥ **7.6.8**॥ 198

इत्युक्तस्तु सुरैः सर्वैः कपर्दी नीललोहितः।
सुकेशं प्रति सापेक्षः प्राह देवगणान् प्रभुः॥ **7.6.9**॥ 199

अहं तान्न हनिष्यामि ममावध्या हि तेऽसुराः।
किं तु मन्त्रं प्रदास्यामि यो वै तान् निहनिष्यति॥ **7.6.10**॥ 200

एतमेव समुद्योगं पुरस्कृत्य महर्षयः।
गच्छध्वं शरणं विष्णुं हनिष्यति स तान् प्रभुः॥ **7.6.11**॥ 201

ततस्तु जयशब्देन प्रतिनन्द्य महेश्वरम्।
विष्णोः समीपमाजग्मुर्निशाचरभयार्दिताः॥ **7.6.12**॥ 202

शङ्खचक्रधरं देवं प्रणम्य बहुमान्य च।
ऊचुः सभ्भ्रान्तवद् वाक्यं सुकेशतनयान् प्रति॥ **7.6.13**॥ 203

सुकेशतनयैर्देव त्रिभिस्त्रेताग्निसन्निभैः।
आक्रम्य वरदानेन स्थानान्यपहतानि नः॥ **7.6.14**॥ 204

लङ्का नाम पुरी दुर्गा त्रिकूटशिखरे स्थिता।
तत्र स्थिताः प्रबाधन्ते सर्वान् नः क्षणदाचराः॥ **7.6.15**॥ 205

स त्वमस्मद्धितार्थाय जहि तान् मधुसूदन।
शरणं त्वां वयं प्राप्ता गतिर्भव सुरेश्वर॥ **7.6.16**॥ 206

चक्रकृत्तास्यकमलान् निवेदय यमाय वै।
भयेष्वभयदोऽस्माकं नान्योऽस्ति भवता विना॥ **7.6.17**॥ 207

राक्षसान् समरे हृष्टान् सानुबन्धान् मदोद्धतान्।
नुद त्वं नो भयं देव नीहारमिव भास्करः॥ **7.6.18**॥ 208

इत्येवं दैवतैरुक्तो देवदेवो जनार्दनः।
अभयं भयदोऽरीणां दत्त्वा देवानुवाच ह॥ **7.6.19**॥ 209

सुकेशं राक्षसं जाने ईशानवरदर्पितम्।
तांश्चास्य तनयाञ्जाने येषां ज्येष्ठः स माल्यवान्॥ **7.6.20**॥ 210

तानहं समतिक्रान्तमर्यादान् राक्षसाधमान्।
निहनिष्यामि सङ्क्रुद्धः सुरा भवत विज्वराः॥ **7.6.21**॥ 211

इत्युक्तास्ते सुराः सर्वे विष्णुना प्रभविष्णुना।
यथावासं ययुर्हृष्टाः प्रशंसन्तो जनार्दनम्॥ **7.6.22**॥ 212

विबुधानां समुद्योगं माल्यवांस्तु निशाचरः।
श्रुत्वा तौ भ्रातरौ वीराविदं वचनमब्रवीत्॥ **7.6.23**॥ 213

अमरा ऋषयश्चैव सङ्गम्य किल शङ्करम्।
अस्मद्वधं परीप्सन्त इदं वचनमब्रुवन्॥ **7.6.24**॥ 214

सुकेशतनया देव वरदानबलोद्धताः।
बाधन्तेऽस्मान् समुद्दृप्ता घोररूपाः पदे पदे॥ **7.6.25**॥ 215

राक्षसैरभिभूताः स्मो न शक्ताः स्म प्रजापते।
स्वेषु सद्मसु संस्थातुं भयात् तेषां दुरात्मनाम्॥ **7.6.26**॥ 216

तदस्माकं हितार्थाय जहि तांश्च त्रिलोचन।
राक्षसान् हुङ्कृतेनैव दह प्रदहतां वर॥ **7.6.27**॥ 217

इत्येवं त्रिदशैरुक्तो निशम्यान्धकसूदनः।
शिरः करं च धुन्वान इदं वचनमब्रवीत्॥ **7.6.28**॥ 218

अवध्या मम ते देवाः सुकेशतनया रणे।
मन्त्रं तु वः प्रदास्यामि यस्तान् वै निहनिष्यति॥ **7.6.29**॥ 219

योऽसौ चक्रगदापाणिः पीतवासा जनार्दनः।
हरिर्नारायणः श्रीमाञ्शरणं तं प्रपद्यथ॥ **7.6.30**॥ 220

हरादवाप्य ते मन्त्रं कामारिमभिवाद्य च।
नारायणालयं प्राप्य तस्मै सर्वं न्यवेदयन्॥ **7.6.31**॥ 221

ततो नारायणेनोक्ता देवा इन्द्रपुरोगमाः।
सुरारीस्तान् हनिष्यामि सुरा भवत निर्भयाः॥ **7.6.32**॥ 222

देवानां भयभीतानां हरिणा राक्षसर्षभौ।
प्रतिज्ञातो वधोऽस्माकं चिन्त्यतां यदिह क्षमम्॥ **7.6.33**॥ 223

हिरण्यकशिपोर्मृत्युरन्येषां च सुरद्विषाम्।
नमुचिः कालनेमिश्च संह्लादो वीरसत्तमः॥ **7.6.34**॥ 224

राधेयो बहुमायी च लोकपालोऽथ धार्मिकः।
यमलार्जुनौ च हार्दिक्यः शुम्भश्चैव निशुम्भकः॥ **7.6.35**॥ 225

असुरा दानवाश्चैव सत्त्ववन्तो महाबलाः।
सर्वे समरमासाद्य न श्रूयन्तेऽपराजिताः॥ **7.6.36**॥ 226

सर्वैः क्रतुशतैरिष्टं सर्वे मायाविदस्तथा।
सर्वे सर्वास्त्रकुशलाः सर्वे शत्रुभयङ्कराः॥ **7.6.37**॥ 227

नारायणेन निहताः शतशोऽथ सहस्रशः।
एतज्ज्ञात्वा तु सर्वेषां क्षमं कर्तुमिहार्हथ।
दुःखं नारायणं जेतुं यो नो हन्तुमिहेच्छति॥ **7.6.38**॥ 228

ततः सुमाली माली च श्रुत्वा माल्यवतो वचः।
ऊचतुर्भ्रातरं ज्येष्ठमश्विनाविव वासवम्॥ **7.6.39**॥ 229

स्वधीतं दत्तमिष्टं च ऐश्वर्यं परिपालितम्।
आयुर्निरामयं प्राप्तं सुधर्मः स्थापितः पथि॥ **7.6.40**॥ 230

देवसागरमक्षोभ्यं शस्त्रैः समवगाह्य च।
जिता द्विषो ह्यप्रतिमास्तन्नो मृत्युकृतं भयम्॥ **7.6.41**॥ 231

नारायणश्च रुद्रश्च शक्रश्चापि यमस्तथा।
अस्माकं प्रमुखे स्थातुं सर्वे बिभ्यति सर्वदा॥ **7.6.42**॥ 232

विष्णोर्द्वेषस्य नास्त्येव कारणं राक्षसेश्वर।
देवानामेव दोषेण विष्णोः प्रचलितं मनः॥ **7.6.43**॥ 233

तस्मादद्यैव सहिताः सर्वेऽन्योन्यसमावृताः।
देवानेव जिघांसामो येभ्यो दोषः समुत्थितः॥ **7.6.44**॥ 234

एवं सम्मन्त्र्य बलिनः सर्वसैन्यसमावृताः।
उद्योगं घोषयित्वा तु सर्वे नैर्ऋतपुङ्गवाः॥ **7.6.45**॥ 235

युद्धाय निर्ययुः क्रुद्धा जम्भवृत्रादयो यथा।
इति ते राम सम्मन्त्र्य सर्वोद्योगेन राक्षसाः॥ **7.6.46**॥ 236

युद्धाय निर्ययुः सर्वे महाकाया महाबलाः।
स्यन्दनैर्वारणैश्चैव हयैश्च करिसन्निभैः॥ **7.6.47**॥ 237

खरैर्गोभिरथोष्ट्रैश्च शिशुमारैर्भुजङ्गमैः।
मकरैः कच्छपैर्मीनैर्विहङ्गैर्गरुडोपमैः॥ **7.6.48**॥ 238

सिंहैर्व्याघ्रैर्वराहैश्च सृमरैश्चमरैरपि।
त्यक्त्वा लङ्कां गताः सर्वे राक्षसा बलगर्विताः॥ **7.6.49**॥ 239

प्रयाता देवलोकाय योद्धुं दैवतशत्रवः।
लङ्काविपर्ययं दृष्ट्वा यानि लङ्कालयान्यथ॥ **7.6.50**॥ 240

भूतानि भयदर्शीनि विमनस्कानि सर्वशः।
रथोत्तमैरुह्यमानाः शतशोऽथ सहस्रशः॥ **7.6.51**॥ 241

प्रयाता राक्षसास्तूर्णं देवलोकं प्रयत्नतः।
रक्षसामेव मार्गेण दैवतान्यपचक्रमुः॥ **7.6.52**॥ 242

भौमाश्चैवान्तरिक्षाश्च कालाज्ञप्ता भयावहाः।
उत्पाता राक्षसेन्द्राणामभावाय समुत्थिताः॥ **7.6.53**॥ 243

अस्थीनि मेघा ववृषुरुष्णं शोणितमेव च।
वेलां समुद्राश्चोत्क्रान्ताश्चेलुश्चाप्यथ भूधराः॥ **7.6.54**॥ 244

अट्टहासान् विमुञ्चन्तो घननादसमस्वनाः।
वाश्यन्त्यश्च शिवास्तत्र दारुणं घोरदर्शनाः॥ **7.6.55**॥ 245

सम्पतन्त्यथ भूतानि दृश्यन्ते च यथाक्रमम्।
गृध्रचक्रं महच्चात्र प्रज्वालोद्गारिभिर्मुखैः॥ **7.6.56**॥ 246

रक्षोगणस्योपरिष्टात् परिभ्रमति कालवत्।
कपोता रक्तपादाश्च सारिका विद्रुता ययुः॥ **7.6.57**॥ 247

काका वाश्यन्ति तत्रैव विडाला वै द्विपादयः।
उत्पातांस्ताननादृत्य राक्षसा बलदर्पिताः॥ **7.6.58**॥ 248

यान्त्येव न निवर्तन्ते मृत्युपाशावपाशिताः।
माल्यवांश्च सुमाली च माली च सुमहाबलः॥ **7.6.59**॥ 249

पुरस्सरा राक्षसानां ज्वलिता इव पावकाः।
माल्यवन्तं तु ते सर्वे माल्यवन्तमिवाचलम्॥ **7.6.60**॥ 250

निशाचरा आश्रयन्ति धातारमिव देवताः।
तद् बलं राक्षसेन्द्राणां महाभ्रघननादितम्॥ **7.6.61**॥ 251

जयेप्सया देवलोकं ययौ मालिवशे स्थितम्।
राक्षसानां समुद्योगं तं तु नारायणः प्रभुः॥ **7.6.62**॥ 252

देवदूतादुपश्रुत्य चक्रे युद्धे तदा मनः।
स सज्जायुधतूणीरो वैनतेयोपरि स्थितः॥ **7.6.63**॥ 253

आसाद्य कवचं दिव्यं सहस्रार्कसमद्युति।
आबद्ध्य शरसम्पूर्णे इषुधी विमले तदा॥ **7.6.64**॥ 254

श्रोणिसूत्रं च खड्गं च विमलं कमलेक्षणः।
शङ्खचक्रगदाशार्ङ्गखड्गांश्चैव वरायुधान्॥ **7.6.65**॥ 255

सुपर्णं गिरिसङ्काशं वैनतेयमथास्थितः।
राक्षसानामभावाय ययौ तूर्णतरं प्रभुः॥ **7.6.66**॥ 256

सुपर्णपृष्ठे स बभौ श्यामः पीताम्बरो हरिः।
काञ्चनस्य गिरेः शृङ्गे सतडित्तोयदो यथा॥ **7.6.67**॥ 257

स सिद्धदेवर्षिमहोरगैश्च
गन्धर्वयक्षैरुपगीयमानः।
समाससादासुरसैन्यशत्रु -
श्चक्रासिशार्ङ्गायुधशङ्खपाणिः॥ **7.6.68**॥ 258

सुपर्णपक्षानिलनुन्नपक्षं
भ्रमत्पताकं प्रविकीर्णशस्त्रम्।
चचाल तद्राक्षसराजसैन्यं
चलोपलं नीलमिवाचलाग्रम्॥ **7.6.69**॥ 259

ततः शितैः शोणितमांसरूषितै -
र्युगान्तवैश्वानरतुल्यविग्रहैः।
निशाचराः सम्परिवार्य माधवं
वरायुधैर्निर्बिभिदुः सहस्रशः॥ **7.6.70**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षष्ठः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तमः सर्गः ॥

विष्णुना रक्षसां संहारस्तेषां पलायनं च

नारायणगिरिं ते तु गर्जन्तो राक्षसाम्बुदाः।
अर्दयन्तोऽस्त्रवर्षेण वर्षेणेवाद्रिमम्बुदाः॥ **7.7.1** ॥ 261

श्यामावदातस्तैर्विष्णुर्नीलैर्नक्तञ्चरोत्तमैः।
वृतोऽञ्जनगिरीवायं वर्षमाणैः पयोधरैः॥ **7.7.2** ॥ 262

शलभा इव केदारं मशका इव पावकम्।
यथामृतघटं दंशा मकरा इव चार्णवम्॥ **7.7.3** ॥ 263

तथा रक्षोधनुर्मुक्ता वज्रानिलमनोजवाः।
हरिं विशन्ति स्म शरा लोका इव विपर्यये॥ **7.7.4** ॥ 264

स्यन्दनैः स्यन्दनगता गजैश्च गजमूर्धगाः।
अश्वारोहास्तथाश्वैश्च पादाताश्चाम्बरे स्थिताः॥ **7.7.5** ॥ 265

राक्षसेन्द्रा गिरिनिभाः शरैः शक्त्यृष्टितोमरैः।
निरुच्छ्वासं हरिं चक्रुः प्राणायामा इव द्विजम्॥ **7.7.6** ॥ 266

निशाचरैस्ताड्यमानो मीनैरिव महोदधिः।
शार्ङ्गमायम्य दुर्धर्षो राक्षसेभ्योऽसृजच्छरान्॥ **7.7.7** ॥ 267

शरैः पूर्णायतोत्सृष्टैर्वज्रकल्पैर्मनोजवैः।
चिच्छेद विष्णुर्निशितैः शतशोऽथ सहस्रशः॥ **7.7.8**॥ 268

विद्राव्य शरवर्षेण वर्षं वायुरिवोत्थितम्।
पाञ्चजन्यं महाशङ्खं प्रदध्मौ पुरुषोत्तमः॥ **7.7.9**॥ 269

सोऽम्बुजो हरिणा ध्मातः सर्वप्राणेन शङ्खराट्।
ररास भीमनिर्ह्रादस्त्रैलोक्यं व्यथयन्निव॥ **7.7.10**॥ 270

शङ्खराजरवः सोऽथ त्रासयामास राक्षसान्।
मृगराज इवारण्ये समदानिव कुञ्जरान्॥ **7.7.11**॥ 271

न शेकुरश्वाः संस्थातुं विमदाः कुञ्जराऽभवन्।
स्यन्दनेभ्यश्च्युता वीराः शङ्खरावितदुर्बलाः॥ **7.7.12**॥ 272

शार्ङ्गचापविनिर्मुक्ता वज्रतुल्याननाः शराः।
विदार्य तानि रक्षांसि सुपुङ्खा विविशुः क्षितिम्॥ **7.7.13**॥ 273

भिद्यमानाः शरैः सङ्ख्ये नारायणकरच्युतैः।
निपेतू राक्षसा भूमौ शैला वज्रहता इव॥ **7.7.14**॥ 274

व्रणानि परगात्रेभ्यो विष्णुचक्रकृतानि हि।
असृक् क्षरन्ति धाराभिः स्वर्णधारा इवाचलाः॥ **7.7.15**॥ 275

शङ्खराजरवश्चापि शार्ङ्गचापरवस्तथा।
राक्षसानां रवांश्चापि ग्रसते वैष्णवो रवः॥ **7.7.16**॥ 276

तेषां शिरोधरान् धूताञ्छरध्वजधनूंषि च।
रथान् पताकास्तूणीरांश्चिच्छेद स हरिः शरैः॥ **7.7.17**॥ 277

सूर्यादिव करा घोरा वार्योघा इव सागरात्।
पर्वतादिव नागेन्द्रा धारौघा इव चाम्बुदात्॥ **7.7.18**॥ 278

तथा शार्ङ्गविनिर्मुक्ताः शरा नारायणेरिताः।
निर्धावन्तीषवस्तूर्णं शतशोऽथ सहस्रशः॥ **7.7.19**॥ 279

शरभेण यथा सिंहाः सिंहेन द्विरदा यथा।
द्विरदेन यथा व्याघ्रा व्याघ्रेण द्वीपिनो यथा॥ **7.7.20**॥ 280

द्वीपिनेव यथा श्वानः शुना मार्जारको यथा।
मार्जारेण यथा सर्पाः सर्पेण च यथाखवः॥ **7.7.21**॥ 281

तथा ते राक्षसाः सर्वे विष्णुना प्रभविष्णुना।
द्रवन्ति द्राविताश्चान्ये शायिताश्च महीतले॥ **7.7.22**॥ 282

राक्षसानां सहस्राणि निहत्य मधुसूदनः।
वारिजं पूरयामास तोयदं सुरराडिव॥ **7.7.23**॥ 283

नारायणशरत्रस्तं शङ्खनादसुविह्वलम्।
ययौ लङ्कामभिमुखं प्रभग्नं राक्षसं बलम्॥ **7.7.24**॥ 284

प्रभग्ने राक्षसबले नारायणशराहते।
सुमाली शरवर्षेण निववार रणे हरिम्॥ **7.7.25**॥ 285

स तु तं छादयामास नीहार इव भास्करम्।
राक्षसाः सत्त्वसम्पन्नाः पुनर्धैर्यं समादधुः॥ **7.7.26**॥ 286

अथ सोऽभ्यपतद् रोषाद् राक्षसो बलदर्पितः।
महानादं प्रकुर्वाणो राक्षसाञ्जीवयन्निव॥ **7.7.27**॥ 287

उत्क्षिप्य लम्बाभरणं धुन्वन् करमिव द्विपः।
ररास राक्षसो हर्षात् सतडित्तोयदो यथा॥ **7.7.28**॥ 288

सुमालेर्नर्दतस्तस्य शिरो ज्वलितकुण्डलम्।
चिच्छेद यन्तुरश्वाश्च भ्रान्तास्तस्य तु रक्षसः॥ **7.7.29**॥ 289

तैरश्वैर्भ्राम्यते भ्रान्तैः सुमाली राक्षसेश्वरः।
इन्द्रियाश्वैः परिभ्रान्तैर्धृतिहीनो यथा नरः॥ **7.7.30**॥ 290

ततो विष्णुं महाबाहुं प्रपतन्तं रणाजिरे।
हृते सुमालेरश्वैश्च रथे विष्णुरथं प्रति॥ **7.7.31**॥ 291

माली चाभ्यद्रवद् युक्तः प्रगृह्य सशरं धनुः।
मालेर्धनुश्च्युता बाणाः कार्तस्वरविभूषिताः॥ **7.7.32**॥ 292

विविशुर्हरिमासाद्य क्रौञ्चं पत्ररथा इव।
अर्द्यमानः शरैः सोऽथ मालिमुक्तैः सहस्रशः॥ **7.7.33**॥ 293

चुक्षुभे न रणे विष्णुर्जितेन्द्रिय इवाधिभिः।
अथ मौर्वीस्वनं श्रुत्वा भगवान् भूतभावनः॥ **7.7.34**॥ 294

मालिनं प्रति बाणौघान् ससर्जासिगदाधरः।
ते मालिदेहमासाद्य वज्रविद्युत्प्रभाः शराः॥ **7.7.35**॥ 295

पिबन्ति रुधिरं तस्य नागा इव सुधारसम्।
मालिनं विमुखं कृत्वा शङ्खचक्रगदाधरः॥ **7.7.36**॥ 296

मालिमौलिं ध्वजं चापं वाजिनश्चाप्यपातयत्।
विरथस्तु गदां गृह्य माली नक्तञ्चरोत्तमः॥ **7.7.37**॥ 297

आपुप्लवे गदापाणिर्गिर्यग्रादिव केसरी।
गदया गरुडेशानमीशानमिव चान्तकः॥ **7.7.38**॥ 298

ललाटदेशेऽभ्यहनद् वज्रेणेन्द्रो यथाचलम्।
गदयाभिहतस्तेन मालिना गरुडो भृशम्॥ **7.7.39**॥ 299

रणात् पराङ्मुखं देवं कृतवान् वेदनातुरः।
पराङ्मुखे कृते देवे मालिना गरुडेन वै॥ **7.7.40**॥ 300

उदतिष्ठन्महाशब्दो रक्षसामभिनर्दताम्।
रक्षसां रुवतां रावं श्रुत्वा हरिहयानुजः॥ **7.7.41**॥ 301

तिर्यगास्थाय सङ्क्रुद्धः पक्षीशो भगवान् हरिः।
पराङ्मुखोऽप्युत्ससर्ज मालेश्चक्रं जिघांसया॥ **7.7.42**॥ 302

तत् सूर्यमण्डलाभासं स्वभासा भासयन् नभः।
कालचक्रनिभं चक्रं मालेः शीर्षमपातयत्॥ **7.7.43**॥ 303

तच्छिरो राक्षसेन्द्रस्य चक्रोत्कृत्तं विभीषणम्।
पपात रुधिरोद्गारि पुरा राहुशिरो यथा॥ **7.7.44**॥ 304

ततः सुरैः सम्प्रहृष्टैः सर्वप्राणसमीरितः।
सिंहनादरवो मुक्तः साधु देवेतिवादिभिः॥ **7.7.45**॥ 305

मालिनं निहतं दृष्ट्वा सुमाली माल्यवानपि।
सबलौ शोकसन्तप्तौ लङ्कामेव प्रधावितौ॥ **7.7.46**॥ 306

गरुडस्तु समाश्वस्तः सन्निवृत्य यथा पुरा।
राक्षसान् द्रावयामास पक्षवातेन कोपितः॥ **7.7.47**॥ 307

चक्रकृत्तास्यकमला गदासञ्चूर्णितोरसः।
लाङ्गलग्लपितग्रीवा मुसलैर्भिन्नमस्तकाः॥ **7.7.48**॥ 308

केचिच्चैवासिना छिन्नास्तथान्ये शरताडिताः।
निपेतुरम्बरात् तूर्णं राक्षसाः सागराम्भसि॥ **7.7.49**॥ 309

नारायणोऽपीषुवराशनीभि -
विदारयामास धनुर्विमुक्तैः।
नक्तञ्चरान् धूतविमुक्तकेशान्
यथाशनीभिः सतडिन्महाभ्रः॥ **7.7.50**॥ 310

भिन्नातपत्रं पतमानशस्त्रं
शरैरपध्वस्तविनीतवेषम्।
विनिःसृतान्त्रं भयलोलनेत्रं
बलं तदुन्मत्ततरं बभूव॥ **7.7.51**॥ 311

सिंहार्दितानामिव कुञ्जराणां
निशाचराणां सह कुञ्जराणाम्।
रवाश्च वेगाश्च समं बभूवुः
पुराणसिंहेन विमर्दितानाम्॥ **7.7.52**॥ 312

ते वार्यमाणा हरिबाणजालैः
स्वबाणजालानि समुत्सृजन्तः।
धावन्ति नक्तञ्चरकालमेघा
वायुप्रणुन्ना इव कालमेघाः॥ **7.7.53**॥ 313

चक्रप्रहारैर्विनिकृत्तशीर्षाः
सञ्चूर्णिताङ्गाश्च गदाप्रहारैः।
असिप्रहारैर्द्विविधाविभिन्नाः
पतन्ति शैला इव राक्षसेन्द्राः॥ **7.7.54**॥ 314

विलम्बमानैर्मणिहारकुण्डलै -
र्निशाचरैर्नीलबलाहकोपमैः।
निपात्यमानैर्ददृशे निरन्तरं
निपात्यमानैरिव नीलपर्वतैः॥ **7.7.55**॥ 315

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टमः सर्गः ॥

माल्यवतो युद्धं पराजयश्च सुमालिप्रभृतीनां रक्षसां रसातले प्रवेशः

हन्यमाने बले तस्मिन् पद्मनाभेन पृष्ठतः।
माल्यवान् सन्निवृत्तोऽथ वेलामेत्य इवार्णवः॥ **7.8.1** ॥ 316

संरक्तनयनः क्रोधाच्चलन्मौलिर्निशाचरः।
पद्मनाभमिदं प्राह वचनं पुरुषोत्तमम्॥ **7.8.2** ॥ 317

नारायण न जानीषे क्षात्रधर्मं पुरातनम्।
अयुद्धमनसो भीतानस्मान् हंसि यथेतरः॥ **7.8.3** ॥ 318

पराङ्मुखवधं पापं यः करोति सुरेश्वर।
स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम्॥ **7.8.4** ॥ 319

युद्धश्रद्धाथवा तेऽस्ति शङ्खचक्रगदाधर।
अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत् तव॥ **7.8.5** ॥ 320

माल्यवन्तं स्थितं दृष्ट्वा माल्यवन्तमिवाचलम्।
उवाच राक्षसेन्द्रं तं देवराजानुजो बली॥ **7.8.6** ॥ 321

युष्मत्तो भयभीतानां देवानां वै मयाभयम्।
राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते॥ **7.8.7** ॥ 322

प्राणैरपि प्रियं कार्यं देवानां हि सदा मया।
सोऽहं वो निहनिष्यामि रसातलगतानपि॥ **7.8.8**॥ 323

देवदेवं ब्रुवाणं तं रक्ताम्बुरुहलोचनम्।
शक्त्या बिभेद सङ्क्रुद्धो राक्षसेन्द्रो भुजान्तरे॥ **7.8.9**॥ 324

माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना।
हरेरुरसि बभ्राज मेघस्थेव शतह्रदा॥ **7.8.10**॥ 325

ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः।
माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः॥ **7.8.11**॥ 326

स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता।
काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाञ्जनाचलम्॥ **7.8.12**॥ 327

सा तस्योरसि विस्तीर्णे हारभारावभासिते।
आपतद् राक्षसेन्द्रस्य गिरिकूट इवाशनिः॥ **7.8.13**॥ 328

तया भिन्नतनुत्राणः प्राविशद् विपुलं तमः।
माल्यवान् पुनराश्वस्तस्तस्थौ गिरिरिवाचलः॥ **7.8.14**॥ 329

ततः कालायसं शूलं कण्टकैर्बहुभिश्चितम्।
प्रगृह्याभ्यहनद् देवं स्तनयोरन्तरे दृढम्॥ **7.8.15**॥ 330

तथैव रणरक्तस्तु मुष्टिना वासवानुजम्।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः॥ **7.8.16**॥ 331

ततोऽम्बरे महाञ्छब्दः साधुसाध्विति चोत्थितः।
आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत्॥ **7.8.17**॥ 332

वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसम्।
व्यपोहद् बलवान् वायुः शुष्कपर्णचयं यथा॥ **7.8.18**॥ 333

द्विजेन्द्रपक्षवातेन द्रावितं दृश्य पूर्वजम्।
सुमाली स्वबलैः सार्धं लङ्कामभिमुखो ययौ॥ **7.8.19**॥ 334

पक्षवातबलोद्भूतो माल्यवानपि राक्षसः।
स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः॥ **7.8.20**॥ 335

एवं ते राक्षसा राम हरिणा कमलेक्षण।
बहुशः संयुगे भग्ना हतप्रवरनायकाः॥ **7.8.21**॥ 336

अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं बलार्दिताः।
त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः॥ **7.8.22**॥ 337

सुमालिनं समासाद्य राक्षसं रघुसत्तम।
स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे॥ **7.8.23**॥ 338

ये त्वया निहतास्ते तु पौलस्त्या नाम राक्षसाः।
सुमाली माल्यवान् माली ये च तेषां पुरःसराः।
सर्व एते महाभागा रावणाद् बलवत्तराः॥ **7.8.24**॥ 339

न चान्यो राक्षसान् हन्ता सुरारीन् देवकण्टकान्।
ऋते नारायणं देवं शङ्खचक्रगदाधरम्॥ **7.8.25**॥ 340

भवान् नारायणो देवश्चतुर्बाहुः सनातनः।
राक्षसान् हन्तुमुत्पन्नो ह्यजय्यः प्रभुरव्ययः॥ **7.8.26**॥ 341

नष्टधर्मव्यवस्थानां काले काले प्रजाकरः।
उत्पद्यते दस्युवधे शरणागतवत्सलः॥ **7.8.27**॥ 342

एषा मया तव नराधिप राक्षसाना -
मुत्पत्तिरद्य कथिता सकला यथावत्।

भूयो निबोध रघुसत्तम रावणस्य
जन्मप्रभावमतुलं ससुतस्य सर्वम्॥ **7.8.28**॥ 343

चिरात् सुमाली व्यचरद् रसातलं
स राक्षसो विष्णुभयार्दितस्तदा।
पुत्रैश्च पौत्रैश्च समन्वितो बली
ततस्तु लङ्कामवसद् धनेश्वरः॥ **7.8.29**॥ 344

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवमः सर्गः ॥

रावणप्रभृतीनां जन्म तेषां तपःकरणार्थं गोकर्णाश्रमे प्रवेशः

कस्यचित् त्वथ कालस्य सुमाली नाम राक्षसः।
रसातलान्मर्त्यलोकं सर्वं वै विचचार ह ॥ **7.9.1** ॥ 345

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः।
कन्यां दुहितरं गृह्य विना पद्ममिव श्रियम् ॥ **7.9.2** ॥ 346

राक्षसेन्द्रः स तु तदा विचरन् वै महीतले।
तदापश्यत् स गच्छन्तं पुष्पकेण धनेश्वरम् ॥ **7.9.3** ॥ 347

गच्छन्तं पितरं द्रष्टुं पुलस्त्यतनयं विभुम्।
तं दृष्ट्वामरसङ्काशं गच्छन्तं पावकोपमम् ॥ **7.9.4** ॥ 348

रसातलं प्रविष्टः सन्मर्त्यलोकात् सविस्मयः।
इत्येवं चिन्तयामास राक्षसानां महामतिः ॥ **7.9.5** ॥ 349

किं कृत्वा श्रेय इत्येवं वर्धेमहि कथं वयम्।
अथाब्रवीत् सुतां रक्षः कैकसीं नाम नामतः ॥ **7.9.6** ॥ 350

पुत्रि प्रदानकालोऽयं यौवनं व्यतिवर्तते।
प्रत्याख्यानाच्च भीतैस्त्वं न वरैः प्रतिगृह्यसे ॥ **7.9.7** ॥ 351

त्वत्कृते च वयं सर्वे यन्त्रिता धर्मबुद्धयः।
त्वं हि सर्वगुणोपेता श्रीः साक्षादिव पुत्रिके॥ **7.9.8**॥ 352

कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम्।
न ज्ञायते च कः कन्यां वरयेदिति कन्यके॥ **7.9.9**॥ 353

मातुः कुलं पितृकुलं यत्र चैव च दीयते।
कुलत्रयं सदा कन्या संशये स्थाप्य तिष्ठति॥ **7.9.10**॥ 354

सा त्वं मुनिवरं श्रेष्ठं प्रजापतिकुलोद्भवम्।
भज विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम्॥ **7.9.11**॥ 355

ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः।
तेजसा भास्करसमो यादृशोऽयं धनेश्वरः॥ **7.9.12**॥ 356

सा तु तद् वचनं श्रुत्वा कन्यका पितृगौरवात्।
तत्र गत्वा च सा तस्थौ विश्रवा यत्र तप्यते॥ **7.9.13**॥ 357

एतस्मिन्नन्तरे राम पुलस्त्यतनयो द्विजः।
अग्निहोत्रमुपातिष्ठच्चतुर्थ इव पावकः॥ **7.9.14**॥ 358

अविचिन्त्य तु तां वेलां दारुणां पितृगौरवात्।
उपसृत्याग्रतस्तस्य चरणाधोमुखी स्थिता॥ **7.9.15**॥ 359

विलिखन्ती मुहुर्भूमिमङ्गुष्ठाग्रेण भामिनी।
स तु तां वीक्ष्य सुश्रोणीं पूर्णचन्द्रनिभाननाम्॥ **7.9.16**॥ 360

अब्रवीत् परमोदारो दीप्यमानां स्वतेजसा।
भद्रे कस्यासि दुहिता कुतो वा त्वमिहागता॥ **7.9.17**॥ 361

किं कार्यं कस्य वा हेतोस्तत्त्वतो ब्रूहि शोभने॥ **7.9.18**॥ 362

एवमुक्ता तु सा कन्या कृताञ्जलिरथाब्रवीत्।
आत्मप्रभावेण मुने ज्ञातुमर्हसि मे मतम्॥ **7.9.19**॥ 363

किं तु मां विद्धि ब्रह्मर्षे शासनात् पितुरागताम्।
कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि॥ **7.9.20**॥ 364

स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह।
विज्ञातं ते मया भद्रे कारणं यन्मनोगतम्॥ **7.9.21**॥ 365

सुताभिलाषो मत्तस्ते मत्तमातङ्गगामिनि।
दारुणायां तु वेलायां यस्मात् त्वं मामुपस्थिता॥ **7.9.22**॥ 366

शृणु तस्मात् सुतान् भद्रे यादृशाञ्जनयिष्यसि।
दारुणान् दारुणाकारान् दारुणाभिजनप्रियान्॥ **7.9.23**॥ 367

प्रसविष्यसि सुश्रोणि राक्षसान् क्रूरकर्मणः।
सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद् वचः॥ **7.9.24**॥ 368

भगवन्नीदृशान् पुत्रांस्त्वत्तोऽहं ब्रह्मवादिनः।
नेच्छामि सुदुराचारान् प्रसादं कर्तुमर्हसि॥ **7.9.25**॥ 369

कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुङ्गवः।
उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम्॥ **7.9.26**॥ 370

पश्चिमो यस्तव सुतो भविष्यति शुभानने।
मम वंशानुरूपः स धर्मात्मा च न संशयः॥ **7.9.27**॥ 371

एवमुक्ता तु सा कन्या राम कालेन केनचित्।
जनयामास बीभत्सं रक्षोरूपं सुदारुणम्॥ **7.9.28**॥ 372

दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम्।
ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम्॥ **7.9.29**॥ 373

तस्मिञ्जाते ततस्तस्मिन् सज्वालकवलाः शिवाः।
क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रमुः॥ **7.9.30**॥ 374

ववर्ष रुधिरं देवो मेघाश्च खरनिःस्वनाः।
प्रबभौ न च सूर्यो वै महोल्काश्चापतन् भुवि॥ **7.9.31**॥ 375

चकम्पे जगती चैव ववुर्वाताः सुदारुणाः।
अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः॥ **7.9.32**॥ 376

अथ नामाकरोत् तस्य पितामहसमः पिता।
दशग्रीवः प्रसूतोऽयं दशग्रीवो भविष्यति॥ **7.9.33**॥ 377

तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः।
प्रमाणाद् यस्य विपुलं प्रमाणं नेह विद्यते॥ **7.9.34**॥ 378

ततः शूर्पणखा नाम सञ्जज्ञे विकृताननाः।
विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः॥ **7.9.35**॥ 379

तस्मिन् जाते महासत्त्वे पुष्पवर्षं पपात ह।
नभःस्थाने दुन्दुभयो देवानां प्राणदंस्तथा।
वाक्यं चैवान्तरिक्षे च साधु साध्विति तत् तदा॥ **7.9.36**॥ 380

तौ तु तत्र महारण्ये ववृधाते महौजसौ।
कुम्भकर्णदशग्रीवौ लोकोद्वेगकरौ तदा॥ **7.9.37**॥ 381

कुम्भकर्णः प्रमत्तस्तु महर्षीन् धर्मवत्सलान्।
त्रैलोक्ये नित्यासन्तुष्टो भक्षयन् विचचार ह॥ **7.9.38**॥ 382

विभीषणस्तु धर्मात्मा नित्यं धर्मव्यवस्थितः।
स्वाध्यायनियताहार उवास विजितेन्द्रियः॥ **7.9.39**॥ 383

अथ वैश्रवणो देवस्तत्र कालेन केनचित्।
आगतः पितरं द्रष्टुं पुष्पकेण धनेश्वरः॥ **7.9.40**॥ 384

तं दृष्ट्वा कैकसी तत्र ज्वलन्तमिव तेजसा।
आगम्य राक्षसी तत्र दशग्रीवमुवाच ह॥ **7.9.41**॥ 385

पुत्र वैश्रवणं पश्य भ्रातरं तेजसा वृतम्।
भ्रातृभावे समे चापि पश्यात्मानं त्वमीदृशम्॥ **7.9.42**॥ 386

दशग्रीव तथा यत्नं कुरुष्वामितविक्रम।
यथा त्वमपि मे पुत्र भवेर्वैश्रवणोपमः॥ **7.9.43**॥ 387

मातुस्तद् वचनं श्रुत्वा दशग्रीवः प्रतापवान्।
अमर्षमतुलं लेभे प्रतिज्ञां चाकरोत् तदा॥ **7.9.44**॥ 388

सत्यं ते प्रतिजानामि भ्रातृतुल्योऽधिकोऽपि वा।
भविष्याम्योजसा चैव सन्तापं त्यज हृद्गतम्॥ **7.9.45**॥ 389

ततः क्रोधेन तेनैव दशग्रीवः सहानुजः।
चिकीर्षुर्दुष्करं कर्म तपसे धृतमानसः॥ **7.9.46**॥ 390

प्राप्स्यामि तपसा काममिति कृत्वाध्यवस्य च।
आगच्छदात्मसिद्ध्यर्थं गोकर्णस्याश्रमं शुभम्॥ **7.9.47**॥ 391

स राक्षसस्तत्र सहानुजस्तदा
तपश्चचारातुलमुग्रविक्रमः।
अतोषयच्चापि पितामहं विभुं
ददौ स तुष्टश्च वराञ्जयावहान्॥ **7.9.48**॥ 392

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशमः सर्गः ॥

रावणादीनां तपो वरप्राप्तिश्च

अथाब्रवीन्मुनिं रामः कथं ते भ्रातरो वने।
कीदृशं तु तदा ब्रह्मंस्तपस्तेपुर्महाबलाः॥ **7.10.1** ॥ 393

अगस्त्यस्त्वब्रवीत् तत्र रामं सुप्रीतमानसम्।
तांस्तान् धर्मविधींस्तत्र भ्रातरस्ते समाविशन्॥ **7.10.2** ॥ 394

कुम्भकर्णस्ततो यत्तो नित्यं धर्मपथे स्थितः।
ततप ग्रीष्मकाले तु पञ्चाग्नीन् परितः स्थितः॥ **7.10.3** ॥ 395

मेघाम्बुसिक्तो वर्षासु वीरासनमसेवत।
नित्यं च शिशिरे काले जलमध्यप्रतिश्रयः॥ **7.10.4** ॥ 396

एवं वर्षसहस्राणि दश तस्यापचक्रमुः।
धर्मे प्रयतमानस्य सत्पथे निष्ठितस्य च॥ **7.10.5** ॥ 397

विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः।
पञ्चवर्षसहस्राणि पादेनैकेन तस्थिवान्॥ **7.10.6** ॥ 398

समाप्ते नियमे तस्य ननृतुश्चाप्सरोगणाः।
पपात पुष्पवर्षं च तुष्टुवुश्चापि देवताः॥ **7.10.7** ॥ 399

पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत।
तस्थौ चोर्ध्वशिरोबाहुः स्वाध्याये धृतमानसः॥ **7.10.8**॥ 400

एवं विभीषणस्यापि स्वर्गस्थस्येव नन्दने।
दशवर्षसहस्राणि गतानि नियतात्मनः॥ **7.10.9**॥ 401

दशवर्षसहस्रं तु निराहारो दशाननः।
पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः॥ **7.10.10**॥ 402

एवं वर्षसहस्राणि नव तस्यातिचक्रमुः।
शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनम्॥ **7.10.11**॥ 403

अथ वर्षसहस्रे तु दशमे दशमं शिरः।
छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः॥ **7.10.12**॥ 404

पितामहस्तु सुप्रीतः सार्धं देवैरुपस्थितः।
तव तावद् दशग्रीव प्रीतोऽस्मीत्यभ्यभाषत॥ **7.10.13**॥ 405

शीघ्रं वरय धर्मज्ञ वरो यस्तेऽभिकाङ्क्षितः।
कं ते कामं करोम्यद्य न वृथा ते परिश्रमः॥ **7.10.14**॥ 406

अथाब्रवीद् दशग्रीवः प्रहृष्टेनान्तरात्मना।
प्रणम्य शिरसा देवं हर्षगद्गदया गिरा॥ **7.10.15**॥ 407

भगवन् प्राणिनां नित्यं नान्यत्र मरणाद् भयम्।
नास्ति मृत्युसमः शत्रुरमरत्वमहं वृणे॥ **7.10.16**॥ 408

एवमुक्तस्तदा ब्रह्मा दशग्रीवमुवाच ह।
नास्ति सर्वामरत्वं ते वरमन्यं वृणीष्व मे॥ **7.10.17**॥ 409

एवमुक्ते तदा राम ब्रह्मणा लोककर्तृणा।
दशग्रीव उवाचेदं कृताञ्जलिरथाग्रतः॥ **7.10.18**॥ 410

सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम्।
अवध्योऽहं प्रजाध्यक्ष देवतानां च शाश्वत॥ **7.10.19**॥ 411

नहि चिन्ता ममान्येषु प्राणिष्वमरपूजित।
तृणभूता हि ते मन्ये प्राणिनो मानुषादयः॥ **7.10.20**॥ 412

एवमुक्तस्तु धर्मात्मा दशग्रीवेण रक्षसा।
उवाच वचनं देवः सह देवैः पितामहः॥ **7.10.21**॥ 413

भविष्यत्येवमेतत् ते वचो राक्षसपुङ्गव।
एवमुक्त्वा तु तं राम दशग्रीवं पितामहः॥ **7.10.22**॥ 414

शृणु चापि वरो भूयः प्रीतस्येह शुभो मम।
हुतानि यानि शीर्षाणि पूर्वमग्नौ त्वयानघ॥ **7.10.23**॥ 415

पुनस्तानि भविष्यन्ति तथैव तव राक्षस।
वितरामीह ते सौम्य वरं चान्यं दुरासदम्॥ **7.10.24**॥ 416

छन्दतस्तव रूपं च मनसा यद् यथेप्सितम्।
एवं पितामहोक्तस्य दशग्रीवस्य रक्षसः॥ **7.10.25**॥ 417

अग्नौ हुतानि शीर्षाणि पुनस्तान्युत्थितानि वै।
एवमुक्त्वा तु तं राम दशग्रीवं पितामहः॥ **7.10.26**॥ 418

विभीषणमथोवाच वाक्यं लोकपितामहः।
विभीषण त्वया वत्स धर्मसंहितबुद्धिना॥ **7.10.27**॥ 419

परितुष्टोऽस्मि धर्मात्मन् वरं वरय सुव्रत।
विभीषणस्तु धर्मात्मा वचनं प्राह साञ्जलिः॥ **7.10.28**॥ 420

वृतः सर्वगुणैर्नित्यं चन्द्रमा रश्मिभिर्यथा।
भगवन् कृतकृत्योऽहं यन्मे लोकगुरुः स्वयम्॥ **7.10.29**॥ 421

प्रीतेन यदि दातव्यो वरो मे शृणु सुव्रत।
परमापद्गतस्यापि धर्मे मम मतिर्भवेत्॥ **7.10.30**॥ 422

अशिक्षितं च ब्रह्मास्त्रं भगवन् प्रतिभातु मे।
या या मे जायते बुद्धिर्येषु येष्वाश्रमेषु च॥ **7.10.31**॥ 423

सा सा भवतु धर्मिष्ठा तं तं धर्मं च पालये।
एष मे परमोदारो वरः परमको मतः॥ **7.10.32**॥ 424

नहि धर्माभिरक्तानां लोके किञ्चन दुर्लभम्।
पुनः प्रजापतिः प्रीतो विभीषणमुवाच ह॥ **7.10.33**॥ 425

धर्मिष्ठस्त्वं यथा वत्स तथा चैतद् भविष्यति।
यस्माद् राक्षसयोनौ ते जातस्यामित्रनाशन॥ **7.10.34**॥ 426

नाधर्मे जायते बुद्धिरमरत्वं ददामि ते।
इत्युक्त्वा कुम्भकर्णाय वरं दातुमवस्थितम्॥ **7.10.35**॥ 427

प्रजापतिं सुराः सर्वे वाक्यं प्राञ्जलयोऽब्रुवन्।
न तावत् कुम्भकर्णाय प्रदातव्यो वरस्त्वया॥ **7.10.36**॥ 428

जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मतिः।
नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश॥ **7.10.37**॥ 429

अनेन भक्षिता ब्रह्मन्नृषयो मानुषास्तथा।
अलब्धवरपूर्वेण यत् कृतं राक्षसेन तु॥ **7.10.38**॥ 430

यद्येष वरलब्धः स्याद् भक्षयेद् भुवनत्रयम्।
वरव्याजेन मोहोऽस्मै दीयताममितप्रभ॥ **7.10.39**॥ 431

लोकानां स्वस्ति चैवं स्याद् भवेदस्य च सम्मतिः।
एवमुक्तः सुरैर्ब्रह्माचिन्तयत् पद्मसम्भवः॥ **7.10.40**॥ 432

चिन्तिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती।
प्राञ्जलिः सा तु पार्श्वस्था प्राह वाक्यं सरस्वती॥ **7.10.41**॥ 433

इयमस्म्यागता देव किं कार्यं करवाण्यहम्।
प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम्॥ **7.10.42**॥ 434

वाणि त्वं राक्षसेन्द्रस्य भव वाग्देवतेप्सिता।
तथेत्युक्त्वा प्रविष्टा सा प्रजापतिरथाब्रवीत्॥ **7.10.43**॥ 435

कुम्भकर्ण महाबाहो वरं वरय यो मतः।
कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत्॥ **7.10.44**॥ 436

स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम्।
एवमस्त्विति तं चोक्त्वा प्रायाद् ब्रह्मा सुरैः समम्॥ **7.10.45**॥ 437

देवी सरस्वती चैव राक्षसं तं जहौ पुनः।
ब्रह्मणा सह देवेषु गतेषु च नभःस्थलम्॥ **7.10.46**॥ 438

विमुक्तोऽसौ सरस्वत्या स्वां संज्ञां च ततो गतः।
कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः॥ **7.10.47**॥ 439

ईदृशं किमिदं वाक्यं ममाद्य वदनाच्च्युतम्।
अहं व्यामोहितो देवैरिति मन्ये तदागतैः॥ **7.10.48**॥ 440

एवं लब्धवराः सर्वे भ्रातरो दीप्ततेजसः।
श्लेष्मातकवनं गत्वा तत्र ते न्यवसन् सुखम्॥ **7.10.49**॥ 441

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे दशमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशः सर्गः ॥

रावणस्य सन्देशं श्रुत्वा पितुराज्ञया लङ्कां हित्वा कुबेरस्य कैलासे गमनं लङ्कायां रावणस्याभिषेको रक्षसां वासश्च

सुमाली वरलब्धांस्तु ज्ञात्वा चैतान् निशाचरान्।
उदतिष्ठद् भयं त्यक्त्वा सानुगः स रसातलात्॥ **7.11.1** ॥ 442

मारीचश्च प्रहस्तश्च विरूपाक्षो महोदरः।
उदतिष्ठन् सुसंरब्धाः सचिवास्तस्य रक्षसः॥ **7.11.2** ॥ 443

सुमाली सचिवैः सार्धं वृतो राक्षसपुङ्गवैः।
अभिगम्य दशग्रीवं परिष्वज्येदमब्रवीत्॥ **7.11.3** ॥ 444

दिष्ट्या ते वत्स सम्प्राप्तश्चिन्तितोऽयं मनोरथः।
यस्त्वं त्रिभुवनश्रेष्ठाल्लब्धवान् वरमुत्तमम्॥ **7.11.4** ॥ 445

यत्कृते च वयं लङ्कां त्यक्त्वा याता रसातलम्।
तद्गतं नो महाबाहो महद्विष्णुकृतं भयम्॥ **7.11.5** ॥ 446

असकृत् तद्भयाद् भग्नाः परित्यज्य स्वमालयम्।
विद्रुताः सहिताः सर्वे प्रविष्टाः स्म रसातलम्॥ **7.11.6** ॥ 447

अस्मदीया च लङ्केयं नगरी राक्षसोषिता।
निवेशिता तव भ्रात्रा धनाध्यक्षेण धीमता॥ **7.11.7** ॥ 448

यदि नामात्र शक्यं स्यात् साम्ना दानेन वानघ।
तरसा वा महाबाहो प्रत्यानेतुं कृतं भवेत्॥ **7.11.8**॥ 449

त्वं च लङ्केश्वरस्तात भविष्यसि न संशयः।
त्वया राक्षसवंशोऽयं निमग्नोऽपि समुद्धृतः॥ **7.11.9**॥ 450

सर्वेषां नः प्रभुश्चैव भविष्यसि महाबल।
अथाब्रवीद् दशग्रीवो मातामहमुपस्थितम्॥ **7.11.10**॥ 451

वित्तेशो गुरुरस्माकं नार्हसे वक्तुमीदृशम्।
साम्ना हि राक्षसेन्द्रेण प्रत्याख्यातो गरीयसा॥ **7.11.11**॥ 452

किञ्चिन्नाह तदा रक्षो ज्ञात्वा तस्य चिकीर्षितम्।
कस्यचित् त्वथ कालस्य वसन्तं रावणं ततः॥ **7.11.12**॥ 453

उक्तवन्तं तथा वाक्यं दशग्रीवं निशाचरः।
प्रहस्तः प्रश्रितं वाक्यमिदमाह सकारणम्॥ **7.11.13**॥ 454

दशग्रीव महाबाहो नार्हसे वक्तुमीदृशम्।
सौभ्रात्रं नास्ति शूराणां शृणु चेदं वचो मम॥ **7.11.14**॥ 455

अदितिश्च दितिश्चैव भगिन्यौ सहिते हि ते।
भार्ये परमरूपिण्यौ कश्यपस्य प्रजापतेः॥ **7.11.15**॥ 456

अदितिर्जनयामास देवास्त्रिभुवनेश्वरान्।
दितिस्त्वजनयद् दैत्यान् कश्यपस्यात्मसम्भवान्॥ **7.11.16**॥ 457

दैत्यानां किल धर्मज्ञ पुरेयं सवनार्णवा।
सपर्वता मही वीर तेऽभवन् प्रभविष्णवः॥ **7.11.17**॥ 458

निहत्य तांस्तु समरे विष्णुना प्रभविष्णुना।
देवानां वशमानीतं त्रैलोक्यमिदमव्ययम्॥ **7.11.18**॥ 459

नैतदेको भवानेव करिष्यति विपर्ययम्।
सुरासुरैराचरितं तत् कुरुष्व वचो मम॥ **7.11.19**॥ 460

एवमुक्तो दशग्रीवः प्रहृष्टेनान्तरात्मना।
चिन्तयित्वा मुहूर्तं वै बाढमित्येव सोऽब्रवीत्॥ **7.11.20**॥ 461

स तु तेनैव हर्षेण तस्मिन्नहनि वीर्यवान्।
वनं गतो दशग्रीवः सह तैः क्षणदाचरैः॥ **7.11.21**॥ 462

त्रिकूटस्थः स तु तदा दशग्रीवो निशाचरः।
प्रेषयामास दौत्येन प्रहस्तं वाक्यकोविदम्॥ **7.11.22**॥ 463

प्रहस्त शीघ्रं गच्छ त्वं ब्रूहि नैर्ऋतपुङ्गवम्।
वचसा मम वित्तेशं सामपूर्वमिदं वचः॥ **7.11.23**॥ 464

इयं लङ्का पुरी राजन् राक्षसानां महात्मनाम्।
त्वया निवेशिता सौम्य नैतद् युक्तं तवानघ॥ **7.11.24**॥ 465

तद् भवान् यदि नो ह्यद्य दद्यादतुलविक्रम।
कृता भवेन्मम प्रीतिर्धर्मश्चैवानुपालितः॥ **7.11.25**॥ 466

स तु गत्वा पुरीं लङ्कां धनदेन सुरक्षिताम्।
अब्रवीत् परमोदारं वित्तपालमिदं वचः॥ **7.11.26**॥ 467

प्रेषितोऽहं तव भ्रात्रा दशग्रीवेण सुव्रत।
त्वत्समीपं महाबाहो सर्वशस्त्रभृतां वर॥ **7.11.27**॥ 468

तच्छ्रूयतां महाप्राज्ञ सर्वशास्त्रविशारद।
वचनं मम वित्तेश यद् ब्रवीति दशाननः॥ **7.11.28**॥ 469

इयं किल पुरी रम्या सुमालिप्रमुखैः पुरा।
भुक्तपूर्वा विशालाक्ष राक्षसैर्भीमविक्रमैः॥ **7.11.29**॥ 470

तेन विज्ञाप्यते सोऽयं साम्प्रतं विश्रवात्मज।
तदेषा दीयतां तात याचतस्तस्य सामतः॥ **7.11.30**॥ 471

प्रहस्तादपि संश्रुत्य देवो वैश्रवणो वचः।
प्रत्युवाच प्रहस्तं तं वाक्यं वाक्यविदां वरः॥ **7.11.31**॥ 472

दत्ता ममेयं पित्रा तु लङ्का शून्या निशाचरैः।
निवेशिता च मे रक्षो दानमानादिभिर्गुणैः॥ **7.11.32**॥ 473

ब्रूहि गच्छ दशग्रीवं पुरी राज्यं च यन्मम।
तत्राप्येतन्महाबाहो भुङ्क्ष्व राज्यमकण्टकम्॥ **7.11.33**॥ 474

अविभक्तं त्वया सार्धं राज्यं यच्चापि मे वसु।
एवमुक्त्वा धनाध्यक्षो जगाम पितुरन्तिकम्॥ **7.11.34**॥ 475

अभिवाद्य गुरुं प्राह रावणस्य यदीप्सितम्।
एष तात दशग्रीवो दूतं प्रेषितवान् मम॥ **7.11.35**॥ 476

दीयतां नगरी लङ्का पूर्वं रक्षोगणोषिता।
मयात्र यदनुष्ठेयं तन्ममाचक्ष्व सुव्रत॥ **7.11.36**॥ 477

ब्रह्मर्षिस्त्वेवमुक्तोऽसौ विश्रवा मुनिपुङ्गवः।
प्राञ्जलिं धनदं प्राह शृणु पुत्र वचो मम॥ **7.11.37**॥ 478

दशग्रीवो महाबाहुरुक्तवान् मम सन्निधौ।
मया निर्भर्त्सितश्चासीद् बहुशोक्तः सुदुर्मतिः॥ **7.11.38**॥ 479

स क्रोधेन मया चोक्तो ध्वंससे च पुनः पुनः।
श्रेयोऽभियुक्तं धर्म्यं च शृणु पुत्र वचो मम॥ **7.11.39**॥ 480

वरप्रदानसम्मूढो मान्यामान्यं सुदुर्मतिः।
न वेत्ति मम शापाच्च प्रकृतिं दारुणां गतः॥ **7.11.40**॥ 481

तस्माद् गच्छ महाबाहो कैलासं धरणीधरम्।
निवेशय निवासार्थं त्यक्त्वा लङ्कां सहानुगः॥ **7.11.41**॥ 482

तत्र मन्दाकिनी रम्या नदीनामुत्तमा नदी।
काञ्चनैः सूर्यसङ्काशैः पङ्कजैः संवृतोदका॥ **7.11.42**॥ 483

कुमुदैरुत्पलैश्चैव अन्यैश्चैव सुगन्धिभिः।
तत्र देवाः सगन्धर्वाः साप्सरोरगकिन्नराः॥ **7.11.43**॥ 484

विहारशीलाः सततं रमन्ते सर्वदाश्रिताः।
नहि क्षमं तवानेन वैरं धनद रक्षसा॥ **7.11.44**॥ 485

जानीषे हि यथानेन लब्धः परमको वरः॥ **7.11.45**॥ 486

एवमुक्तो गृहीत्वा तु तद्वचः पितृगौरवात्।
सदारपुत्रः सामात्यः सवाहनधनो गतः॥ **7.11.46**॥ 487

प्रहस्तोऽथ दशग्रीवं गत्वा वचनमब्रवीत्।
प्रहृष्टात्मा महात्मानं सहामात्यं सहानुजम्॥ **7.11.47**॥ 488

शून्या सा नगरी लङ्का त्यक्त्वैनां धनदो गतः।
प्रविश्य तां सहास्माभिः स्वधर्मं तत्र पालय॥ **7.11.48**॥ 489

एवमुक्तो दशग्रीवः प्रहस्तेन महाबलः।
विवेश नगरीं लङ्कां भ्रातृभिः सबलानुगैः॥ **7.11.49**॥ 490

धनदेन परित्यक्तां सुविभक्तमहापथाम्।
आरुरोह स देवारिः स्वर्गं देवाधिपो यथा॥ **7.11.50**॥ 491

स चाभिषिक्तः क्षणदाचरैस्तदा
निवेशयामास पुरीं दशाननः।

निकामपूर्णा च बभूव सा पुरी
निशाचरैर्नीलबलाहकोपमैः ॥ **7.11.51** ॥ 492

धनेश्वरस्त्वथ पितृवाक्यगौरवा -
न्न्यवेशयच्छशिविमले गिरौ पुरीम्।
स्वलङ्कृतैर्भवनवरैर्विभूषितां
पुरन्दरः स्वरिव यथामरावतीम् ॥ **7.11.52** ॥ 493

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकादशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वादशः सर्गः ॥

शूर्पणखाया विवाहो रावणादीनां च परिणयो मेघनादस्य जन्म च

राक्षसेन्द्रोऽभिषिक्तस्तु भ्रातृभिः सहितस्तदा।
ततः प्रदानं राक्षस्या भगिन्याः समचिन्तयत्॥ **7.12.1**॥ 494

स्वसारं कालकेयाय दानवेन्द्राय राक्षसीम्।
ददौ शूर्पणखां नाम विद्युज्जिह्वाय राक्षसः॥ **7.12.2**॥ 495

अथ दत्त्वा स्वयं रक्षो मृगयामटते स्म तत्।
तत्रापश्यत् ततो राम मयं नाम दितेः सुतम्॥ **7.12.3**॥ 496

कन्यासहायं तं दृष्ट्वा दशग्रीवो निशाचरः।
अपृच्छत् को भवानेको निर्मनुष्यमृगे वने॥ **7.12.4**॥ 497

अनया मृगशावाक्ष्या किमर्थं सह तिष्ठसि।
मयस्तदाब्रवीद् राम पृच्छन्तं तं निशाचरम्॥ **7.12.5**॥ 498

श्रूयतां सर्वमाख्यास्ये यथावृत्तमिदं तव।
हेमा नामाप्सरास्तात श्रुतपूर्वा यदि त्वया॥ **7.12.6**॥ 499

दैवतैर्मम सा दत्ता पौलोमीव शतक्रतोः।
तस्यां सक्तमना ह्यासं दशवर्षशतान्यहम्॥ **7.12.7**॥ 500

सा च दैवतकार्येण गता वर्षाश्चतुर्दश।
तस्याः कृते च हेमायाः सर्वं हेममयं पुरम्॥ **7.12.8**॥ 501

वज्रवैदूर्यचित्रं च मायया निर्मितं मया।
तत्राहमवसं दीनस्तया हीनः सुदुःखितः॥ **7.12.9**॥ 502

तस्मात् पुराद् दुहितरं गृहीत्वा वनमागतः।
इयं ममात्मजा राजंस्तस्याः कुक्षौ विवर्धिता॥ **7.12.10**॥ 503

भर्तारमनया सार्धमस्याः प्राप्तोऽस्मि मार्गितुम्।
कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम्॥ **7.12.11**॥ 504

कन्या हि द्वे कुले नित्यं संशये स्थाप्य तिष्ठति।
पुत्रद्वयं ममाप्यस्यां भार्यायां सम्बभूव ह॥ **7.12.12**॥ 505

मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः।
एवं ते सर्वमाख्यातं याथातथ्येन पृच्छतः॥ **7.12.13**॥ 506

त्वामिदानीं कथं तात जानीयां को भवानिति।
एवमुक्तं तु तद् रक्षो विनीतमिदमब्रवीत्॥ **7.12.14**॥ 507

अहं पौलस्त्यतनयो दशग्रीवश्च नामतः।
मुनेर्विश्रवसो यस्तु तृतीयो ब्रह्मणोऽभवत्॥ **7.12.15**॥ 508

एवमुक्तस्तदा राम राक्षसेन्द्रेण दानवः।
महर्षेस्तनयं ज्ञात्वा मयो हर्षमुपागतः॥ **7.12.16**॥ 509

दातुं दुहितरं तस्मै रोचयामास तत्र वै।
करेण तु करं तस्या ग्राहयित्वा मयस्तदा॥ **7.12.17**॥ 510

प्रहसन् प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः।
इयं ममात्मजा राजन् हेमयाप्सरसा धृता॥ **7.12.18**॥ 511

कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम्।
बाढमित्येव तं राम दशग्रीवोऽभ्यभाषत॥ **7.12.19**॥ 512

प्रज्वाल्य तत्र चैवाग्निमकरोत् पाणिसङ्ग्रहम्।
स हि तस्य मयो राम शापाभिज्ञस्तपोधनात्॥ **7.12.20**॥ 513

विदित्वा तेन सा दत्ता तस्य पैतामहं कुलम्।
अमोघां तस्य शक्तिं च प्रददौ परमाद्भुताम्॥ **7.12.21**॥ 514

परेण तपसा लब्धां जघ्निवान् लक्ष्मणं यया।
एवं स कृत्वा दारान् वै लङ्काया ईश्वरः प्रभुः॥ **7.12.22**॥ 515

गत्वा तु नगरीं भार्ये भ्रातृभ्यां समुपाहरत्।
वैरोचनस्य दौहित्रीं वज्रज्वालेति नामतः॥ **7.12.23**॥ 516

तां भार्यां कुम्भकर्णस्य रावणः समकल्पयत्।
गन्धर्वराजस्य सुतां शैलूषस्य महात्मनः॥ **7.12.24**॥ 517

सरमां नाम धर्मज्ञां लेभे भार्यां विभीषणः।
तीरे तु सरसो वै तु सञ्जज्ञे मानसस्य हि॥ **7.12.25**॥ 518

सरस्तदा मानसं तु ववृधे जलदागमे।
मात्रा तु तस्याः कन्यायाः स्नेहेनाक्रन्दितं वचः॥ **7.12.26**॥ 519

सरो मा वर्धयस्वेति ततः सा सरमाभवत्।
एवं ते कृतदारा वै रेमिरे तत्र राक्षसाः॥ **7.12.27**॥ 520

स्वां स्वां भार्यामुपादाय गन्धर्वा इव नन्दने।
ततो मन्दोदरी पुत्रं मेघनादमजीजनत्॥ **7.12.28**॥ 521

स एष इन्द्रजिन्नाम युष्माभिरभिधीयते।
जातमात्रेण हि पुरा तेन रावणसूनुना॥ **7.12.29**॥ 522

रुदता सुमहान् मुक्तो नादो जलधरोपमः।
जडीकृता च सा लङ्का तस्य नादेन राघव॥ **7.12.30**॥ 523

पिता तस्याकरोन्नाम मेघनाद इति स्वयम्।
सोऽवर्धत तदा राम रावणान्तःपुरे शुभे॥ **7.12.31**॥ 524

रक्ष्यमाणो वरस्त्रीभिश्छन्नः काष्ठैरिवानलः।
मातापित्रोर्महाहर्षं जनयन् रावणात्मजः॥ **7.12.32**॥ 525

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोदशः सर्गः ॥

रावणेन निर्मापिते शयनागारे कुम्भकर्णस्य शयनं रावणस्यात्याचारः कुबेरेण दूतं प्रेष्य तस्य प्रबोधनं क्रुद्धेन रावणेन दूतस्य वधश्च

अथ लोकेश्वरोत्सृष्टा तत्र कालेन केनचित्।
निद्रा समभवत् तीव्रा कुम्भकर्णस्य रूपिणी॥ **7.13.1**॥ 526

ततो भ्रातरमासीनं कुम्भकर्णोऽब्रवीद् वचः।
निद्रा मां बाधते राजन् कारयस्व ममालयम्॥ **7.13.2**॥ 527

विनियुक्तास्ततो राज्ञा शिल्पिनो विश्वकर्मवत्।
विस्तीर्णं योजनं स्निग्धं ततो द्विगुणमायतम्॥ **7.13.3**॥ 528

दर्शनीयं निराबाधं कुम्भकर्णस्य चक्रिरे।
स्फाटिकैः काञ्चनैश्चित्रैः स्तम्भैः सर्वत्र शोभितम्॥ **7.13.4**॥ 529

वैदूर्यकृतसोपानं किङ्किणीजालकं तथा।
दान्ततोरणविन्यस्तं वज्रस्फटिकवेदिकम्॥ **7.13.5**॥ 530

मनोहरं सर्वसुखं कारयामास राक्षसः।
सर्वत्र सुखदं नित्यं मेरोः पुण्यां गुहामिव॥ **7.13.6**॥ 531

तत्र निद्रां समाविष्टः कुम्भकर्णो महाबलः।
बहून्यब्दसहस्राणि शयानो न च बुध्यते॥ **7.13.7**॥ 532

निद्राभिभूते तु तदा कुम्भकर्णे दशाननः।
देवर्षियक्षगन्धर्वान् सञ्जघ्ने हि निरङ्कुशः॥ **7.13.8**॥ 533

उद्यानानि विचित्राणि नन्दनादीनि यानि च।
तानि गत्वा सुसङ्क्रुद्धो भिनत्ति स्म दशाननः॥ **7.13.9**॥ 534

नदीं गज इव क्रीडन् वृक्षान् वायुरिव क्षिपन्।
नगान् वज्र इवोत्सृष्टो विध्वंसयति राक्षसः॥ **7.13.10**॥ 535

तथावृत्तं तु विज्ञाय दशग्रीवं धनेश्वरः।
कुलानुरूपं धर्मज्ञो वृत्तं संस्मृत्य चात्मनः॥ **7.13.11**॥ 536

सौभ्रात्रदर्शनार्थं तु दूतं वैश्रवणस्तदा।
लङ्कां सम्प्रेषयामास दशग्रीवस्य वै हितम्॥ **7.13.12**॥ 537

स गत्वा नगरीं लङ्कामाससाद विभीषणम्।
मानितस्तेन धर्मेण पृष्टश्चागमनं प्रति॥ **7.13.13**॥ 538

पृष्ट्वा च कुशलं राज्ञो ज्ञातीनां च विभीषणः।
सभायां दर्शयामास तमासीनं दशाननम्॥ **7.13.14**॥ 539

स दृष्ट्वा तत्र राजानं दीप्यमानं स्वतेजसा।
जयेति वाचा सम्पूज्य तूष्णीं समभिवर्तत॥ **7.13.15**॥ 540

स तत्रोत्तमपर्यङ्के वरास्तरणशोभिते।
उपविष्टं दशग्रीवं दूतो वाक्यमथाब्रवीत्॥ **7.13.16**॥ 541

राजन् वदामि ते सर्वं भ्राता तव यदब्रवीत्।
उभयोः सदृशं वीर वृत्तस्य च कुलस्य च॥ **7.13.17**॥ 542

साधु पर्याप्तमेतावत् कृत्यश्चारित्रसङ्ग्रहः।
साधु धर्मे व्यवस्थानं क्रियतां यदि शक्यते॥ **7.13.18**॥ 543

दृष्टं मे नन्दनं भग्नमृषयो निहताः श्रुताः।
देवतानां समुद्योगस्त्वत्तो राजन् मया श्रुतः॥ **7.13.19**॥ 544

निराकृतश्च बहुशस्त्वयाहं राक्षसाधिप।
सापराधोऽपि बालो हि रक्षितव्यः स्वबान्धवैः॥ **7.13.20**॥ 545

अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम्।
रौद्रं व्रतं समास्थाय नियतो नियतेन्द्रियः॥ **7.13.21**॥ 546

तत्र देवो मया दृष्ट उमया सहितः प्रभुः।
सव्यं चक्षुर्मया दैवात् तत्र देव्यां निपातितम्॥ **7.13.22**॥ 547

का न्वेषेति महाराज न खल्वन्येन हेतुना।
रूपं चानुपमं कृत्वा रुद्राणी तत्र तिष्ठति॥ **7.13.23**॥ 548

देव्या दिव्यप्रभावेण दग्धं सव्यं ममेक्षणम्।
रेणुध्वस्तामिव ज्योतिः पिङ्गलत्वमुपागतम्॥ **7.13.24**॥ 549

ततोऽहमन्यद् विस्तीर्णं गत्वा तस्य गिरेस्तटम्।
तूष्णीं वर्षशतान्यष्टौ समधारं महाव्रतम्॥ **7.13.25**॥ 550

समाप्ते नियमे तस्मिंस्तत्र देवो महेश्वरः।
ततः प्रीतेन मनसा प्राह वाक्यमिदं प्रभुः॥ **7.13.26**॥ 551

प्रीतोऽस्मि तव धर्मज्ञ तपसानेन सुव्रत।
मया चैतद् व्रतं चीर्णं त्वया चैव धनाधिप॥ **7.13.27**॥ 552

तृतीयः पुरुषो नास्ति यश्चरेद् व्रतमीदृशम्।
व्रतं सुदुष्करं ह्येतन्मयैवोत्पादितं पुरा॥ **7.13.28**॥ 553

तत्सखित्वं मया सौम्य रोचयस्व धनेश्वर।
तपसा निर्जितश्चैव सखा भव ममानघ॥ **7.13.29**॥ 554

देव्या दग्धं प्रभावेण यच्च सव्यं तवेक्षणम्।
पैङ्गल्यं यदवाप्तं हि देव्या रूपनिरीक्षणात्॥ **7.13.30**॥ 555

एकाक्षपिङ्गलीत्येव नाम स्थास्यति शाश्वतम्।
एवं तेन सखित्वं च प्राप्यानुज्ञां च शङ्करात्॥ **7.13.31**॥ 556

आगतेन मया चैवं श्रुतस्ते पापनिश्चयः।
तदधर्मिष्ठसंयोगान्निवर्त कुलदूषणात्॥ **7.13.32**॥ 557

चिन्त्यते हि वधोपायः सर्षिसङ्घैः सुरैस्तव।
एवमुक्तो दशग्रीवः कोपसंरक्तलोचनः॥ **7.13.33**॥ 558

हस्तान् दन्तांश्च सम्पिष्य वाक्यमेतदुवाच ह।
विज्ञातं ते मया दूत वाक्यं यत् त्वं प्रभाषसे॥ **7.13.34**॥ 559

नैव त्वमसि नैवासौ भ्रात्रा येनासि चोदितः।
हितं नैष ममैतद्धि ब्रवीति धनरक्षकः॥ **7.13.35**॥ 560

महेश्वरसखित्वं तु मूढः श्रावयते किल।
नैवेदं क्षमणीयं मे यदेतद् भाषितं त्वया॥ **7.13.36**॥ 561

यदेतावन्मया कालं दूत तस्य तु मर्षितम्।
न हन्तव्यो गुरुज्येष्ठो मयायमिति मन्यते॥ **7.13.37**॥ 562

तस्य त्विदानीं श्रुत्वा मे वाक्यमेषा कृता मतिः।
त्रीन् लोकानपि जेष्यामि बाहुवीर्यमुपाश्रितः॥ **7.13.38**॥ 563

एतन्मुहूर्तमेवाहं तस्यैकस्य तु वै कृते।
चतुरो लोकपालांस्तान् नयिष्यामि यमक्षयम्॥ **7.13.39**॥ 564

एवमुक्त्वा तु लङ्केशो दूतं खड्गेन जघ्निवान्।
ददौ भक्षयितुं ह्येनं राक्षसानां दुरात्मनाम्॥ **7.13.40**॥ 565

ततः कृतस्वस्त्ययनो रथमारुह्य रावणः।
त्रैलोक्यविजयाकाङ्क्षी ययौ यत्र धनेश्वरः॥ **7.13.41**॥ 566

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रयोदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्दशः सर्गः ॥

मन्त्रिभिः सहितस्य रावणस्य यक्षाणामुपर्याक्रमणं तेषां पराजयश्च

ततः स सचिवैः सार्धं षड्भिर्नित्यबलोद्धतः।
महोदरप्रहस्ताभ्यां मारीचशुकसारणैः॥ **7.14.1** ॥ 567

धूम्राक्षेण च वीरेण नित्यं समरगर्द्धिना।
वृतः सम्प्रययौ श्रीमान् क्रोधाल्लोकान् दहन्निव॥ **7.14.2** ॥ 568

पुराणि स नदीः शैलान् वनान्युपवनानि च।
अतिक्रम्य मुहूर्तेन कैलासं गिरिमागमत्॥ **7.14.3** ॥ 569

सन्निविष्टं गिरौ तस्मिन् राक्षसेन्द्रं निशम्य तु।
युद्धेप्सुं तं कृतोत्साहं दुरात्मानं समन्त्रिणम्॥ **7.14.4** ॥ 570

यक्षा न शेकुः संस्थातुं प्रमुखे तस्य रक्षसः।
राज्ञो भ्रातेति विज्ञाय गता यत्र धनेश्वरः॥ **7.14.5** ॥ 571

ते गत्वा सर्वमाचख्युर्भ्रातुस्तस्य चिकीर्षितम्।
अनुज्ञाता ययुर्हृष्टा युद्धाय धनदेन ते॥ **7.14.6** ॥ 572

ततो बलानां सङ्क्षोभो व्यवर्धत इवोदधेः।
तस्य नैर्ऋतराजस्य शैलं सञ्चालयन्निव॥ **7.14.7** ॥ 573

ततो युद्धं समभवद् यक्षराक्षससङ्कुलम्।
व्यथिताश्चाभवंस्तत्र सचिवा राक्षसस्य ते॥ **7.14.8**॥ 574

स दृष्ट्वा तादृशं सैन्यं दशग्रीवो निशाचरः।
हर्षनादान् बहून् कृत्वा स क्रोधादभ्यधावत॥ **7.14.9**॥ 575

ये तु ते राक्षसेन्द्रस्य सचिवा घोरविक्रमाः।
तेषां सहस्रमेकैको यक्षाणां समयोधयत्॥ **7.14.10**॥ 576

ततो गदाभिर्मुसलैरसिभिः शक्तितोमरैः।
हन्यमानो दशग्रीवस्तत्सैन्यं समगाहत॥ **7.14.11**॥ 577

स निरुच्छ्वासवत् तत्र वध्यमानो दशाननः।
वर्षद्भिरिव जीमूतैर्धाराभिरवरुध्यत॥ **7.14.12**॥ 578

न चकार व्यथां चैव यक्षशस्त्रैः समाहतः।
महीधर इवाम्भोदैर्धाराशतसमुक्षितः॥ **7.14.13**॥ 579

स महात्मा समुद्यम्य कालदण्डोपमां गदाम्।
प्रविवेश ततः सैन्यं नयन् यक्षान् यमक्षयम्॥ **7.14.14**॥ 580

स कक्षमिव विस्तीर्णं शुष्केन्धनमिवाकुलम्।
वातेनाग्निरिवादीप्तो यक्षसैन्यं ददाह तत्॥ **7.14.15**॥ 581

तैस्तु तत्र महामात्यैर्महोदरशुकादिभिः।
अल्पावशेषास्ते यक्षाः कृता वातैरिवाम्बुदाः॥ **7.14.16**॥ 582

केचित् समाहता भग्नाः पतिताः समरे क्षितौ।
ओष्ठांश्च दशनैस्तीक्ष्णैरदशन् कुपिता रणे॥ **7.14.17**॥ 583

श्रान्ताश्चान्योन्यमालिङ्ग्य भ्रष्टशस्त्रा रणाजिरे।
सीदन्ति च तदा यक्षाः कूला इव जलेन ह॥ **7.14.18**॥ 584

हतानां गच्छतां स्वर्गं युध्यतामथ धावताम्।
प्रेक्षतामृषिसङ्घानां न बभूवान्तरं दिवि॥ **7.14.19**॥ 585

भग्नांस्तु तान् समालक्ष्य यक्षेन्द्रांस्तु महाबलान्।
धनाध्यक्षो महाबाहुः प्रेषयामास यक्षकान्॥ **7.14.20**॥ 586

एतस्मिन्नन्तरे राम विस्तीर्णबलवाहनः।
प्रेषितो न्यपतद् यक्षो नाम्ना संयोधकण्टकः॥ **7.14.21**॥ 587

तेन चक्रेण मारीचो विष्णुनेव रणे हतः।
पतितो भूतले शैलात् क्षीणपुण्य इव ग्रहः॥ **7.14.22**॥ 588

ससंज्ञस्तु मुहूर्तेन स विश्रम्य निशाचरः।
तं यक्षं योधयामास स च भग्नः प्रदुद्रुवे॥ **7.14.23**॥ 589

ततः काञ्चनचित्राङ्गं वैदूर्यरजतोक्षितम्।
मर्यादां प्रतिहाराणां तोरणान्तरमाविशत्॥ **7.14.24**॥ 590

तं तु राजन् दशग्रीवं प्रविशन्तं निशाचरम्।
सूर्यभानुरिति ख्यातो द्वारपालो न्यवारयत्॥ **7.14.25**॥ 591

स वार्यमाणो यक्षेण प्रविवेश निशाचरः।
यदा तु वारितो राम न व्यतिष्ठत् स राक्षसः॥ **7.14.26**॥ 592

ततस्तोरणमुत्पाट्य तेन यक्षेण ताडितः।
रुधिरं प्रस्रवन् भाति शैलो धातुस्रवैरिव॥ **7.14.27**॥ 593

स शैलशिखराभेण तोरणेन समाहतः।
जगाम न क्षतिं वीरो वरदानात् स्वयम्भुवः॥ **7.14.28**॥ 594

तेनैव तोरणेनाथ यक्षस्तेनाभिताडितः।
नादृश्यत तदा यक्षो भस्मीकृततनुस्तदा॥ **7.14.29**॥ 595

ततः प्रदुद्रुवुः सर्वे दृष्ट्वा रक्षःपराक्रमम्।
ततो नदीर्गुहाश्चैव विविशुर्भयपीडिताः।
त्यक्तप्रहरणाः श्रान्ता विवर्णवदनास्तदा॥ **7.14.30**॥ 596

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्दशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चदशः सर्गः ॥

माणिभद्रकुबेरयोः पराजयो रावणेन पुष्पकस्यापहरणं च

ततस्तान् लक्ष्य वित्रस्तान् यक्षेन्द्रांश्च सहस्रशः।
धनाध्यक्षो महायक्षं माणिभद्रमथाब्रवीत्॥ **7.15.1** ॥ 597

रावणं जहि यक्षेन्द्र दुर्वृत्तं पापचेतसम्।
शरणं भव वीराणां यक्षाणां युद्धशालिनाम्॥ **7.15.2** ॥ 598

एवमुक्तो महाबाहुर्माणिभद्रः सुदुर्जयः।
वृतो यक्षसहस्रैस्तु चतुर्भिः समयोधयत्॥ **7.15.3** ॥ 599

ते गदामुसलप्रासैः शक्तितोमरमुद्गरैः।
अभिघ्नन्तस्तदा यक्षा राक्षसान् समुपाद्रवन्॥ **7.15.4** ॥ 600

कुर्वन्तस्तुमुलं युद्धं चरन्तः श्येनवल्लघु।
बाढं प्रयच्छ नेच्छामि दीयतामिति भाषिणः॥ **7.15.5** ॥ 601

ततो देवाः सगन्धर्वा ऋषयो ब्रह्मवादिनः।
दृष्ट्वा तत् तुमुलं युद्धं परं विस्मयमागमन्॥ **7.15.6** ॥ 602

यक्षाणां तु प्रहस्तेन सहस्रं निहतं रणे।
महोदरेण चानिन्द्यं सहस्रमपरं हतम्॥ **7.15.7** ॥ 603

क्रुद्धेन च तदा राजन् मारीचेन युयुत्सुना।
निमेषान्तरमात्रेण द्वे सहस्रे निपातिते॥ **7.15.8**॥ 604

क्व च यक्षार्जवं युद्धं क्व च मायाबलाश्रयम्।
रक्षसां पुरुषव्याघ्र तेन तेऽभ्यधिका युधि॥ **7.15.9**॥ 605

धूम्राक्षेण समागम्य माणिभद्रो महारणे।
मुसलेनोरसि क्रोधात् ताडितो न च कम्पितः॥ **7.15.10**॥ 606

ततो गदां समाविध्य माणिभद्रेण राक्षसः।
धूम्राक्षस्ताडितो मूर्ध्नि विह्वलः स पपात ह॥ **7.15.11**॥ 607

धूम्राक्षं ताडितं दृष्ट्वा पतितं शोणितोक्षितम्।
अभ्यधावत सङ्ग्रामे माणिभद्रं दशाननः॥ **7.15.12**॥ 608

सङ्क्रुद्धमभिधावन्तं माणिभद्रो दशाननम्।
शक्तिभिस्ताडयामास तिसृभिर्यक्षपुङ्गवः॥ **7.15.13**॥ 609

ताडितो माणिभद्रस्य मुकुटे प्राहरद् रणे।
तस्य तेन प्रहारेण मुकुटं पार्श्वमागतम्॥ **7.15.14**॥ 610

ततःप्रभृति यक्षोऽसौ पार्श्वमौलिरभूत् किल।
तस्मिंस्तु विमुखीभूते माणिभद्रे महात्मनि।
सन्नादः सुमहान् राजंस्तस्मिन् शैले व्यवर्धत॥ **7.15.15**॥ 611

ततो दूरात् प्रददृशे धनाध्यक्षो गदाधरः।
शुक्रप्रौष्ठपदाभ्यां च पद्मशङ्खसमावृतः॥ **7.15.16**॥ 612

स दृष्ट्वा भ्रातरं सङ्ख्ये शापाद् विभ्रष्टगौरवम्।
उवाच वचनं धीमान् युक्तं पैतामहे कुले॥ **7.15.17**॥ 613

यन्मया वार्यमाणस्त्वं नावगच्छसि दुर्मते।
पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः॥ **7.15.18**॥ 614

यो हि मोहाद् विषं पीत्वा नावगच्छति दुर्मतिः।
स तस्य परिणामान्ते जानीते कर्मणः फलम्॥ **7.15.19**॥ 615

दैवतानि न नन्दन्ति धर्मयुक्तेन केनचित्।
येन त्वमीदृशं भावं नीतस्तच्च न बुद्ध्यसे॥ **7.15.20**॥ 616

मातरं पितरं विप्रमाचार्यं चावमन्यते।
स पश्यति फलं तस्य प्रेतराजवशं गतः॥ **7.15.21**॥ 617

अध्रुवे हि शरीरे यो न करोति तपोऽर्जनम्।
स पश्चात् तप्यते मूढो मृतो गत्वाऽऽत्मनो गतिम्॥ **7.15.22**॥ 618

धर्माद् राज्यं धनं सौख्यमधर्माद् दुःखमेव च।
तस्माद् धर्मं सुखार्थाय कुर्यात् पापं विसर्जयेत्॥ **7.15.23**॥ 619

पापस्य हि फलं दुःखं तद् भोक्तव्यमिहात्मना।
तस्मादात्मापघातार्थं मूढः पापं करिष्यति॥ **7.15.24**॥ 620

कस्यचिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः।
यादृशं कुरुते कर्म तादृशं फलमश्नुते॥ **7.15.25**॥ 621

ऋद्धिं रूपं बलं पुत्रान् वित्तं शूरत्वमेव च।
प्राप्नुवन्ति नरा लोके निर्जितं पुण्यकर्मभिः॥ **7.15.26**॥ 622

एवं निरयगामी त्वं यस्य ते मतिरीदृशी।
न त्वां समभिभाषिष्येऽसद्वृत्तेष्वेव निर्णयः॥ **7.15.27**॥ 623

एवमुक्तास्ततस्तेन तस्यामात्याः समाहताः।
मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः॥ **7.15.28**॥ 624

ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना।
गदयाभिहतो मूर्ध्नि न च स्थानात् प्रकम्पितः॥ **7.15.29**॥ 625

ततस्तौ राम निघ्नन्तौ तदान्योन्यं महामृधे।
न विह्वलौ न च श्रान्तौ तावुभौ यक्षराक्षसौ॥ **7.15.30**॥ 626

आग्नेयमस्त्रं तस्मै स मुमोच धनदस्तदा।
राक्षसेन्द्रो वारुणेन तदस्त्रं प्रत्यवारयत्॥ **7.15.31**॥ 627

ततो मायां प्रविष्टोऽसौ राक्षसीं राक्षसेश्वरः।
रूपाणां शतसाहस्रं विनाशाय चकार च॥ **7.15.32**॥ 628

व्याघ्रो वराहो जीमूतः पर्वतः सागरो द्रुमः।
यक्षो दैत्यस्वरूपी च सोऽदृश्यत दशाननः॥ **7.15.33**॥ 629

बहूनि च करोति स्म दृश्यन्ते न त्वसौ ततः।
प्रतिगृह्य ततो राम महदस्त्रं दशाननः॥ **7.15.34**॥ 630

जघान मूर्ध्नि धनदं व्याविद्ध्य महतीं गदाम्।
एवं स तेनाभिहतो विह्वलः शोणितोक्षितः॥ **7.15.35**॥ 631

कृत्तमूल इवाशोको निपपात धनाधिपः।
ततः पद्मादिभिस्तत्र निधिभिः स तदा वृतः॥ **7.15.36**॥ 632

धनदोच्छ्वासितस्तैस्तु वनमानीय नन्दनम्।
निर्जित्य राक्षसेन्द्रस्तं धनदं हृष्टमानसः॥ **7.15.37**॥ 633

पुष्पकं तस्य जग्राह विमानं जयलक्षणम्।
काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम्॥ **7.15.38**॥ 634

मुक्ताजालप्रतिच्छन्नं सर्वकालफलद्रुमम्।
मनोजवं कामगमं कामरूपं विहङ्गमम्॥ **7.15.39**॥ 635

मणिकाञ्चनसोपानं तप्तकाञ्चनवेदिकम्।
देवोपवाह्यमक्षय्यं सदा दृष्टिमनःसुखम्॥ **7.15.40**॥ 636

बह्वाश्चर्यं भक्तिचित्रं ब्रह्मणा परिनिर्मितम्।
निर्मितं सर्वकामैस्तु मनोहरमनुत्तमम्॥ **7.15.41**॥ 637

न तु शीतं न चोष्णं च सर्वर्तुसुखदं शुभम्।
स तं राजा समारुह्य कामगं वीर्यनिर्जितम्॥ **7.15.42**॥ 638

जितं त्रिभुवनं मेने दर्पोत्सेकात् सुदुर्मतिः।
जित्वा वैश्रवणं देवं कैलासात् समवातरत्॥ **7.15.43**॥ 639

स तेजसा विपुलमवाप्य तं जयं
प्रतापवान् विमलकिरीटहारवान्।
रराज वै परमविमानमास्थितो
निशाचरः सदसि गतो यथानलः॥ **7.15.44**॥ 640

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षोडशः सर्गः ॥

नन्दीश्वरस्य रावणं प्रति शापः, भगवता शङ्करेण रावणस्य मानभङ्गस्ततस्तस्य खड्गप्राप्तिश्च

स जित्वा धनदं राम भ्रातरं राक्षसाधिपः।
महासेनप्रसूतिं तद् ययौ शरवणं महत्॥ **7.16.1**॥ 641

अथापश्यद् दशग्रीवो रौक्मं शरवणं महत्।
गभस्तिजालसंवीतं द्वितीयमिव भास्करम्॥ **7.16.2**॥ 642

स पर्वतं समारुह्य कञ्चिद् रम्यवनान्तरम्।
प्रेक्षते पुष्पकं तत्र राम विष्टम्भितं तदा॥ **7.16.3**॥ 643

विष्टब्धं किमिदं कस्मान्नागमत् कामगं कृतम्।
अचिन्तयद् राक्षसेन्द्रः सचिवैस्तैः समावृतः॥ **7.16.4**॥ 644

किन्निमित्तमिच्छया मे नेदं गच्छति पुष्पकम्।
पर्वतस्योपरिष्ठस्य कर्मेदं कस्यचिद् भवेत्॥ **7.16.5**॥ 645

ततोऽब्रवीत् तदा राम मारीचो बुद्धिकोविदः।
नेदं निष्कारणं राजन् पुष्पकं यन्न गच्छति॥ **7.16.6**॥ 646

अथवा पुष्पकमिदं धनदान्नान्यवाहनम्।
अतो निस्पन्दमभवद् धनाध्यक्षविनाकृतम्॥ **7.16.7**॥ 647

इति वाक्यान्तरे तस्य करालः कृष्णपिङ्गलः।
वामनो विकटो मुण्डी नन्दी ह्रस्वभुजो बली॥ **7.16.8**॥ 648

ततः पार्श्वमुपागम्य भवस्यानुचरोऽब्रवीत्।
नन्दीश्वरो वचश्चेदं राक्षसेन्द्रमशङ्कितः॥ **7.16.9**॥ 649

निवर्तस्व दशग्रीव शैले क्रीडति शङ्करः।
सुपर्णनागयक्षाणां देवगन्धर्वरक्षसाम्॥ **7.16.10**॥ 650

सर्वेषामेव भूतानामगम्यः पर्वतः कृतः।
इति नन्दिवचः श्रुत्वा क्रोधात् कम्पितकुण्डलः॥ **7.16.11**॥ 651

रोषात् तु ताम्रनयनः पुष्पकादवरुह्य सः।
कोऽयं शङ्कर इत्युक्त्वा शैलमूलमुपागतः॥ **7.16.12**॥ 652

सोऽपश्यन्नन्दिनं तत्र देवस्यादूरतः स्थितम्।
दीप्तं शूलमवष्टभ्य द्वितीयमिव शङ्करम्॥ **7.16.13**॥ 653

तं दृष्ट्वा वानरमुखमवज्ञाय स राक्षसः।
प्रहासं मुमुचे तत्र सतोय इव तोयदः॥ **7.16.14**॥ 654

तं क्रुद्धो भगवान् नन्दी शङ्करस्यापरा तनुः।
अब्रवीत् तत्र तद् रक्षो दशाननमुपस्थितम्॥ **7.16.15**॥ 655

यस्माद् वानररूपं मामवज्ञाय दशानन।
अशनीपातसङ्काशमपहासं प्रमुक्तवान्॥ **7.16.16**॥ 656

तस्मान्मद्वीर्यसंयुक्ता मद्रूपसमतेजसः।
उत्पत्स्यन्ति वधार्थं हि कुलस्य तव वानराः॥ **7.16.17**॥ 657

नखदंष्ट्रायुधाः क्रूरा मनःसम्पातरंहसः।
युद्धोन्मत्ता बलोद्रिक्ताः शैला इव विसर्पिणः॥ **7.16.18**॥ 658

ते तव प्रबलं दर्पमुत्सेधं च पृथग्विधम्।
व्यपनेष्यन्ति सम्भूय सहामात्यसुतस्य च॥ **7.16.19**॥ 659

किं त्विदानीं मया शक्यं हन्तुं त्वां हे निशाचर।
न हन्तव्यो हतस्त्वं हि पूर्वमेव स्वकर्मभिः॥ **7.16.20**॥ 660

इत्युदीरितवाक्ये तु देवे तस्मिन् महात्मनि।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता॥ **7.16.21**॥ 661

अचिन्तयित्वा स तदा नन्दिवाक्यं महाबलः।
पर्वतं तु समासाद्य वाक्यमाह दशाननः॥ **7.16.22**॥ 662

पुष्पकस्य गतिश्छिन्ना यत्कृते मम गच्छतः।
तमिमं शैलमुन्मूलं करोमि तव गोपते॥ **7.16.23**॥ 663

केन प्रभावेण भवो नित्यं क्रीडति राजवत्।
विज्ञातव्यं न जानीते भयस्थानमुपस्थितम्॥ **7.16.24**॥ 664

एवमुक्त्वा ततो राम भुजान् विक्षिप्य पर्वते।
तोलयामास तं शीघ्रं स शैलः समकम्पत॥ **7.16.25**॥ 665

चालनात् पर्वतस्यैव गणा देवस्य कम्पिताः।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम्॥ **7.16.26**॥ 666

ततो राम महादेवो देवानां प्रवरो हरः।
पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया॥ **7.16.27**॥ 667

पीडितास्तु ततस्तस्य शैलस्तम्भोपमा भुजाः।
विस्मिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः॥ **7.16.28**॥ 668

रक्षसा तेन रोषाच्च भुजानां पीडनात् तथा।
मुक्तो विरावः सहसा त्रैलोक्यं येन कम्पितम्॥ **7.16.29**॥ 669

मेनिरे वज्रनिष्पेषं तस्यामात्या युगक्षये।
तदा वर्त्मसु चलिता देवा इन्द्रपुरोगमाः॥ **7.16.30**॥ 670

समुद्राश्चापि सङ्क्षुब्धाश्चलिताश्चापि पर्वताः।
यक्षा विद्याधराः सिद्धाः किमेतदिति चाब्रुवन्॥ **7.16.31**॥ 671

तोषयस्व महादेवं नीलकण्ठमुमापतिम्।
तमृते शरणं नान्यं पश्यामोऽत्र दशानन॥ **7.16.32**॥ 672

स्तुतिभिः प्रणतो भूत्वा तमेव शरणं व्रज।
कृपालुः शङ्करस्तुष्टः प्रसादं ते विधास्यति॥ **7.16.33**॥ 673

एवमुक्तस्तदामात्यैस्तुष्टाव वृषभध्वजम्।
सामभिर्विविधैः स्तोत्रैः प्रणम्य स दशाननः।
संवत्सरसहस्रं तु रुदतो रक्षसो गतम्॥ **7.16.34**॥ 674

ततः प्रीतो महादेवः शैलाग्रे विष्ठितः प्रभुः।
मुक्त्वा चास्य भुजान् राम प्राह वाक्यं दशाननम्॥ **7.16.35**॥ 675

प्रीतोऽस्मि तव वीरस्य शौटीर्याच्च दशानन।
शैलाक्रान्तेन यो मुक्तस्त्वया रावः सुदारुणः॥ **7.16.36**॥ 676

यस्माल्लोकत्रयं चैतद् राविंतं भयमागतम्।
तस्मात् त्वं रावणो नाम नाम्ना राजन् भविष्यसि॥ **7.16.37**॥ 677

देवता मानुषा यक्षा ये चान्ये जगतीतले।
एवं त्वामभिधास्यन्ति रावणं लोकरावणम्॥ **7.16.38**॥ 678

गच्छ पौलस्त्य विस्रब्धं पथा येन त्वमिच्छसि।
मया चैवाभ्यनुज्ञातो राक्षसाधिप गम्यताम्॥ **7.16.39**॥ 679

एवमुक्तस्तु लङ्केशः शम्भुना स्वयमब्रवीत्।
प्रीतो यदि महादेव वरं मे देहि याचतः॥ **7.16.40**॥ 680

अवध्यत्वं मया प्राप्तं देवगन्धर्वदानवैः।
राक्षसैर्गुह्यकैर्नागैर्ये चान्ये बलवत्तराः॥ **7.16.41**॥ 681

मानुषान् न गणे देव स्वल्पास्ते मम सम्मताः।
दीर्घमायुश्च मे प्राप्तं ब्रह्मणस्त्रिपुरान्तक॥ **7.16.42**॥ 682

वाञ्छितं चायुषः शेषं शस्त्रं त्वं च प्रयच्छ मे।
एवमुक्तस्ततस्तेन रावणेन स शङ्करः॥ **7.16.43**॥ 683

ददौ खड्गं महादीप्तं चन्द्रहासमिति श्रुतम्।
आयुषश्चावशेषं च ददौ भूतपतिस्तदा॥ **7.16.44**॥ 684

दत्त्वोवाच ततः शम्भुर्नावज्ञेयमिदं त्वया।
अवज्ञातं यदि हि ते मामेवैष्यत्यसंशयः॥ **7.16.45**॥ 685

एवं महेश्वरेणैव कृतनामा स रावणः।
अभिवाद्य महादेवमारुरोहाथ पुष्पकम्॥ **7.16.46**॥ 686

ततो महीतलं राम पर्यक्रामत रावणः।
क्षत्रियान् सुमहावीर्यान् बाधमानस्ततस्ततः॥ **7.16.47**॥ 687

केचित् तेजस्विनः शूराः क्षत्रिया युद्धदुर्मदाः।
तच्छासनमकुर्वन्तो विनेशुः सपरिच्छदाः॥ **7.16.48**॥ 688

अपरे दुर्जयं रक्षो जानन्तः प्राज्ञसम्मताः।
जिताः स्म इत्यभाषन्त राक्षसं बलदर्पितम्॥ **7.16.49**॥ 689

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षोडशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तदशः सर्गः ॥

रावणेन तिरस्कृताया ब्रह्मर्षिकन्याया वेदवत्यास्तस्मै शापं दत्त्वाग्नौ प्रवेशो जन्मान्तरे सीतारूपेण तस्याः प्रादुर्भावश्च

अथ राजन् महाबाहुर्विचरन् पृथिवीतले।
हिमवद्वनमासाद्य परिचक्राम रावणः॥ **7.17.1** ॥ 690

तत्रापश्यत् स वै कन्यां कृष्णाजिनजटाधराम्।
आर्षेण विधिना चैनां दीप्यन्तीं देवतामिव॥ **7.17.2** ॥ 691

स दृष्ट्वा रूपसम्पन्नां कन्यां तां सुमहाव्रताम्।
काममोहपरीतात्मा पप्रच्छ प्रहसन्निव॥ **7.17.3** ॥ 692

किमिदं वर्तसे भद्रे विरुद्धं यौवनस्य ते।
नहि युक्ता तवैतस्य रूपस्यैवं प्रतिक्रिया॥ **7.17.4** ॥ 693

रूपं तेऽनुपमं भीरु कामोन्मादकरं नृणाम्।
न युक्तं तपसि स्थातुं निर्गतो ह्येष निर्णयः॥ **7.17.5** ॥ 694

कस्यासि किमिदं भद्रे कश्च भर्ता वरानने।
येन सम्भुज्यसे भीरु स नरः पुण्यभाग् भुवि॥ **7.17.6** ॥ 695

पृच्छतः शंस मे सर्वं कस्य हेतोः परिश्रमः।
एवमुक्ता तु सा कन्या रावणेन यशस्विनी॥ **7.17.7** ॥ 696

अब्रवीद् विधिवत् कृत्वा तस्यातिथ्यं तपोधना।
कुशध्वजो नाम पिता ब्रह्मर्षिरमितप्रभः॥ **7.17.8**॥ 697

बृहस्पतिसुतः श्रीमान् बुद्ध्या तुल्यो बृहस्पतेः।
तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः॥ **7.17.9**॥ 698

सम्भूता वाङ्मयी कन्या नाम्ना वेदवती स्मृता।
ततो देवाः सगन्धर्वा यक्षराक्षसपन्नगाः॥ **7.17.10**॥ 699

ते चापि गत्वा पितरं वरणं रोचयन्ति मे।
न च मां स पिता तेभ्यो दत्तवान् राक्षसेश्वर॥ **7.17.11**॥ 700

कारणं तद् वदिष्यामि निशामय महाभुज।
पितुस्तु मम जामाता विष्णुः किल सुरेश्वरः॥ **7.17.12**॥ 701

अभिप्रेतस्त्रिलोकेशस्तस्मान्नान्यस्य मे पिता।
दातुमिच्छति तस्मै तु तच्छ्रुत्वा बलदर्पितः॥ **7.17.13**॥ 702

शम्भुर्नाम ततो राजा दैत्यानां कुपितोऽभवत्।
तेन रात्रौ शयानो मे पिता पापेन हिंसितः॥ **7.17.14**॥ 703

ततो मे जननी दीना तच्छरीरं पितुर्मम।
परिष्वज्य महाभागा प्रविष्टा हव्यवाहनम्॥ **7.17.15**॥ 704

ततो मनोरथं सत्यं पितुर्नारायणं प्रति।
करोमीति तमेवाहं हृदयेन समुद्वहे॥ **7.17.16**॥ 705

इति प्रतिज्ञामारुह्य चरामि विपुलं तपः।
एतत् ते सर्वमाख्यातं मया राक्षसपुङ्गव॥ **7.17.17**॥ 706

नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात्।
आश्रये नियमं घोरं नारायणपरीप्सया॥ **7.17.18**॥ 707

विज्ञातस्त्वं हि मे राजन् गच्छ पौलस्त्यनन्दन।
जानामि तपसा सर्वं त्रैलोक्ये यद्धि वर्तते॥ **7.17.19**॥ 708

सोऽब्रवीद् रावणो भूयस्तां कन्यां सुमहाव्रताम्।
अवरुह्य विमानाग्रात् कन्दर्पशरपीडितः॥ **7.17.20**॥ 709

अवलिप्तासि सुश्रोणि यस्यास्ते मतिरीदृशी।
वृद्धानां मृगशावाक्षि भ्राजते पुण्यसञ्चयः॥ **7.17.21**॥ 710

त्वं सर्वगुणसम्पन्ना नार्हसे वक्तुमीदृशम्।
त्रैलोक्यसुन्दरी भीरु यौवनं तेऽतिवर्तते॥ **7.17.22**॥ 711

अहं लङ्कापतिर्भद्रे दशग्रीव इति श्रुतः।
तस्य मे भव भार्या त्वं भुङ्क्ष्व भोगान् यथासुखम्॥ **7.17.23**॥ 712

कश्च तावदसौ यं त्वं विष्णुरित्यभिभाषसे।
वीर्येण तपसा चैव भोगेन च बलेन च॥ **7.17.24**॥ 713

स मया नो समो भद्रे यं त्वं कामयसेऽङ्गने।
इत्युक्तवति तस्मिंस्तु वेदवत्यथ साब्रवीत्॥ **7.17.25**॥ 714

मा मैवमिति सा कन्या तमुवाच निशाचरम्।
त्रैलोक्याधिपतिं विष्णुं सर्वलोकनमस्कृतम्॥ **7.17.26**॥ 715

त्वदृते राक्षसेन्द्रान्यः कोऽवमन्येत बुद्धिमान्।
एवमुक्तस्तया तत्र वेदवत्या निशाचरः॥ **7.17.27**॥ 716

मूर्धजेषु तदा कन्यां कराग्रेण परामृशत्।
ततो वेदवती क्रुद्धा केशान् हस्तेन साच्छिनत्॥ **7.17.28**॥ 717

असिर्भूत्वा करस्तस्याः केशांश्छित्त्वांस्तदाकरोत्।
सा ज्वलन्तीव रोषेण दहन्तीव निशाचरम्॥ **7.17.29**॥ 718

उवाचाग्निं समाधाय मरणाय कृतत्वरा।
धर्षितायास्त्वयानार्य न मे जीवितमिष्यते॥ **7.17.30**॥ 719

रक्षस्तस्मात् प्रवेक्ष्यामि पश्यतस्ते हुताशनम्।
यस्मात् तु धर्षिता चाहं त्वया पापात्मना वने॥ **7.17.31**॥ 720

तस्मात् तव वधार्थं हि समुत्पत्स्ये ह्यहं पुनः।
नहि शक्यः स्त्रिया हन्तुं पुरुषः पापनिश्चयः॥ **7.17.32**॥ 721

शापे त्वयि मयोत्सृष्टे तपसश्च व्ययो भवेत्।
यदि त्वस्ति मया किञ्चित् कृतं दत्तं हुतं तथा॥ **7.17.33**॥ 722

तस्मात् त्वयोनिजा साध्वी भवेयं धर्मिणः सुता।
एवमुक्त्वा प्रविष्टा सा ज्वलितं जातवेदसम्॥ **7.17.34**॥ 723

पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः।
पुनरेव समुद्भूता पद्मे पद्मसमप्रभा॥ **7.17.35**॥ 724

तस्मादपि पुनः प्राप्ता पूर्ववत् तेन रक्षसा।
कन्यां कमलगर्भाभां प्रगृह्य स्वगृहं ययौ॥ **7.17.36**॥ 725

प्रगृह्य रावणस्त्वेतां दर्शयामास मन्त्रिणे।
लक्षणज्ञो निरीक्ष्यैव रावणं चैवमब्रवीत्॥ **7.17.37**॥ 726

गृहस्थैषा हि सुश्रोणी त्वद्वधायैव दृश्यते।
एतच्छ्रुत्वार्णवे राम तां प्रचिक्षेप रावणः॥ **7.17.38**॥ 727

सा चैव क्षितिमासाद्य यज्ञायतनमध्यगा।
राज्ञो हलमुखोत्कृष्टा पुनरप्युत्थिता सती॥ **7.17.39**॥ 728

सैषा जनकराजस्य प्रसूता तनया प्रभो।
तव भार्या महाबाहो विष्णुस्त्वं हि सनातनः॥ **7.17.40**॥ 729

पूर्वं क्रोधहतः शत्रुर्ययासौ निहतस्तया।
उपाश्रयित्वा शैलाभस्तव वीर्यममानुषम्॥ **7.17.41**॥ 730

एवमेषा महाभागा मर्त्येषूत्पत्स्यते पुनः।
क्षेत्रे हलमुखोत्कृष्टे वेद्यामग्निशिखोपमा॥ **7.17.42**॥ 731

एषा वेदवती नाम पूर्वमासीत् कृते युगे।
त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः॥ **7.17.43**॥ 732

उत्पन्ना मैथिलकुले जनकस्य महात्मनः।
सीतोत्पन्ना तु सीतेति मानुषैः पुनरुच्यते॥ **7.17.44**॥ 733

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टादशः सर्गः ॥

रावणेन मरुत्तस्य पराजय इन्द्रादिभिर्मयूरादिभ्यो वरदानं च

प्रविष्टायां हुताशं तु वेदवत्यां स रावणः।
पुष्पकं तु समारुह्य परिचक्राम मेदिनीम्॥ **7.18.1** ॥ 734

ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः।
उशीरबीजमासाद्य ददर्श स तु रावणः॥ **7.18.2** ॥ 735

संवर्तो नाम ब्रह्मर्षिः साक्षाद् भ्राता बृहस्पतेः।
याजयामास धर्मज्ञः सर्वैर्देवगणैर्वृतः॥ **7.18.3** ॥ 736

दृष्ट्वा देवास्तु तद् रक्षो वरदानेन दुर्जयम्।
तिर्यग्योनिं समाविष्टास्तस्य धर्षणभीरवः॥ **7.18.4** ॥ 737

इन्द्रो मयूरः संवृत्तो धर्मराजस्तु वायसः।
कृकलासो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥ **7.18.5** ॥ 738

अन्येष्वपि गतेष्वेवं देवेष्वरिनिषूदन।
रावणः प्राविशद् यज्ञं सारमेय इवाशुचिः॥ **7.18.6** ॥ 739

तं च राजानमासाद्य रावणो राक्षसाधिपः।
प्राह युद्धं प्रयच्छेति निर्जितोऽस्मीति वा वद॥ **7.18.7** ॥ 740

ततो मरुत्तो नृपतिः को भवानित्युवाच तम्।
अवहासं ततो मुक्त्वा रावणो वाक्यमब्रवीत्॥ **7.18.8**॥ 741

अकुतूहलभावेन प्रीतोऽस्मि तव पार्थिव।
धनदस्यानुजं यो मां नावगच्छसि रावणम्॥ **7.18.9**॥ 742

त्रिषु लोकेषु कोऽन्योऽस्ति यो न जानाति मे बलम्।
भ्रातरं येन निर्जित्य विमानमिदमाहृतम्॥ **7.18.10**॥ 743

ततो मरुत्तः स नृपस्तं रावणमथाब्रवीत्।
धन्यः खलु भवान् येन ज्येष्ठो भ्राता रणे जितः॥ **7.18.11**॥ 744

न त्वया सदृशः श्लाघ्यस्त्रिषु लोकेषु विद्यते।
कं त्वं प्राक्केवलं धर्मं चरित्वा लब्धवान् वरम्॥ **7.18.12**॥ 745

श्रुतपूर्वं हि न मया भाषसे यादृशं स्वयम्।
तिष्ठेदानीं न मे जीवन् प्रतियास्यसि दुर्मते॥ **7.18.13**॥ 746

अद्य त्वां निशितैर्बाणैः प्रेषयामि यमक्षयम्।
ततः शरासनं गृह्य सायकांश्च नराधिपः॥ **7.18.14**॥ 747

रणाय निर्ययौ क्रुद्धः संवर्तो मार्गमावृणोत्।
सोऽब्रवीत् स्नेहसंयुक्तं मरुत्तं तं महानृषिः॥ **7.18.15**॥ 748

श्रोतव्यं यदि मद्वाक्यं सम्प्रहारो न ते क्षमः।
माहेश्वरमिदं सत्रमसमाप्तं कुलं दहेत्॥ **7.18.16**॥ 749

दीक्षितस्य कुतो युद्धं क्रोधित्वं दीक्षिते कुतः।
संशयश्च जये नित्यं राक्षसश्च सुदुर्जयः॥ **7.18.17**॥ 750

स निवृत्तो गुरोर्वाक्यान्मरुत्तः पृथिवीपतिः।
विसृज्य सशरं चापं स्वस्थो मखमुखोऽभवत्॥ **7.18.18**॥ 751

ततस्तं निर्जितं मत्वा घोषयामास वै शुकः।
रावणो जयतीत्युच्चैर्हर्षान्नादं विमुक्तवान्॥ **7.18.19**॥ 752

तान् भक्षयित्वा तत्रस्थान् महर्षीन् यज्ञमागतान्।
वितृप्तो रुधिरैस्तेषां पुनः सम्प्रययौ महीम्॥ **7.18.20**॥ 753

रावणे तु गते देवाः सेन्द्राश्चैव दिवौकसः।
ततः स्वां योनिमासाद्य तानि सत्त्वानि चाब्रुवन्॥ **7.18.21**॥ 754

हर्षात् तदाब्रवीदिन्द्रो मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्मज्ञ भुजङ्गाद्धि न ते भयम्॥ **7.18.22**॥ 755

इदं नेत्रसहस्रं तु यत् तद् बर्हे भविष्यति।
वर्षमाणे मयि मुदं प्राप्स्यसे प्रीतिलक्षणाम्॥ **7.18.23**॥ 756

एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः॥ **7.18.24**॥ 757

नीलाः किल पुरा बर्हा मयूराणां नराधिप।
सुराधिपाद् वरं प्राप्य गताः सर्वेऽपि बर्हिणः॥ **7.18.25**॥ 758

धर्मराजोऽब्रवीद् राम प्राग्वंशे वायसं प्रति।
पक्षिंस्तवास्मि सुप्रीतः प्रीतस्य वचनं शृणु॥ **7.18.26**॥ 759

यथान्ये विविधै रोगैः पीड्यन्ते प्राणिनो मया।
ते न ते प्रभविष्यन्ति मयि प्रीते न संशयः॥ **7.18.27**॥ 760

मृत्युतस्ते भयं नास्ति वरान् मम विहङ्गम।
यावत् त्वां न वधिष्यन्ति नरास्तावद् भविष्यसि॥ **7.18.28**॥ 761

ये च मद्विषयस्था वै मानवाः क्षुधयार्दिताः।
त्वयि भुक्ते सुतृप्तास्ते भविष्यन्ति सबान्धवाः॥ **7.18.29**॥ 762

वरुणस्त्वब्रवीद्धंसं गङ्गातोयविचारिणम्।
श्रूयतां प्रीतिसंयुक्तं वचः पत्ररथेश्वर॥ **7.18.30**॥ 763

वर्णो मनोरमः सौम्यश्चन्द्रमण्डलसन्निभः।
भविष्यति तवोदग्रः शुद्धफेनसमप्रभः॥ **7.18.31**॥ 764

मच्छरीरं समासाद्य कान्तो नित्यं भविष्यसि।
प्राप्स्यसे चातुलां प्रीतिमेतन्मे प्रीतिलक्षणम्॥ **7.18.32**॥ 765

हंसानां हि पुरा राम न वर्णः सर्वपाण्डुरः।
पक्षा नीलाग्रसंवीताः क्रोडाः शष्पाग्रनिर्मलाः॥ **7.18.33**॥ 766

अथाब्रवीद् वैश्रवणः कृकलासं गिरौ स्थितम्।
हैरण्यं सम्प्रयच्छामि वर्णं प्रीतस्तवाप्यहम्॥ **7.18.34**॥ 767

सद्रव्यं च शिरो नित्यं भविष्यति तवाक्षयम्।
एष काञ्चनको वर्णो मत्प्रीत्या ते भविष्यति॥ **7.18.35**॥ 768

एवं दत्त्वा वरांस्तेभ्यस्तस्मिन् यज्ञोत्सवे सुराः।
निवृत्ते सह राज्ञा ते पुनः स्वभवनं गताः॥ **7.18.36**॥ 769

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनविंशः सर्गः ॥

रावणेनानरण्यस्य वधस्ततस्तस्य शापप्राप्तिश्च

अथ जित्वा मरुत्तं स प्रययौ राक्षसाधिपः।
नगराणि नरेन्द्राणां युद्धकाङ्क्षी दशाननः॥ **7.19.1** ॥ 770

समासाद्य तु राजेन्द्रान् महेन्द्रवरुणोपमान्।
अब्रवीद् राक्षसेन्द्रस्तु युद्धं मे दीयतामिति॥ **7.19.2** ॥ 771

निर्जिताः स्मेति वा ब्रूत एष मे हि सुनिश्चयः।
अन्यथा कुर्वतामेवं मोक्षो नैवोपपद्यते॥ **7.19.3** ॥ 772

ततस्त्वभीरवः प्राज्ञाः पार्थिवा धर्मनिश्चयाः।
मन्त्रयित्वा ततोऽन्योन्यं राजानः सुमहाबलाः॥ **7.19.4** ॥ 773

निर्जिताः स्मेत्यभाषन्त ज्ञात्वा वरबलं रिपोः।
दुष्यन्तः सुरथो गाधिर्गयो राजा पुरूरवाः॥ **7.19.5** ॥ 774

एते सर्वेऽब्रुवंस्तात निर्जिताः स्मेति पार्थिवाः।
अथायोध्यां समासाद्य रावणो राक्षसाधिपः॥ **7.19.6** ॥ 775

सुगुप्तामनरण्येन शक्रेणेवामरावतीम्।
स तं पुरुषशार्दूलं पुरन्दरसमं बले॥ **7.19.7** ॥ 776

प्राह राजानमासाद्य युद्धं देहीति रावणः।
निर्जितोऽस्मीति वा ब्रूहि त्वमेवं मम शासनम्॥ **7.19.8**॥ 777

अयोध्याधिपतिस्तस्य श्रुत्वा पापात्मनो वचः।
अनरण्यस्तु सङ्क्रुद्धो राक्षसेन्द्रमथाब्रवीत्॥ **7.19.9**॥ 778

दीयते द्वन्द्वयुद्धं ते राक्षसाधिपते मया।
सन्तिष्ठ क्षिप्रमायत्तो भव चैवं भवाम्यहम्॥ **7.19.10**॥ 779

अथ पूर्वं श्रुतार्थेन निर्जितं सुमहद् बलम्।
निष्क्रामत् तन्नरेन्द्रस्य बलं रक्षोवधोद्यतम्॥ **7.19.11**॥ 780

नागानां दशसाहस्रं वाजिनां नियुतं तथा।
रथानां बहुसाहस्रं पत्तीनां च नरोत्तम॥ **7.19.12**॥ 781

महीं सञ्छाद्य निष्क्रान्तं सपदातिरथं रणे।
ततः प्रवृत्तं सुमहद् युद्धं युद्धविशारद॥ **7.19.13**॥ 782

अनरण्यस्य नृपते राक्षसेन्द्रस्य चाद्भुतम्।
तद् रावणबलं प्राप्य बलं तस्य महीपतेः॥ **7.19.14**॥ 783

प्राणश्यत तदा सर्वं हव्यं हुतमिवानले।
युद्ध्वा च सुचिरं कालं कृत्वा विक्रममुत्तमम्॥ **7.19.15**॥ 784

प्रज्वलन्तं तमासाद्य क्षिप्रमेवावशेषितम्।
प्राविशत् सङ्कुलं तत्र शलभा इव पावकम्॥ **7.19.16**॥ 785

सोऽपश्यत् तन्नरेन्द्रस्तु नश्यमानं महाबलम्।
महार्णवं समासाद्य वनापगशतं यथा॥ **7.19.17**॥ 786

ततः शक्रधनुःप्रख्यं धनुर्विस्फारयन् स्वयम्।
आससाद नरेन्द्रस्तं रावणं क्रोधमूर्छितः॥ **7.19.18**॥ 787

अनरण्येन तेऽमात्या मारीचशुकसारणाः।
प्रहस्तसहिता भग्ना व्यद्रवन्त मृगा इव॥ **7.19.19**॥ 788

ततो बाणशतान्यष्टौ पातयामास मूर्धनि।
तस्य राक्षसराजस्य इक्ष्वाकुकुलनन्दनः॥ **7.19.20**॥ 789

तस्य बाणाः पतन्तस्ते चक्रिरे न क्षतं क्वचित्।
वारिधारा इवाभ्रेभ्यः पतन्त्यो गिरिमूर्धनि॥ **7.19.21**॥ 790

ततो राक्षसराजेन क्रुद्धेन नृपतिस्तदा।
तलेनाभिहतो मूर्ध्नि स रथान्निपपात ह॥ **7.19.22**॥ 791

स राजा पतितो भूमौ विह्वलः प्रविवेपितः।
वज्रदग्ध इवारण्ये सालो निपतितो यथा॥ **7.19.23**॥ 792

तं प्रहस्याब्रवीद् रक्ष इक्ष्वाकुं पृथिवीपतिम्।
किमिदानीं फलं प्राप्तं त्वया मां प्रति युध्यता॥ **7.19.24**॥ 793

त्रैलोक्ये नास्ति यो द्वन्द्वं मम दद्यान्नराधिप।
शङ्के प्रसक्तो भोगेषु न शृणोषि बलं मम॥ **7.19.25**॥ 794

तस्यैवं ब्रुवतो राजा मन्दासुर्वाक्यमब्रवीत्।
किं शक्यमिह कर्तुं वै कालो हि दुरतिक्रमः॥ **7.19.26**॥ 795

नह्यहं निर्जितो रक्षस्त्वया चात्मप्रशंसिना।
कालेनैव विपन्नोऽहं हेतुभूतस्तु मे भवान्॥ **7.19.27**॥ 796

किं त्विदानीं मया शक्यं कर्तुं प्राणपरिक्षये।
न ह्यहं विमुखो रक्षो युद्ध्यमानस्त्वया हतः॥ **7.19.28**॥ 797

इक्ष्वाकुपरिभावित्वाद् वचो वक्ष्यामि राक्षस।
यदि दत्तं यदि हुतं यदि मे सुकृतं तपः।
यदि गुप्ताः प्रजाः सम्यक् तदा सत्यं वचोऽस्तु मे॥ **7.19.29**॥ 798

उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम्।
रामो दाशरथिर्नाम स ते प्राणान् हरिष्यति॥ **7.19.30**॥ 799

ततो जलधरोदग्रस्ताडितो देवदुन्दुभिः।
तस्मिन्नुदाहते शापे पुष्पवृष्टिश्च खाच्च्युता॥ **7.19.31**॥ 800

ततः स राजा राजेन्द्र गतः स्थानं त्रिविष्टपम्।
स्वर्गते च नृपे तस्मिन् राक्षसः सोऽपसर्पत॥ **7.19.32**॥ 801

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ विंशः सर्गः ॥

नारदेन रावणस्य प्रबोधनं तस्य प्रेरणया रावणस्य युद्धार्थं यमलोके गमनं नारदस्य तद्विषये विचारश्च

ततो वित्रासयन् मर्त्यान् पृथिव्यां राक्षसाधिपः।
आससाद घने तस्मिन् नारदं मुनिपुङ्गवम्॥ **7.20.1**॥ 802

तस्याभिवादनं कृत्वा दशग्रीवो निशाचरः।
अब्रवीत् कुशलं पृष्ट्वा हेतुमागमनस्य च॥ **7.20.2**॥ 803

नारदस्तु महातेजा देवर्षिरमितप्रभः।
अब्रवीन्मेघपृष्ठस्थो रावणं पुष्पके स्थितम्॥ **7.20.3**॥ 804

राक्षसाधिपते सौम्य तिष्ठ विश्रवसः सुत।
प्रीतोऽस्म्यभिजनोपेत विक्रमैरूर्जितैस्तव॥ **7.20.4**॥ 805

विष्णुना दैत्यघातैश्च गन्धर्वोरगधर्षणैः।
त्वया समं विमर्दैश्च भृशं हि परितोषितः॥ **7.20.5**॥ 806

किञ्चिद् वक्ष्यामि तावत् तु श्रोतव्यं श्रोष्यसे यदि।
तन्मे निगदतस्तात समाधिं श्रवणे कुरु॥ **7.20.6**॥ 807

किमयं वध्यते तात त्वयावध्येन दैवतैः।
हत एव ह्ययं लोको यदा मृत्युवशं गतः॥ **7.20.7**॥ 808

देवदानवदैत्यानां यक्षगन्धर्वरक्षसाम्।
अवध्येन त्वया लोकः क्लेष्टुं योग्यो न मानुषः॥ **7.20.8**॥ 809

नित्यं श्रेयसि सम्मूढं महद्भिर्व्यसनैर्वृतम्।
हन्यात् कस्तादृशं लोकं जराव्याधिशतैर्युतम्॥ **7.20.9**॥ 810

तैस्तैरनिष्टोपगमैरजस्रं यत्र कुत्र कः।
मतिमान् मानुषे लोके युद्धेन प्रणयी भवेत्॥ **7.20.10**॥ 811

क्षीयमाणं दैवहतं क्षुत्पिपासाजरादिभिः।
विषादशोकसम्मूढं लोकं त्वं क्षपयस्व मा॥ **7.20.11**॥ 812

पश्य तावन्महाबाहो राक्षसेश्वर मानुषम्।
मूढमेवं विचित्रार्थं यस्य न ज्ञायते गतिः॥ **7.20.12**॥ 813

क्वचिद् वादित्रनृत्यादि सेव्यते मुदितैर्जनैः।
रुद्यते चापरैरार्तैर्धाराश्रुनयनाननैः॥ **7.20.13**॥ 814

मातापितृसुतस्नेहभार्याबन्धुमनोरमैः।
मोहितोऽयं जनो ध्वस्तः क्लेशं स्वं नावबुध्यते॥ **7.20.14**॥ 815

तत्किमेवं परिक्लिश्य लोकं मोहनिराकृतम्।
जित एव त्वया सौम्य मर्त्यलोको न संशयः॥ **7.20.15**॥ 816

अवश्यमेभिः सर्वैश्च गन्तव्यं यमसादनम्।
तन्निगृह्णीष्व पौलस्त्य यमं परपुरञ्जय॥ **7.20.16**॥ 817

तस्मिञ्जिते जितं सर्वं भवत्येव न संशयः।
एवमुक्तस्तु लङ्केशो दीप्यमानं स्वतेजसा॥ **7.20.17**॥ 818

अब्रवीन्नारदं तत्र सम्प्रहस्याभिवाद्य च।
महर्षे देवगन्धर्वविहार समरप्रिय॥ **7.20.18**॥ 819

अहं समुद्यतो गन्तुं विजयार्थं रसातलम्।
ततो लोकत्रयं जित्वा स्थाप्य नागान् सुरान् वशे॥ **7.20.19**॥ 820

समुद्रममृतार्थं च मथिष्यामि रसालयम्।
अथाब्रवीद् दशग्रीवं नारदो भगवानृषिः॥ **7.20.20**॥ 821

क्व खल्विदानीं मार्गेण त्वयेहान्येन गम्यते।
अयं खलु सुदुर्गम्यः प्रेतराजपुरं प्रति॥ **7.20.21**॥ 822

मार्गो गच्छति दुर्धर्ष यमस्यामित्रकर्शन।
स तु शारदमेघाभं हासं मुक्त्वा दशाननः॥ **7.20.22**॥ 823

उवाच कृतमित्येव वचनं चेदमब्रवीत्।
तस्मादेवमहं ब्रह्मन् वैवस्वतवधोद्यतः॥ **7.20.23**॥ 824

गच्छामि दक्षिणामाशां यत्र सूर्यात्मजो नृपः।
मया हि भगवन् क्रोधात् प्रतिज्ञातं रणार्थिना॥ **7.20.24**॥ 825

अवजेष्यामि चतुरो लोकपालानिति प्रभो।
तदिह प्रस्थितोऽहं वै पितृराजपुरं प्रति॥ **7.20.25**॥ 826

प्राणिसङ्क्लेशकर्तारं योजयिष्यामि मृत्युना।
एवमुक्त्वा दशग्रीवो मुनिं तमभिवाद्य च॥ **7.20.26**॥ 827

प्रययौ दक्षिणामाशां प्रविष्टः सह मन्त्रिभिः।
नारदस्तु महातेजा मुहूर्तं ध्यानमास्थितः॥ **7.20.27**॥ 828

चिन्तयामास विप्रेन्द्रो विधूम इव पावकः।
येन लोकास्त्रयः सेन्द्राः क्लिश्यन्ते सचराचराः॥ **7.20.28**॥ 829

क्षीणे चायुषि धर्मेण स कालो जेष्यते कथम्।
स्वदत्तकृतसाक्षी यो द्वितीय इव पावकः॥ **7.20.29**॥ 830

लब्धसंज्ञा विचेष्टन्ते लोका यस्य महात्मनः।
यस्य नित्यं त्रयो लोका विद्रवन्ति भयार्दिताः॥ **7.20.30**॥ 831

तं कथं राक्षसेन्द्रोऽसौ स्वयमेव गमिष्यति।
यो विधाता च धाता च सुकृतं दुष्कृतं तथा॥ **7.20.31**॥ 832

त्रैलोक्यं विजितं येन तं कथं विजयिष्यते।
अपरं किं तु कृत्वैवं विधानं संविधास्यति॥ **7.20.32**॥ 833

कौतूहलसमुत्पन्नो यास्यामि यमसादनम्।
विमर्दं द्रष्टुमनयोर्यमराक्षसयोः स्वयम्॥ **7.20.33**॥ 834

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकविंशः सर्गः ॥

रावणकर्तृकं यमलोकस्योपर्याक्रमणं तेन यमसैनिकानां संहरणं च

एवं सञ्चिन्त्य विप्रेन्द्रो जगाम लघुविक्रमः।
आख्यातुं तद् यथावृत्तं यमस्य सदनं प्रति॥ **7.21.1**॥ 835

अपश्यत् स यमं तत्र देवमग्निपुरस्कृतम्।
विधानमनुतिष्ठन्तं प्राणिनो यस्य यादृशम्॥ **7.21.2**॥ 836

स तु दृष्ट्वा यमः प्राप्तं महर्षिं तत्र नारदम्।
अब्रवीत् सुखमासीनमर्घ्यमावेद्य धर्मतः॥ **7.21.3**॥ 837

कच्चित् क्षेमं नु देवर्षे कच्चिद् धर्मो न नश्यति।
किमागमनकृत्यं ते देवगन्धर्वसेवित॥ **7.21.4**॥ 838

अब्रवीत् तु तदा वाक्यं नारदो भगवानृषिः।
श्रूयतामभिधास्यामि विधानं च विधीयताम्॥ **7.21.5**॥ 839

एष नाम्ना दशग्रीवः पितृराज निशाचरः।
उपयाति वशं नेतुं विक्रमैस्त्वां सुदुर्जयम्॥ **7.21.6**॥ 840

एतेन कारणेनाहं त्वरितो ह्यागतः प्रभो।
दण्डप्रहरणस्याद्य तव किं नु भविष्यति॥ **7.21.7**॥ 841

एतस्मिन्नन्तरे दूरादंशुमन्तमिवोदितम्।
ददृशुर्दीप्तमायान्तं विमानं तस्य रक्षसः॥ **7.21.8**॥ 842

तं देशं प्रभया तस्य पुष्पकस्य महाबलः।
कृत्वा वितिमिरं सर्वं समीपमभ्यवर्तत॥ **7.21.9**॥ 843

सोऽपश्यत् स महाबाहुर्दशग्रीवस्ततस्ततः।
प्राणिनः सुकृतं चैव भुञ्जानांश्चैव दुष्कृतम्॥ **7.21.10**॥ 844

अपश्यत् सैनिकांश्चास्य यमस्यानुचरैः सह।
यमस्य पुरुषैरुग्रैर्घोररूपैर्भयानकैः॥ **7.21.11**॥ 845

ददर्श वध्यमानांश्च क्लिश्यमानांश्च देहिनः।
क्रोशतश्च महानादं तीव्रनिष्टनतत्परान्॥ **7.21.12**॥ 846

कृमिभिर्भक्ष्यमाणांश्च सारमेयैश्च दारुणैः।
श्रोत्रायासकरा वाचो वदतश्च भयावहाः॥ **7.21.13**॥ 847

सन्तार्यमाणान् वैतरणीं बहुशः शोणितोदकाम्।
बालुकासु च तप्तासु तप्यमानान् मुहुर्मुहुः॥ **7.21.14**॥ 848

असिपत्रवने चैव भिद्यमानानधार्मिकान्।
रौरवे क्षारनद्यां च क्षुरधारासु चैव हि॥ **7.21.15**॥ 849

पानीयं याचमानांश्च तृषितान् क्षुधितानपि।
शवभूतान् कृशान् दीनान् विवर्णान् मुक्तमूर्धजान्॥ **7.21.16**॥ 850

मलपङ्कधरान् दीनान् रूक्षांश्च परिधावतः।
ददर्श रावणो मार्गे शतशोऽथ सहस्रशः॥ **7.21.17**॥ 851

कांश्चिच्च गृहमुख्येषु गीतवादित्रनिःस्वनैः।
प्रमोदमानानद्राक्षीद् रावणः सुकृतैः स्वकैः॥ **7.21.18**॥ 852

गोरसं गोप्रदातारो ह्यन्नं चैवान्नदायिनः।
गृहांश्च गृहदातारः स्वकर्मफलमश्नतः॥ **7.21.19**॥ 853

सुवर्णमणिमुक्ताभिः प्रमदाभिरलङ्कृतान्।
धार्मिकानपरांस्तत्र दीप्यमानान् स्वतेजसा॥ **7.21.20**॥ 854

ददर्श स महाबाहू रावणो राक्षसाधिपः।
ततस्तान् भिद्यमानांश्च कर्मभिर्दुष्कृतैः स्वकैः॥ **7.21.21**॥ 855

रावणो मोचयामास विक्रमेण बलाद् बली।
प्राणिनो मोक्षितास्तेन दशग्रीवेण रक्षसा॥ **7.21.22**॥ 856

सुखमापुर्मुहूर्तं ते ह्यतर्कितमचिन्तितम्।
प्रेतेषु मुच्यमानेषु राक्षसेन महीयसा॥ **7.21.23**॥ 857

प्रेतगोपाः सुसङ्क्रुद्धा राक्षसेन्द्रमभिद्रवन्।
ततो हलहलाशब्दः सर्वदिग्भ्यः समुत्थितः॥ **7.21.24**॥ 858

धर्मराजस्य योधानां शूराणां सम्प्रधावताम्।
ते प्रासैः परिघैः शूलैर्मुसलैः शक्तितोमरैः॥ **7.21.25**॥ 859

पुष्पकं समधर्षन्त शूराः शतसहस्रशः।
तस्यासनानि प्रासादान् वेदिकास्तोरणानि च॥ **7.21.26**॥ 860

पुष्पकस्य बभञ्जुस्ते शीघ्रं मधुकरा इव।
देवनिष्ठानभूतं तद् विमानं पुष्पकं मृधे॥ **7.21.27**॥ 861

भज्यमानं तथैवासीदक्षयं ब्रह्मतेजसा।
असङ्ख्या सुमहत्यासीत् तस्य सेना महात्मनः॥ **7.21.28**॥ 862

शूराणामग्रयातॄणां सहस्राणि शतानि च।
ततो वृक्षैश्च शैलैश्च प्रासादानां शतैस्तथा॥ **7.21.29**॥ 863

ततस्ते सचिवास्तस्य यथाकामं यथाबलम्।
अयुध्यन्त महावीराः स च राजा दशाननः॥ **7.21.30**॥ 864

ते तु शोणितदिग्धाङ्गाः सर्वशस्त्रसमाहताः।
अमात्या राक्षसेन्द्रस्य चक्रुरायोधनं महत्॥ **7.21.31**॥ 865

अन्योन्यं ते महाभागा जघ्नुः प्रहरणैर्भृशम्।
यमस्य च महाबाहो रावणस्य च मन्त्रिणः॥ **7.21.32**॥ 866

अमात्यांस्तांस्तु सन्त्यज्य यमयोधा महाबलाः।
तमेव चाभ्यधावन्त शूलवर्षैर्दशाननम्॥ **7.21.33**॥ 867

ततः शोणितदिग्धाङ्गः प्रहारैर्जर्जरीकृतः।
फुल्लाशोक इवाभाति पुष्पके राक्षसाधिपः॥ **7.21.34**॥ 868

स तु शूलगदाप्रासाञ्छक्तितोमरसायकान्।
मुसलानि शिलावृक्षान् मुमोचास्त्रबलाद् बली॥ **7.21.35**॥ 869

तरूणां च शिलानां च शस्त्राणां चातिदारुणम्।
यमसैन्येषु तद् वर्षं पपात धरणीतले॥ **7.21.36**॥ 870

तांस्तु सर्वान् विनिर्भिद्य तदस्त्रमपहत्य च।
जघ्नुस्ते राक्षसं घोरमेकं शतसहस्रशः॥ **7.21.37**॥ 871

परिवार्य च तं सर्वे शैलं मेघोत्करा इव।
भिन्दिपालैश्च शूलैश्च निरुच्छ्वासमपोथयन्॥ **7.21.38**॥ 872

विमुक्तकवचः क्रुद्धः सिक्तः शोणितविस्रवैः।
ततः स पुष्पकं त्यक्त्वा पृथिव्यामवतिष्ठत॥ **7.21.39**॥ 873

ततः स कार्मुकी बाणी समरे चाभिवर्धत।
लब्धसंज्ञो मुहूर्तेन क्रुद्धस्तस्थौ यथान्तकः॥ **7.21.40**॥ 874

ततः पाशुपतं दिव्यमस्त्रं सन्धाय कार्मुके।
तिष्ठ तिष्ठेति तानुक्त्वा तच्चापं व्यपकर्षत॥ **7.21.41**॥ 875

आकर्णात् स विकृष्याथ चापमिन्द्रारिराहवे।
मुमोच तं शरं क्रुद्धस्त्रिपुरे शङ्करो यथा॥ **7.21.42**॥ 876

तस्य रूपं शरस्यासीत् सधूमज्वालमण्डलम्।
वनं दहिष्यतो घर्मे दावाग्नेरिव मूर्च्छतः॥ **7.21.43**॥ 877

ज्वालामाली स तु शरः क्रव्यादानुगतो रणे।
मुक्तो गुल्मान् द्रुमांश्चापि भस्म कृत्वा प्रधावति॥ **7.21.44**॥ 878

ते तस्य तेजसा दग्धाः सैन्या वैवस्वतस्य तु।
रणे तस्मिन् निपतिता माहेन्द्रा इव केतवः॥ **7.21.45**॥ 879

ततस्तु सचिवैः सार्धं राक्षसो भीमविक्रमः।
ननाद सुमहानादं कम्पयन्निव मेदिनीम्॥ **7.21.46**॥ 880

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वाविंशः सर्गः ॥

यमरावणयोर्युद्धं यमेन रावणवधार्थमुत्थापितस्य कालदण्डस्य ब्रह्मण आज्ञया निवर्तनं विजयिनो रावणस्य यमलोकात् प्रस्थानं च

स तस्य तु महानादं श्रुत्वा वैवस्वतः प्रभुः।
शत्रुं विजयिनं मेने स्वबलस्य च सङ्क्षयम्॥ **7.22.1** ॥ 881

स हि योधान् हतान् मत्वा क्रोधसंरक्तलोचनः।
अब्रवीत् त्वरितः सूतं रथो मे उपनीयताम्॥ **7.22.2** ॥ 882

तस्य सूतस्तदा दिव्यमुपस्थाप्य महारथम्।
स्थितः स च महातेजा अध्यारोहत तं रथम्॥ **7.22.3** ॥ 883

प्रासमुद्गरहस्तश्च मृत्युस्तस्याग्रतः स्थितः।
येन सङ्क्षिप्यते सर्वं त्रैलोक्यमिदमव्ययम्॥ **7.22.4** ॥ 884

कालदण्डस्तु पार्श्वस्थो मूर्तिमानस्य चाभवत्।
यमप्रहरणं दिव्यं तेजसा ज्वलदग्निवत्॥ **7.22.5** ॥ 885

तस्य पार्श्वेषु निच्छिद्राः कालपाशाः प्रतिष्ठिताः।
पावकस्पर्शसङ्काशः स्थितो मूर्तश्च मुद्गरः॥ **7.22.6** ॥ 886

ततो लोकत्रयं क्षुब्धमकम्पन्त दिवौकसः।
कालं दृष्ट्वा तथा क्रुद्धं सर्वलोकभयावहम्॥ **7.22.7** ॥ 887

ततस्त्वचोदयत् सूतस्तानश्वान् रुचिरप्रभान्।
प्रययौ भीमसन्नादो यत्र रक्षःपतिः स्थितः॥ **7.22.8**॥ 888

मुहूर्तेन यमं ते तु हया हरिहयोपमाः।
प्रापयन् मनसस्तुल्या यत्र तत् प्रस्तुतं रणम्॥ **7.22.9**॥ 889

दृष्ट्वा तथैव विकृतं रथं मृत्युसमन्वितम्।
सचिवा राक्षसेन्द्रस्य सहसा विप्रदुद्रुवुः॥ **7.22.10**॥ 890

लघुसत्त्वतया ते हि नष्टसंज्ञा भयार्दिताः।
नेह योद्धुं समर्थाः स्म इत्युक्त्वा प्रययुर्दिशः॥ **7.22.11**॥ 891

स तु तं तादृशं दृष्ट्वा रथं लोकभयावहम्।
नाक्षुभ्यत दशग्रीवो न चापि भयमाविशत्॥ **7.22.12**॥ 892

स तु रावणमासाद्य व्यसृजच्छक्तितोमरान्।
यमो मर्माणि सङ्क्रुद्धो रावणस्य न्यकृन्तत॥ **7.22.13**॥ 893

रावणस्तु ततः स्वस्थः शरवर्षं मुमोच ह।
तस्मिन् वैवस्वतरथे तोयवर्षमिवाम्बुदः॥ **7.22.14**॥ 894

ततो महाशक्तिशतैः पात्यमानैर्महोरसि।
नाशक्नोत् प्रतिकर्तुं स राक्षसः शल्यपीडितः॥ **7.22.15**॥ 895

एवं नानाप्रहरणैर्यमेनामित्रकर्षिणा।
सप्तरात्रं कृतः सङ्ख्ये विसंज्ञो विमुखो रिपुः॥ **7.22.16**॥ 896

तदाऽऽसीत् तुमुलं युद्धं यमराक्षसयोर्द्वयोः।
जयमाकाङ्क्षतोर्वीर समरेष्वनिवर्तिनोः॥ **7.22.17**॥ 897

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
प्रजापतिं पुरस्कृत्य समेतास्तद्रणाजिरे॥ **7.22.18**॥ 898

संवर्त इव लोकानां युध्यतोरभवत् तदा।
राक्षसानां च मुख्यस्य प्रेतानामीश्वरस्य च॥ **7.22.19**॥ 899

राक्षसेन्द्रोऽपि विस्फार्य चापमिन्द्राशनिप्रभम्।
निरन्तरमिवाकाशं कुर्वन् बाणांस्ततोऽसृजत्॥ **7.22.20**॥ 900

मृत्युं चतुर्भिर्विशिखैः सूतं सप्तभिरार्दयत्।
यमं शतसहस्रेण शीघ्रं मर्मस्वताडयत्॥ **7.22.21**॥ 901

ततः क्रुद्धस्य वदनाद् यमस्य समजायत।
ज्वालामाली सनिःश्वासः सधूमः कोपपावकः॥ **7.22.22**॥ 902

तदाश्चर्यमथो दृष्ट्वा देवदानवसन्निधौ।
प्रहर्षितौ सुसंरब्धौ मृत्युकालौ बभूवतुः॥ **7.22.23**॥ 903

ततो मृत्युः क्रुद्धतरो वैवस्वतमभाषत।
मुञ्च मां समरे यावद्धन्मीमं पापराक्षसम्॥ **7.22.24**॥ 904

नैषा रक्षो भवेदद्य मर्यादा हि निसर्गतः।
हिरण्यकशिपुः श्रीमान् नमुचिः शम्बरस्तथा॥ **7.22.25**॥ 905

निसन्दिर्धूमकेतुश्च बलिर्वैरोचनोऽपि च।
शम्भुर्दैत्यो महाराजो वृत्रो बाणस्तथैव च॥ **7.22.26**॥ 906

राजर्षयः शास्त्रविदो गन्धर्वाः समहोरगाः।
ऋषयः पन्नगा दैत्या यक्षाश्च ह्यप्सरोगणाः॥ **7.22.27**॥ 907

युगान्तपरिवर्ते च पृथिवी समहार्णवा।
क्षयं नीता महाराज सपर्वतसरिद्रुमा॥ **7.22.28**॥ 908

एते चान्ये च बहवो बलवन्तो दुरासदाः।
विनिपन्ना मया दृष्टाः किमुतायं निशाचरः॥ **7.22.29**॥ 909

मुञ्च मां साधु धर्मज्ञ यावदेनं निहन्म्यहम्।
नहि कश्चिन्मया दृष्टो बलवानपि जीवति॥ **7.22.30**॥ 910

बलं मम न खल्वेतन्मर्यादैषा निसर्गतः।
स दृष्टो न मया काल मुहूर्तमपि जीवति॥ **7.22.31**॥ 911

तस्यैवं वचनं श्रुत्वा धर्मराजः प्रतापवान्।
अब्रवीत् तत्र तं मृत्युं त्वं तिष्ठेनं निहन्म्यहम्॥ **7.22.32**॥ 912

ततः संरक्तनयनः क्रुद्धो वैवस्वतः प्रभुः।
कालदण्डममोघं तु तोलयामास पाणिना॥ **7.22.33**॥ 913

यस्य पार्श्वेषु निहिताः कालपाशाः प्रतिष्ठिताः।
पावकाशनिसङ्काशो मुद्गरो मूर्तिमान् स्थितः॥ **7.22.34**॥ 914

दर्शनादेव यः प्राणान् प्राणिनामपि कर्षति।
किं पुनः स्पृशमानस्य पात्यमानस्य वा पुनः॥ **7.22.35**॥ 915

स ज्वालापरिवारस्तु निर्दहन्निव राक्षसम्।
तेन स्पृष्टो बलवता महाप्रहरणोऽस्फुरत्॥ **7.22.36**॥ 916

ततो विदुद्रुवुः सर्वे तस्मात् त्रस्ता रणाजिरे।
सुराश्च क्षुभिताः सर्वे दृष्ट्वा दण्डोद्यतं यमम्॥ **7.22.37**॥ 917

तस्मिन् प्रहर्तुकामे तु यमे दण्डेन रावणम्।
यमं पितामहः साक्षाद् दर्शयित्वेदमब्रवीत्॥ **7.22.38**॥ 918

वैवस्वत महाबाहो न खल्वमितविक्रम।
न हन्तव्यस्त्वयैतेन दण्डेनैष निशाचरः॥ **7.22.39**॥ 919

वरः खलु मयैतस्मै दत्तस्त्रिदशपुङ्गव।
स त्वया नानृतः कार्यो यन्मया व्याहृतं वचः॥ **7.22.40**॥ 920

यो हि मामनृतं कुर्याद् देवो वा मानुषोऽपि वा।
त्रैलोक्यमनृतं तेन कृतं स्यान्नात्र संशयः॥ **7.22.41**॥ 921

क्रुद्धेन विप्रमुक्तोऽयं निर्विशेषं प्रियाप्रिये।
प्रजाः संहरते रौद्रो लोकत्रयभयावहः॥ **7.22.42**॥ 922

अमोघो ह्येष सर्वेषां प्राणिनाममितप्रभः।
कालदण्डो मया सृष्टः पूर्वं मृत्युपुरस्कृतः॥ **7.22.43**॥ 923

तन्न खल्वेष ते सौम्य पात्यो रावणमूर्धनि।
नह्यस्मिन् पतिते कश्चिन्मुहूर्तमपि जीवति॥ **7.22.44**॥ 924

यदि ह्यस्मिन् निपतिते न म्रियेतैष राक्षसः।
म्रियते वा दशग्रीवस्तदाप्युभयतोऽनृतम्॥ **7.22.45**॥ 925

तन्निवर्तय लङ्केशाद् दण्डमेतं समुद्यतम्।
सत्यं च मां कुरुष्वाद्य लोकांस्त्वं यद्यवेक्षसे॥ **7.22.46**॥ 926

एवमुक्तस्तु धर्मात्मा प्रत्युवाच यमस्तदा।
एष व्यावर्तितो दण्डः प्रभविष्णुर्हि नो भवान्॥ **7.22.47**॥ 927

किं त्विदानीं मया शक्यं कर्तुं रणगतेन हि।
न मया यद्ययं शक्यो हन्तुं वरपुरस्कृतः॥ **7.22.48**॥ 928

एष तस्मात् प्रणश्यामि दर्शनादस्य रक्षसः।
इत्युक्त्वा सरथः साश्वस्तत्रैवान्तरधीयत॥ **7.22.49**॥ 929

दशग्रीवस्तु तं जित्वा नाम विश्राव्य चात्मनः।
आरुह्य पुष्पकं भूयो निष्क्रान्तो यमसादनात्॥ **7.22.50**॥ 930

स तु वैवस्वतो देवैः सह ब्रह्मपुरोगमैः।
जगाम त्रिदिवं हृष्टो नारदश्च महामुनिः॥ **7.22.51**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोविंशः सर्गः ॥

रावणस्य निवातकवचैः सह मैत्री रावणेन कालकेयानां वधो वरुणपुत्राणां पराजयश्च

ततो जित्वा दशग्रीवो यमं त्रिदशपुङ्गवम्।
रावणस्तु रणश्लाघी स्वसहायान् ददर्श ह॥ **7.23.1** ॥ 932

ततो रुधिरसिक्ताङ्गं प्रहारैर्जर्जरीकृतम्।
रावणं राक्षसा दृष्ट्वा विस्मयं समुपागमन्॥ **7.23.2** ॥ 933

जयेन वर्धयित्वा च मारीचप्रमुखास्ततः।
पुष्पकं भेजिरे सर्वे सान्त्विता रावणेन तु॥ **7.23.3** ॥ 934

ततो रसातलं रक्षः प्रविष्टः पयसां निधिम्।
दैत्योरगगणाध्युष्टं वरुणेन सुरक्षितम्॥ **7.23.4** ॥ 935

स तु भोगवतीं गत्वा पुरीं वासुकिपालिताम्।
कृत्वा नागान् वशे हृष्टो ययौ मणिमयीं पुरीम्॥ **7.23.5** ॥ 936

निवातकवचास्तत्र दैत्या लब्धवरा वसन्।
राक्षसस्तान् समागम्य युद्धाय समुपाह्वयत्॥ **7.23.6** ॥ 937

ते तु सर्वे सुविक्रान्ता दैतेया बलशालिनः।
नानाप्रहरणास्तत्र प्रहृष्टा युद्धदुर्मदाः॥ **7.23.7** ॥ 938

शूलैस्त्रिशूलैः कुलिशैः पट्टिशासिपरश्वधैः।
अन्योन्यं बिभिदुः क्रुद्धा राक्षसा दानवास्तथा॥ **7.23.8**॥ 939

तेषां तु युध्यमानानां साग्रः संवत्सरो गतः।
न चान्यतरतस्तत्र विजयो वा क्षयोऽपि वा॥ **7.23.9**॥ 940

ततः पितामहस्तत्र त्रैलोक्यगतिरव्ययः।
आजगाम द्रुतं देवो विमानवरमास्थितः॥ **7.23.10**॥ 941

निवातकवचानां तु निवार्य रणकर्म तत्।
वृद्धः पितामहो वाक्यमुवाच विदितार्थवत्॥ **7.23.11**॥ 942

नह्ययं रावणो युद्धे शक्यो जेतुं सुरासुरैः।
न भवन्तः क्षयं नेतुमपि सामरदानवैः॥ **7.23.12**॥ 943

राक्षसस्य सखित्वं च भवद्भिः सह रोचते।
अविभक्ताश्च सर्वार्थाः सुहृदां नात्र संशयः॥ **7.23.13**॥ 944

ततोऽग्निसाक्षिकं सख्यं कृतवांस्तत्र रावणः।
निवातकवचैः सार्धं प्रीतिमानभवत् तदा॥ **7.23.14**॥ 945

अर्चितस्तैर्यथान्यायं संवत्सरमथोषितः।
स्वपुरान्निर्विशेषं च प्रियं प्राप्तो दशाननः॥ **7.23.15**॥ 946

तत्रोपधार्य मायानां शतमेकं समाप्तवान्।
सलिलेन्द्रपुरान्वेषी भ्रमति स्म रसातलम्॥ **7.23.16**॥ 947

ततोऽश्मनगरं नाम कालकेयैरधिष्ठितम्।
गत्वा तु कालकेयांश्च हत्वा तत्र बलोत्कटान्॥ **7.23.17**॥ 948

शूर्पणख्याश्च भर्तारमसिना प्राच्छिनत् तदा।
श्यालं च बलवन्तं च विद्युज्जिह्वं बलोत्कटम्॥ **7.23.18**॥ 949

जिह्वया संलिहन्तं च राक्षसं समरे तदा।
तं विजित्य मुहूर्तेन जघ्ने दैत्यांश्चतुःशतम्॥ **7.23.19**॥ 950

ततः पाण्डुरमेघाभं कैलासमिव भास्वरम्।
वरुणस्यालयं दिव्यमपश्यद् राक्षसाधिपः॥ **7.23.20**॥ 951

क्षरन्तीं च पयस्तत्र सुरभिं गामवस्थिताम्।
यस्याः पयोऽभिनिष्पन्दात् क्षीरोदो नाम सागरः॥ **7.23.21**॥ 952

ददर्श रावणस्तत्र गोवृषेन्द्रवरारणिम्।
यस्माच्चन्द्रः प्रभवति शीतरश्मिर्निशाकरः॥ **7.23.22**॥ 953

यं समाश्रित्य जीवन्ति फेनपाः परमर्षयः।
अमृतं यत्र चोत्पन्नं स्वधा च स्वधभोजिनाम्॥ **7.23.23**॥ 954

यां ब्रुवन्ति नरा लोके सुरभिं नाम नामतः।
प्रदक्षिणं तु तां कृत्वा रावणः परमाद्भुताम्।
प्रविवेश महाघोरं गुप्तं बहुविधैर्बलैः॥ **7.23.24**॥ 955

ततो धाराशताकीर्णं शारदाभ्रनिभं तदा।
नित्यप्रहृष्टं ददृशे वरुणस्य गृहोत्तमम्॥ **7.23.25**॥ 956

ततो हत्वा बलाध्यक्षान् समरे तैश्च ताडितः।
अब्रवीच्च ततो योधान् राजा शीघ्रं निवेद्यताम्॥ **7.23.26**॥ 957

युद्धार्थी रावणः प्राप्तस्तस्य युद्धं प्रदीयताम्।
वद वा न भयं तेऽस्ति निर्जितोऽस्मीति साञ्जलिः॥ **7.23.27**॥ 958

एतस्मिन्नन्तरे क्रुद्धा वरुणस्य महात्मनः।
पुत्राः पौत्राश्च निष्क्रामन् गौश्च पुष्कर एव च॥ **7.23.28**॥ 959

ते तु तत्र गुणोपेता बलैः परिवृताः स्वकैः।
युक्त्वा रथान् कामगमानुद्यद्भास्करवर्चसः॥ **7.23.29**॥ 960

ततो युद्धं समभवद् दारुणं रोमहर्षणम्।
सलिलेन्द्रस्य पुत्राणां रावणस्य च धीमतः॥ **7.23.30**॥ 961

अमात्यैश्च महावीर्यैर्दशग्रीवस्य रक्षसः।
वारुणं तद् बलं सर्वं क्षणेन विनिपातितम्॥ **7.23.31**॥ 962

समीक्ष्य स्वबलं सङ्ख्ये वरुणस्य सुतास्तदा।
अर्दिताः शरजालेन निवृत्ता रणकर्मणः॥ **7.23.32**॥ 963

महीतलगतास्ते तु रावणं दृश्य पुष्पके।
आकाशमाशु विविशुः स्यन्दनैः शीघ्रगामिभिः॥ **7.23.33**॥ 964

महदासीत् ततस्तेषां तुल्यं स्थानमवाप्य तत्।
आकाशयुद्धं तुमुलं देवदानवयोरिव॥ **7.23.34**॥ 965

ततस्ते रावणं युद्धे शरैः पावकसन्निभैः।
विमुखीकृत्य संहृष्टा विनेदुर्विविधान् रवान्॥ **7.23.35**॥ 966

ततो महोदरः क्रुद्धो राजानं वीक्ष्य धर्षितम्।
त्यक्त्वा मृत्युभयं वीरो युद्धाकाङ्क्षी व्यलोकयत्॥ **7.23.36**॥ 967

तेन ते वारुणा युद्धे कामगाः पवनोपमाः।
महोदरेण गदया हयास्ते प्रययुः क्षितिम्॥ **7.23.37**॥ 968

तेषां वरुणसूनूनां हत्वा योधान् हयांश्च तान्।
मुमोचाशु महानादं विरथान् प्रेक्ष्य तान् स्थितान्॥ **7.23.38**॥ 969

ते तु तेषां रथाः साश्वाः सह सारथिभिर्वरैः।
महोदरेण निहताः पतिताः पृथिवीतले॥ **7.23.39**॥ 970

ते तु त्यक्त्वा रथान् पुत्रा वरुणस्य महात्मनः।
आकाशे विष्ठिताः शूराः स्वप्रभावान्न विव्यथुः॥ **7.23.40**॥ 971

धनूंषि कृत्वा सज्जानि विनिर्भिद्य महोदरम्।
रावणं समरे क्रुद्धाः सहिताः समवारयन्॥ **7.23.41**॥ 972

सायकैश्चापविभ्रष्टैर्वज्रकल्पैः सुदारुणैः।
दारयन्ति स्म सङ्क्रुद्धा मेघा इव महागिरिम्॥ **7.23.42**॥ 973

ततः क्रुद्धो दशग्रीवः कालाग्निरिव मूर्च्छितः।
शरवर्षं महाघोरं तेषां मर्मस्वपातयत्॥ **7.23.43**॥ 974

मुसलानि विचित्राणि ततो भल्लशतानि च।
पट्टिशांश्चैव शक्तीश्च शतघ्नीमहतीरपि॥ **7.23.44**॥ 975

पातयामास दुर्धर्षस्तेषामुपरि विष्ठितः।
अपविद्धास्तु ते वीरा विनिष्पेतुः पदातयः॥ **7.23.45**॥ 976

ततस्तेनैव सहसा सीदन्ति स्म पदातिनः।
महापङ्कमिवासाद्य कुञ्जराः षष्टिहायनाः॥ **7.23.46**॥ 977

सीदमानान् सुतान् दृष्ट्वा विह्वलान् स महाबलः।
ननाद रावणो हर्षान्महानम्बुधरो यथा॥ **7.23.47**॥ 978

ततो रक्षो महानादान् मुक्त्वा हन्ति स्म वारुणान्।
नानाप्रहरणोपेतैर्धारापातैरिवाम्बुदः॥ **7.23.48**॥ 979

ततस्ते विमुखाः सर्वे पतिता धरणीतले।
रणात् स्वपुरुषैः शीघ्रं गृहाण्येव प्रवेशिताः॥ **7.23.49**॥ 980

तानब्रवीत् ततो रक्षो वरुणाय निवेद्यताम्।
रावणं त्वब्रवीन्मन्त्री प्रहासो नाम वारुणः॥ **7.23.50**॥ 981

गतः खलु महाराजो ब्रह्मलोकं जलेश्वरः।
गान्धर्वं वरुणः श्रोतुं यं त्वमाह्वयसे युधि॥ **7.23.51**॥ 982

तत् किं तव यथा वीर परिश्रम्य गते नृपे।
ये तु सन्निहिता वीराः कुमारास्ते पराजिताः॥ **7.23.52**॥ 983

राक्षसेन्द्रस्तु तच्छ्रुत्वा नाम विश्राव्य चात्मनः।
हर्षान्नादं विमुञ्चन् वै निष्क्रान्तो वरुणालयात्॥ **7.23.53**॥ 984

आगतस्तु पथा येन तेनैव विनिवृत्य सः।
लङ्कामभिमुखो रक्षो नभस्तलगतो ययौ॥ **7.23.54**॥ 985

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रयोविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्विंशः सर्गः ॥

रावणेनापहृतानां देवादिकन्यानां स्त्रीणां च विलापस्तं प्रति शापश्च रावणेन शूर्पणखाया आश्वासनं खरेण सह तस्या दण्डकारण्ये प्रेषणं च

निवर्तमानः संहृष्टो रावणः स दुरात्मवान्।
जह्रे पथि नरेन्द्रर्षिदेवदानवकन्यकाः॥ **7.24.1** ॥ 986

दर्शनीयां हि यां रक्षः कन्यां स्त्री वाथ पश्यति।
हत्वा बन्धुजनं तस्या विमाने तां रुरोध सः॥ **7.24.2** ॥ 987

एवं पन्नगकन्याश्च राक्षसासुरमानुषीः।
यक्षदानवकन्याश्च विमाने सोऽध्यरोपयत्॥ **7.24.3** ॥ 988

ता हि सर्वाः समं दुःखान्मुमुचुर्बाष्पजं जलम्।
तुल्यमग्न्यर्चिषां तत्र शोकाग्निभयसम्भवम्॥ **7.24.4** ॥ 989

ताभिः सर्वानवद्याभिर्नदीभिरिव सागरः।
आपूरितं विमानं तद् भयशोकाशिवाश्रुभिः॥ **7.24.5** ॥ 990

नागगन्धर्वकन्याश्च महर्षितनयाश्च याः।
दैत्यदानवकन्याश्च विमाने शतशोऽरुदन्॥ **7.24.6** ॥ 991

दीर्घकेश्यः सुचार्वङ्ग्यः पूर्णचन्द्रनिभाननाः।
पीनस्तनतटा मध्ये वज्रवेदिसमप्रभाः॥ **7.24.7** ॥ 992

रथकूबरसङ्काशैः श्रोणिदेशैर्मनोहराः।
स्त्रियः सुराङ्गनाप्रख्या निष्टप्तकनकप्रभाः॥ **7.24.8**॥ 993

शोकदुःखभयत्रस्ता विह्वलाश्च सुमध्यमाः।
तासां निःश्वासवातेन सर्वतः सम्प्रदीपितम्॥ **7.24.9**॥ 994

अग्निहोत्रमिवाभाति सन्निरुद्धाग्नि पुष्पकम्।
दशग्रीववशं प्राप्तास्तास्तु शोकाकुलाः स्त्रियः॥ **7.24.10**॥ 995

दीनवक्त्रेक्षणाः श्यामा मृग्यः सिंहवशा इव।
काचिच्चिन्तयती तत्र किं नु मां भक्षयिष्यति॥ **7.24.11**॥ 996

काचिद् दध्यौ सुदुःखार्ता अपि मां मारयेदयम्।
इति मातृः पितॄन् स्मृत्वा भर्तॄन् भ्रातॄंस्तथैव च॥ **7.24.12**॥ 997

दुःखशोकसमाविष्टा विलेपुः सहिताः स्त्रियः।
कथं नु खलु मे पुत्रो भविष्यति मया विना॥ **7.24.13**॥ 998

कथं माता कथं भ्राता निमग्नाः शोकसागरे।
हा कथं नु करिष्यामि भर्तुस्तस्मादहं विना॥ **7.24.14**॥ 999

मृत्यो प्रसादयामि त्वां नय मां दुःखभागिनीम्।
किं नु तद् दुष्कृतं कर्म पुरा देहान्तरे कृतम्॥ **7.24.15**॥ 1000

एवं स्म दुःखिताः सर्वाः पतिताः शोकसागरे।
न खल्विदानीं पश्यामो दुःखस्यास्यान्तमात्मनः॥ **7.24.16**॥ 1001

अहो धिङ्मानुषं लोकं नास्ति खल्वधमः परः।
यद् दुर्बला बलवता भर्तारो रावणेन नः॥ **7.24.17**॥ 1002

सूर्येणोदयता काले नक्षत्राणीव नाशिताः।
अहो सुबलवद् रक्षो वधोपायेषु रज्यते॥ **7.24.18**॥ 1003

अहो दुर्वृत्तमास्थाय नात्मानं वै जुगुप्सते।
सर्वथा सदृशस्तावद् विक्रमोऽस्य दुरात्मनः॥ **7.24.19**॥ 1004

इदं त्वसदृशं कर्म परदाराभिमर्शनम्।
यस्मादेष परक्यासु रमते राक्षसाधमः॥ **7.24.20**॥ 1005

तस्माद् वै स्त्रीकृतेनैव वधं प्राप्स्यति दुर्मतिः।
सतीभिर्वरनारीभिरेवं वाक्येऽभ्युदीरिते॥ **7.24.21**॥ 1006

नेदुर्दुन्दुभयः खस्थाः पुष्पवृष्टिः पपात च।
शप्तः स्त्रीभिः स तु समं हतौजा इव निष्प्रभः॥ **7.24.22**॥ 1007

पतिव्रताभिः साध्वीभिर्बभूव विमना इव।
एवं विलपितं तासां शृण्वन् राक्षसपुङ्गवः॥ **7.24.23**॥ 1008

प्रविवेश पुरी लङ्कां पूज्यमानो निशाचरैः।
एतस्मिन्नन्तरे घोरा राक्षसी कामरूपिणी॥ **7.24.24**॥ 1009

सहसा पतिता भूमौ भगिनी रावणस्य सा।
तां स्वसारं समुत्थाप्य रावणः परिसान्त्वयन्॥ **7.24.25**॥ 1010

अब्रवीत् किमिदं भद्रे वक्तुकामासि मां द्रुतम्।
सा बाष्पपरिरुद्धाक्षी रक्ताक्षी वाक्यमब्रवीत्॥ **7.24.26**॥ 1011

कृतास्मि विधवा राजंस्त्वया बलवता बलात्।
एते राजंस्त्वया वीर्याद् दैत्या विनिहता रणे॥ **7.24.27**॥ 1012

कालकेया इति ख्याताः सहस्राणि चतुर्दश।
प्राणेभ्योऽपि गरीयान् मे तत्र भर्ता महाबलः॥ **7.24.28**॥ 1013

सोऽपि त्वया हतस्तात रिपुणा भ्रातृगन्धिना।
त्वयास्मि निहता राजन् स्वयमेव हि बन्धुना॥ **7.24.29**॥ 1014

राजन् वैधव्यशब्दं च भोक्ष्यामि त्वत्कृतं ह्यहम्।
ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि॥ **7.24.30**॥ 1015

स त्वया निहतो युद्धे स्वयमेव न लज्जसे।
एवमुक्तो दशग्रीवो भगिन्या क्रोशमानया॥ **7.24.31**॥ 1016

अब्रवीत् सान्त्वयित्वा तां सामपूर्वमिदं वचः।
अलं वत्से रुदित्वा ते न भेतव्यं च सर्वशः॥ **7.24.32**॥ 1017

दानमानप्रसादैस्त्वां तोषयिष्यामि यत्नतः।
युद्धप्रमत्तो व्याक्षिप्तो जयाकाङ्क्षी क्षिपञ्शरान्॥ **7.24.33**॥ 1018

नाहमज्ञासिषं युध्यन् स्वान् परान् वापि संयुगे।
जामातरं न जाने स्म प्रहरन् युद्धदुर्मदः॥ **7.24.34**॥ 1019

तेनासौ निहतः सङ्ख्ये मया भर्ता तव स्वसः।
अस्मिन् काले तु यत् प्राप्तं तत् करिष्यामि ते हितम्॥ **7.24.35**॥ 1020

भ्रातुरैश्वर्ययुक्तस्य खरस्य वस पार्श्वतः।
चतुर्दशानां भ्राता ते सहस्राणां भविष्यति॥ **7.24.36**॥ 1021

प्रभुः प्रयाणे दाने च राक्षसानां महाबलः।
तत्र मातृष्वसेयस्ते भ्रातायं वै खरः प्रभुः॥ **7.24.37**॥ 1022

भविष्यति तवादेशं सदा कुर्वन् निशाचरः।
शीघ्रं गच्छत्वयं वीरो दण्डकान् परिरक्षितुम्॥ **7.24.38**॥ 1023

दूषणोऽस्य बलाध्यक्षो भविष्यति महाबलः।
तत्र ते वचनं शूरः करिष्यति सदा खरः॥ **7.24.39**॥ 1024

रक्षसां कामरूपाणां प्रभुरेष भविष्यति।
एवमुक्त्वा दशग्रीवः सैन्यमस्यादिदेश ह॥ **7.24.40**॥ 1025

चतुर्दश सहस्राणि रक्षसां वीर्यशालिनाम्।
स तैः परिवृतः सर्वै राक्षसैर्घोरदर्शनैः॥ **7.24.41**॥ 1026

आगच्छत खरः शीघ्रं दण्डकानकुतोभयः।
स तत्र कारयामास राज्यं निहतकण्टकम्।
सा च शूर्पणखा तत्र न्यवसद् दण्डके वने॥ **7.24.42**॥ 1027

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चविंशः सर्गः ॥

यज्ञैर्मेघनादस्य साफल्यं विभीषणेन रावणं प्रति परस्त्रीहरणदोषाणां वर्णनं कुम्भीनसीमाश्वास्य मधुना सह रावणस्य देवलोकोपर्याक्रमणम्

स तु दत्त्वा दशग्रीवो बलं घोरं खरस्य तत्।
भगिनीं स समाश्वास्य हृष्टः स्वस्थतरोऽभवत्॥ **7.25.1**॥ 1028

ततो निकुम्भिला नाम लङ्कोपवनमुत्तमम्।
तद् राक्षसेन्द्रो बलवान् प्रविवेश सहानुगः॥ **7.25.2**॥ 1029

ततो यूपशताकीर्णं सौम्यचैत्योपशोभितम्।
ददर्श विष्ठितं यज्ञं श्रिया सम्प्रज्वलन्निव॥ **7.25.3**॥ 1030

ततः कृष्णाजिनधरं कमण्डलुशिखाध्वजम्।
ददर्श स्वसुतं तत्र मेघनादं भयावहम्॥ **7.25.4**॥ 1031

तं समासाद्य लङ्केशः परिष्वज्याथ बाहुभिः।
अब्रवीत् किमिदं वत्स वर्तसे ब्रूहि तत्त्वतः॥ **7.25.5**॥ 1032

उशना त्वब्रवीत् तत्र यज्ञसम्पत्समृद्धये।
रावणं राक्षसश्रेष्ठं द्विजश्रेष्ठो महातपाः॥ **7.25.6**॥ 1033

अहमाख्यामि ते राजञ्श्रूयतां सर्वमेव तत्।
यज्ञास्ते सप्त पुत्रेण प्राप्तास्ते बहुविस्तराः॥ **7.25.7**॥ 1034

अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः।
राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा॥ **7.25.8**॥ 1035

माहेश्वरे प्रवृत्ते तु यज्ञे पुम्भिः सुदुर्लभे।
वरांस्ते लब्धवान् पुत्रः साक्षात् पशुपतेरिह॥ **7.25.9**॥ 1036

कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम्।
मायां च तामसीं नाम यया सम्पद्यते तमः॥ **7.25.10**॥ 1037

एतया किल सङ्ग्रामे मायया राक्षसेश्वर।
प्रयुक्तया गतिः शक्या नहि ज्ञातुं सुरासुरैः॥ **7.25.11**॥ 1038

अक्षयाविषुधी बाणैश्चापं चापि सुदुर्जयम्।
अस्त्रं च बलवद् राजञ्छत्रुविध्वंसनं रणे॥ **7.25.12**॥ 1039

एतान् सर्वान् वरान् लब्ध्वा पुत्रस्तेऽयं दशानन।
अद्य यज्ञसमाप्तौ च त्वां दिदृक्षन् स्थितो ह्यहम्॥ **7.25.13**॥ 1040

ततोऽब्रवीद् दशग्रीवो न शोभनमिदं कृतम्।
पूजिताः शत्रवो यस्माद् द्रव्यैरिन्द्रपुरोगमाः॥ **7.25.14**॥ 1041

एहीदानीं कृतं यद्धि सुकृतं तन्न संशयः।
आगच्छ सौम्य गच्छामः स्वमेव भवनं प्रति॥ **7.25.15**॥ 1042

ततो गत्वा दशग्रीवः सपुत्रः सविभीषणः।
स्त्रियोऽवतारयामास सर्वास्ता बाष्पगद्गदाः॥ **7.25.16**॥ 1043

लक्ष्मिण्यो रत्नभूताश्च देवदानवरक्षसाम्।
तस्य तासु मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत्॥ **7.25.17**॥ 1044

ईदृशैस्त्वं समाचारैर्यशोऽर्थकुलनाशनैः।
धर्षणं प्राणिनां ज्ञात्वा स्वमतेन विचेष्टसे॥ **7.25.18**॥ 1045

ज्ञातींस्तान् धर्षयित्वेमास्त्वयाऽऽनीता वराङ्गनाः।
त्वामतिक्रम्य मधुना राजन् कुम्भीनसी हृता॥ **7.25.19**॥ 1046

रावणस्त्वब्रवीद् वाक्यं नावगच्छामि किं त्विदम्।
कोऽयं यस्तु त्वयाऽऽख्यातो मधुरित्येव नामतः॥ **7.25.20**॥ 1047

विभीषणस्तु सङ्क्रुद्धो भ्रातरं वाक्यमब्रवीत्।
श्रूयतामस्य पापस्य कर्मणः फलमागतम्॥ **7.25.21**॥ 1048

मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः।
माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः॥ **7.25.22**॥ 1049

पिता ज्येष्ठो जनन्या नो ह्यस्माकं चार्यकोऽभवत्।
तस्य कुम्भीनसी नाम दुहितुर्दुहिताभवत्॥ **7.25.23**॥ 1050

मातृष्वसुरथास्माकं सा च कन्यानलोद्भवा।
भवत्यस्माकमेवैषा भ्रातृणां धर्मतः स्वसा॥ **7.25.24**॥ 1051

सा हृता मधुना राजन् राक्षसेन बलीयसा।
यज्ञप्रवृत्ते पुत्रे तु मयि चान्तर्जलोषिते॥ **7.25.25**॥ 1052

कुम्भकर्णो महाराज निद्रामनुभवत्यथ।
निहत्य राक्षसश्रेष्ठानमात्यानिह सम्मतान्॥ **7.25.26**॥ 1053

धर्षयित्वा हृता सा तु गुप्ताप्यन्तःपुरे तव।
श्रुत्वापि तन्महाराज क्षान्तमेव हतो न सः॥ **7.25.27**॥ 1054

यस्मादवश्यं दातव्या कन्या भर्त्रे हि भ्रातृभिः।
तदेतत् कर्मणो ह्यस्य फलं पापस्य दुर्मतेः॥ **7.25.28**॥ 1055

अस्मिन्नेवाभिसम्प्राप्तं लोके विदितमस्तु ते।
विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः॥ **7.25.29**॥ 1056

दौरात्म्येनात्मनोद्भूतस्तप्ताभ्भा इव सागरः।
ततोऽब्रवीद् दशग्रीवः क्रुद्धः संरक्तलोचनः॥ **7.25.30**॥ 1057

कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु नः।
भ्राता मे कुभ्भकर्णश्च ये च मुख्या निशाचराः॥ **7.25.31**॥ 1058

वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः।
अद्य तं समरे हत्वा मधुं रावणनिर्भयम्॥ **7.25.32**॥ 1059

सुरलोकं गमिष्यामि युद्धाकाङ्क्षी सुहृद्वृतः।
अक्षौहिणीसहस्राणि चत्वार्यग्र्याणि रक्षसाम्॥ **7.25.33**॥ 1060

नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम्।
इन्द्रजित् त्वग्रतः सैन्यात् सैनिकान् परिगृह्य च॥ **7.25.34**॥ 1061

जगाम रावणो मध्ये कुभ्भकर्णश्च पृष्ठतः।
विभीषणश्च धर्मात्मा लङ्कायां धर्ममाचरन्॥ **7.25.35**॥ 1062

शेषाः सर्वे महाभागा ययुर्मधुपुरं प्रति।
खरैरुष्ट्रैर्हयैर्दीप्तैः शिशुमारैर्महोरगैः॥ **7.25.36**॥ 1063

राक्षसाः प्रययुः सर्वे कृत्वाऽऽकाशं निरन्तरम्।
दैत्याश्च शतशस्तत्र कृतवैराश्च दैवतैः॥ **7.25.37**॥ 1064

रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन् हि पृष्ठतः।
स तु गत्वा मधुपुरं प्रविश्य च दशाननः॥ **7.25.38**॥ 1065

न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान्।
सा च प्रह्वाञ्जलिर्भूत्वा शिरसा चरणौ गता॥ **7.25.39**॥ 1066

तस्य राक्षसराजस्य त्रस्ता कुभ्भीनसी तदा।
तां समुत्थापयामास न भेतव्यमिति ब्रुवन्॥ **7.25.40**॥ 1067

रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते।
साब्रवीद् यदि मे राजन् प्रसन्नस्त्वं महाभुज॥ **7.25.41**॥ 1068

भर्तारं न ममेहाद्य हन्तुमर्हसि मानद।
नहीदृशं भयं किञ्चित् कुलस्त्रीणामिहोच्यते॥ **7.25.42**॥ 1069

भयानामपि सर्वेषां वैधव्यं व्यसनं महत्।
सत्यवाग् भव राजेन्द्र मामवेक्षस्व याचतीम्॥ **7.25.43**॥ 1070

त्वयाप्युक्तं महाराज न भेतव्यमिति स्वयम्।
रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम्॥ **7.25.44**॥ 1071

क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम्।
सह तेन गमिष्यामि सुरलोकं जयाय हि॥ **7.25.45**॥ 1072

तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात्।
इत्युक्ता सा समुत्थाप्य प्रसुप्तं तं निशाचरम्॥ **7.25.46**॥ 1073

अब्रवीत् सम्प्रहृष्टेव राक्षसी सा पतिं वचः।
एष प्राप्तो दशग्रीवो मम भ्राता महाबलः॥ **7.25.47**॥ 1074

सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च।
तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस॥ **7.25.48**॥ 1075

स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम्।
तस्यास्तद् वचनं श्रुत्वा तथेत्याह मधुर्वचः॥ **7.25.49**॥ 1076

ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः।
पूजयामास धर्मेण रावणं राक्षसाधिपम्॥ **7.25.50**॥ 1077

प्राप्य पूजां दशग्रीवो मधुवेश्मनि वीर्यवान्।
तत्र चैकां निशामुष्य गमनायोपचक्रमे॥ **7.25.51**॥ 1078

ततः कैलासमासाद्य शैलं वैश्रवणालयम्।
राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत्॥ **7.25.52**॥ 1079

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्विंशः सर्गः ॥

रावणस्य रम्भाया उपरि बलात्कारो नलकूबरेण रावणाय घोरशापदानं च

स तु तत्र दशग्रीवः सह सैन्येन वीर्यवान्।
अस्तं प्राप्ते दिनकरे निवासं समरोचयत्॥ **7.26.1**॥ 1080

उदिते विमले चन्द्रे तुल्यपर्वतवर्चसि।
प्रसुप्तं सुमहत् सैन्यं नानाप्रहरणायुधम्॥ **7.26.2**॥ 1081

रावणस्तु महावीर्यो निषण्णः शैलमूर्धनि।
स ददर्श गुणांस्तत्र चन्द्रपादपशोभितान्॥ **7.26.3**॥ 1082

कर्णिकारवनैर्दीप्तैः कदम्बबकुलैस्तथा।
पद्मिनीभिश्च फुल्लाभिर्मन्दाकिन्या जलैरपि॥ **7.26.4**॥ 1083

चम्पकाशोकपुन्नागमन्दारतरुभिस्तथा।
चूतपाटललोधैश्च प्रियङ्ग्वर्जुनकेतकैः॥ **7.26.5**॥ 1084

तगरैर्नारिकेलैश्च प्रियालपनसैस्तथा।
एतैरन्यैश्च तरुभिरुद्भासितवनान्तरे॥ **7.26.6**॥ 1085

किन्नरा मदनेनार्ता रक्ता मधुरकण्ठिनः।
समं सम्प्रजगुर्यत्र मनस्तुष्टिविवर्धनम्॥ **7.26.7**॥ 1086

विद्याधरा मदक्षीबा मदरक्तान्तलोचनाः।
योषिद्भिः सह सङ्क्रान्ताश्चिक्रीडुर्जह्रषुश्च वै॥ **7.26.8**॥ 1087

घण्टानामिव सन्नादः शुश्रुवे मधुरस्वनः।
अप्सरोगणसङ्घानां गायतां धनदालये॥ **7.26.9**॥ 1088

पुष्पवर्षाणि मुञ्चन्तो नगाः पवनताडिताः।
शैलं तं वासयन्तीव मधुमाधवगन्धिनः॥ **7.26.10**॥ 1089

मधुपुष्परजःपृक्तं गन्धमादाय पुष्कलम्।
प्रववौ वर्धयन् कामं रावणस्य सुखोऽनिलः॥ **7.26.11**॥ 1090

गेयात् पुष्पसमृद्ध्या च शैत्याद् वायोर्गिरेर्गुणात्।
प्रवृत्तायां रजन्यां च चन्द्रस्योदयनेन च॥ **7.26.12**॥ 1091

रावणः स महावीर्यः कामस्य वशमागतः।
विनिःश्वस्य विनिःश्वस्य शशिनं समवैक्षत॥ **7.26.13**॥ 1092

एतस्मिन्नन्तरे तत्र दिव्याभरणभूषिता।
सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना॥ **7.26.14**॥ 1093

दिव्यचन्दनलिप्ताङ्गी मन्दारकृतमूर्धजा।
दिव्योत्सवकृतारम्भा दिव्यपुष्पविभूषिता॥ **7.26.15**॥ 1094

चक्षुर्मनोहरं पीनं मेखलादामभूषितम्।
समुद्वहन्ती जघनं रतिप्राभृतमुत्तमम्॥ **7.26.16**॥ 1095

कृतैर्विशेषकैरार्द्रैः षडर्तुकुसुमोद्भवैः।
बभावन्यतमेव श्रीः कान्तिश्रीद्युतिकीर्तिभिः॥ **7.26.17**॥ 1096

नीलं सतोयमेघाभं वस्त्रं समवगुण्ठिता।
यस्या वक्त्रं शशिनिभं भ्रुवौ चापनिभे शुभे॥ **7.26.18**॥ 1097

ऊरू करिकराकारौ करौ पल्लवकोमलौ।
सैन्यमध्येन गच्छन्ती रावणेनोपलक्षिता॥ **7.26.19**॥ 1098

तां समुत्थाय गच्छन्तीं कामबाणवशं गतः।
करे गृहीत्वा लज्जन्तीं स्मयमानोऽभ्यभाषत॥ **7.26.20**॥ 1099

क्व गच्छसि वरारोहे कां सिद्धिं भजसे स्वयम्।
कस्याभ्युदयकालोऽयं यस्त्वां समुपभोक्ष्यते॥ **7.26.21**॥ 1100

त्वदाननरसस्याद्य पद्मोत्पलसुगन्धिनः।
सुधामृतरसस्येव कोऽद्य तृप्तिं गमिष्यति॥ **7.26.22**॥ 1101

स्वर्णकुम्भनिभौ पीनौ शुभौ भीरु निरन्तरौ।
कस्योरःस्थलसंस्पर्शं दास्यतस्ते कुचाविमौ॥ **7.26.23**॥ 1102

सुवर्णचक्रप्रतिमं स्वर्णदामचितं पृथु।
अध्यारोक्ष्यति कस्तेऽद्य जघनं स्वर्गरूपिणम्॥ **7.26.24**॥ 1103

मद्विशिष्टः पुमान् कोऽद्य शक्रो विष्णुरथाश्विनौ।
मामतीत्य हि यच्च त्वं यासि भीरु न शोभनम्॥ **7.26.25**॥ 1104

विश्रम त्वं पृथुश्रोणि शिलातलमिदं शुभम्।
त्रैलोक्ये यः प्रभुश्चैव मदन्यो नैव विद्यते॥ **7.26.26**॥ 1105

तदेवं प्राञ्जलिः प्रह्वो याचते त्वां दशाननः।
भर्तुर्भर्ता विधाता च त्रैलोक्यस्य भजस्व माम्॥ **7.26.27**॥ 1106

एवमुक्ताब्रवीद् रम्भा वेपमाना कृताञ्जलिः।
प्रसीद नार्हसे वक्तुमीदृशं त्वं हि मे गुरुः॥ **7.26.28**॥ 1107

अन्येभ्योऽपि त्वया रक्ष्या प्राप्नुयां धर्षणं यदि।
तद्धर्मतः स्नुषा तेऽहं तत्त्वमेतद् ब्रवीमि ते॥ **7.26.29**॥ 1108

अथाब्रवीद् दशग्रीवश्चरणाधोमुखीं स्थिताम्।
रोमहर्षमनुप्राप्तां दृष्टमात्रेण तां तदा॥ **7.26.30**॥ 1109

सुतस्य यदि मे भार्या ततस्त्वं हि स्नुषा भवेः।
बाढमित्येव सा रम्भा प्राह रावणमुत्तरम्॥ **7.26.31**॥ 1110

धर्मतस्ते सुतस्याहं भार्या राक्षसपुङ्गव।
पुत्रः प्रियतरः प्राणैर्भ्रातुर्वैश्रवणस्य ते॥ **7.26.32**॥ 1111

विख्यातस्त्रिषु लोकेषु नलकूबर इत्ययम्।
धर्मतो यो भवेद् विप्रः क्षत्रियो वीर्यतो भवेत्॥ **7.26.33**॥ 1112

क्रोधाद् यश्च भवेदग्निः क्षान्त्या च वसुधासमः।
तस्यास्मि कृतसङ्केता लोकपालसुतस्य वै॥ **7.26.34**॥ 1113

तमुद्दिश्य तु मे सर्वं विभूषणमिदं कृतम्।
यथा तस्य हि नान्यस्य भावो मां प्रति तिष्ठति॥ **7.26.35**॥ 1114

तेन सत्येन मां राजन् मोक्तुमर्हस्यरिन्दम।
स हि तिष्ठति धर्मात्मा मां प्रतीक्ष्य समुत्सुकः॥ **7.26.36**॥ 1115

तत्र विघ्नं तु तस्येह कर्तुं नार्हसि मुञ्च माम्।
सद्भिराचरितं मार्गं गच्छ राक्षसपुङ्गव॥ **7.26.37**॥ 1116

माननीयो मम त्वं हि पालनीया तथास्मि ते।
एवमुक्तो दशग्रीवः प्रत्युवाच विनीतवत्॥ **7.26.38**॥ 1117

स्नुषास्मि यदवोचस्त्वमेकपत्नीष्वयं क्रमः।
देवलोकस्थितिरियं सुराणां शाश्वती मता॥ **7.26.39**॥ 1118

पतिरप्सरसां नास्ति न चैकस्त्रीपरिग्रहः।
एवमुक्त्वा स तां रक्षो निवेश्य च शिलातले॥ **7.26.40**॥ 1119

कामभोगाभिसंरक्तो मैथुनायोपचक्रमे।
सा विमुक्ता ततो रम्भा भ्रष्टमाल्यविभूषणा॥ **7.26.41**॥ 1120

गजेन्द्राक्रीडमथिता नदीवाकुलतां गता।
लुलिताकुलकेशान्ता करवेपितपल्लवा॥ **7.26.42**॥ 1121

पवनेनावधूतेव लता कुसुमशालिनी।
सा वेपमाना लज्जन्ती भीता करकृताञ्जलिः॥ **7.26.43**॥ 1122

नलकूबरमासाद्य पादयोर्निपपात ह।
तदवस्थां च तां दृष्ट्वा महात्मा नलकूबरः॥ **7.26.44**॥ 1123

अब्रवीत् किमिदं भद्रे पादयोः पतितासि मे।
सा वै निःश्वसमाना तु वेपमाना कृताञ्जलिः॥ **7.26.45**॥ 1124

तस्मै सर्वं यथातत्त्वमाख्यातुमुपचक्रमे।
एष देव दशग्रीवः प्राप्तो गन्तुं त्रिविष्टपम्॥ **7.26.46**॥ 1125

तेन सैन्यसहायेन निशेयं परिणामिता।
आयान्ती तेन दृष्टास्मि त्वत्सकाशमरिन्दम॥ **7.26.47**॥ 1126

गृहीता तेन पृष्टास्मि कस्य त्वमिति रक्षसा।
मया तु सर्वं यत् सत्यं तस्मै सर्वं निवेदितम्॥ **7.26.48**॥ 1127

काममोहाभिभूतात्मा नाश्रौषीत् तद् वचो मम।
याच्यमानो मया देव स्नुषा तेऽहमिति प्रभो॥ **7.26.49**॥ 1128

तत् सर्वं पृष्ठतः कृत्वा बलात् तेनास्मि धर्षिता।
एवं त्वमपराधं मे क्षन्तुमर्हसि सुव्रत॥ **7.26.50**॥ 1129

नहि तुल्यं बलं सौम्य स्त्रियाश्च पुरुषस्य हि।
एतच्छ्रुत्वा तु सङ्क्रुद्धस्तदा वैश्रवणात्मजः॥ **7.26.51**॥ 1130

धर्षणां तां परां श्रुत्वा ध्यानं सम्प्रविवेश ह।
तस्य तत् कर्म विज्ञाय तदा वैश्रवणात्मजः॥ **7.26.52**॥ 1131

मुहूर्तात् क्रोधताम्राक्षस्तोयं जग्राह पाणिना।
गृहीत्वा सलिलं सर्वमुपस्पृश्य यथाविधि॥ **7.26.53**॥ 1132

उत्ससर्ज तदा शापं राक्षसेन्द्राय दारुणम्।
अकामा तेन यस्मात् त्वं बलाद् भद्रे प्रधर्षिता॥ **7.26.54**॥ 1133

तस्मात् स युवतीमन्यां नाकामामुपयास्यति।
यदा ह्यकामां कामार्तो धर्षयिष्यति योषितम्॥ **7.26.55**॥ 1134

मूर्धा तु सप्तधा तस्य शकलीभविता तदा।
तस्मिन्नुदाहृते शापे ज्वलिताग्निसमप्रभे॥ **7.26.56**॥ 1135

देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता।
पितामहमुखाश्चैव सर्वे देवाः प्रहर्षिताः॥ **7.26.57**॥ 1136

ज्ञात्वा लोकगतिं सर्वां तस्य मृत्युं च रक्षसः।
ऋषयः पितरश्चैव प्रीतिमापुरनुत्तमाम्॥ **7.26.58**॥ 1137

श्रुत्वा तु स दशग्रीवस्तं शापं रोमहर्षणम्।
नारीषु मैथुनीभावं नाकामास्वभ्यरोचयत्॥ **7.26.59**॥ 1138

तेन नीताः स्त्रियः प्रीतिमापुः सर्वाः पतिव्रताः।
नलकूबरनिर्मुक्तं शापं श्रुत्वा मनःप्रियम्॥ **7.26.60**॥ 1139

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तविंशः सर्गः ॥

सेनासहितस्य रावणस्येन्द्रलोकोपरि समाक्रमणमिन्द्रेण विष्णुं प्रति साहाय्यार्थं प्रार्थनं रावणं भाविनि काले हनिष्यसीति प्रतिज्ञाय विष्णुनेन्द्रस्य निवर्तनं देवैः सह रक्षसां युद्धं वसुना सुमालिनो वधश्च

कैलासं लङ्घयित्वा तु ससैन्यबलवाहनः।
आससाद महातेजा इन्द्रलोकं दशाननः॥ **7.27.1** ॥ 1140

तस्य राक्षससैन्यस्य समन्तादुपयास्यतः।
देवलोके बभौ शब्दो भिद्यमानार्णवोपमः॥ **7.27.2** ॥ 1141

श्रुत्वा तु रावणं प्राप्तमिन्द्रश्चलित आसनात्।
देवानथाब्रवीत् तत्र सर्वानेव समागतान्॥ **7.27.3** ॥ 1142

आदित्यांश्च वसून् रुद्रान् साध्यांश्च समरुद्गणान्।
सज्जा भवत युद्धार्थं रावणस्य दुरात्मनः॥ **7.27.4** ॥ 1143

एवमुक्तास्तु शक्रेण देवाः शक्रसमा युधि।
सन्नह्य सुमहासत्त्वा युद्धश्रद्धासमन्विताः॥ **7.27.5** ॥ 1144

स तु दीनः परित्रस्तो महेन्द्रो रावणं प्रति।
विष्णोः समीपमागत्य वाक्यमेतदुवाच ह॥ **7.27.6** ॥ 1145

विष्णो कथं करिष्यामि रावणं राक्षसं प्रति।
अहोऽतिबलवद् रक्षो युद्धार्थमभिवर्तते॥ **7.27.7**॥ 1146

वरप्रदानाद् बलवान् न खल्वन्येन हेतुना।
तत् तु सत्यं वचः कार्यं यदुक्तं पद्मयोनिना॥ **7.27.8**॥ 1147

तद् यथा नमुचिर्वृत्रो बलिर्नरकशम्बरौ।
त्वद्बलं समवष्टभ्य मया दग्धास्तथा कुरु॥ **7.27.9**॥ 1148

नह्यन्यो देवदेवेश त्वदृते मधुसूदन।
गतिः परायणं चापि त्रैलोक्ये सचराचरे॥ **7.27.10**॥ 1149

त्वं हि नारायणः श्रीमान् पद्मनाभः सनातनः।
त्वयेमे स्थापिता लोकाः शक्रश्चाहं सुरेश्वरः॥ **7.27.11**॥ 1150

त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम्।
त्वामेव भगवन् सर्वे प्रविशन्ति युगक्षये॥ **7.27.12**॥ 1151

तदाचक्ष्व यथातत्त्वं देवदेव मम स्वयम्।
असिचक्रसहायस्त्वं योत्स्यसे रावणं प्रति॥ **7.27.13**॥ 1152

एवमुक्तः स शक्रेण देवो नारायणः प्रभुः।
अब्रवीन्न परित्रासः कर्तव्यः श्रूयतां च मे॥ **7.27.14**॥ 1153

न तावदेष दुष्टात्मा शक्यो जेतुं सुरासुरैः।
हन्तुं चापि समासाद्य वरदानेन दुर्जयः॥ **7.27.15**॥ 1154

सर्वथा तु महत् कर्म करिष्यति बलोत्कटः।
राक्षसः पुत्रसहितो दृष्टमेतन्निसर्गतः॥ **7.27.16**॥ 1155

यत् तु मां त्वमभाषिष्ठा युध्यस्वेति सुरेश्वर।
नाहं तं प्रतियोत्स्यामि रावणं राक्षसं युधि॥ **7.27.17**॥ 1156

नाहत्वा समरे शत्रुं विष्णुः प्रतिनिवर्तते।
दुर्लभश्चैव कामोऽद्य वरगुप्ताद्धि रावणात्॥ **7.27.18**॥ 1157

प्रतिजाने च देवेन्द्र त्वत्समीपे शतक्रतो।
भवितास्मि यथास्याहं रक्षसो मृत्युकारणम्॥ **7.27.19**॥ 1158

अहमेव निहन्तास्मि रावणं सपुरःसरम्।
देवता नन्दयिष्यामि ज्ञात्वा कालमुपागतम्॥ **7.27.20**॥ 1159

एतत् ते कथितं तत्त्वं देवराज शचीपते।
युद्ध्यस्व विगतत्रासः सुरैः सार्धं महाबल॥ **7.27.21**॥ 1160

ततो रुद्राः सहादित्या वसवो मरुतोऽश्विनौ।
सन्नद्धा निर्ययुस्तूर्णं राक्षसानभितः पुरात्॥ **7.27.22**॥ 1161

एतस्मिन्नन्तरे नादः शुश्रुवे रजनीक्षये।
तस्य रावणसैन्यस्य प्रयुद्धस्य समन्ततः॥ **7.27.23**॥ 1162

ते प्रबुद्धा महावीर्या अन्योन्यमभिवीक्ष्य वै।
सङ्ग्राममेवाभिमुखा अभ्यवर्तन्त हृष्टवत्॥ **7.27.24**॥ 1163

ततो दैवतसैन्यानां सङ्क्षोभः समजायत।
तदक्षयं महासैन्यं दृष्ट्वा समरमूर्धनि॥ **7.27.25**॥ 1164

ततो युद्धं समभवद् देवदानवरक्षसाम्।
घोरं तुमुलनिर्ह्रादं नानाप्रहरणोद्यतम्॥ **7.27.26**॥ 1165

एतस्मिन्नन्तरे शूरा राक्षसा घोरदर्शनाः।
युद्धार्थं समवर्तन्त सचिवा रावणस्य ते॥ **7.27.27**॥ 1166

मारीचश्च प्रहस्तश्च महापार्श्वमहोदरौ।
अकम्पनो निकुम्भश्च शुकः सारण एव च॥ **7.27.28**॥ 1167

संह्रादो धूमकेतुश्च महादंष्ट्रो घटोदरः।
जम्बुमाली महाह्रादो विरूपाक्षश्च राक्षसः॥ **7.27.29**॥ 1168

सुप्तघ्नो यज्ञकोपश्च दुर्मुखो दूषणः खरः।
त्रिशिराः करवीराक्षः सूर्यशत्रुश्च राक्षसः॥ **7.27.30**॥ 1169

महाकायोऽतिकायश्च देवान्तकनरान्तकौ।
एतैः सर्वैः परिवृतो महावीर्यैर्महाबलः॥ **7.27.31**॥ 1170

रावणस्यार्यकः सैन्यं सुमाली प्रविवेश ह।
स दैवतगणान् सर्वान् नानाप्रहरणैः शितैः॥ **7.27.32**॥ 1171

व्यध्वंसयत् समं क्रुद्धो वायुर्जलधरानिव।
तद् दैवतबलं राम हन्यमानं निशाचरैः॥ **7.27.33**॥ 1172

प्रणुन्नं सर्वतो दिग्भ्यः सिंहनुन्ना मृगा इव।
एतस्मिन्नन्तरे शूरो वसूनामष्टमो वसुः॥ **7.27.34**॥ 1173

सावित्र इति विख्यातः प्रविवेश रणाजिरम्।
सैन्यैः परिवृतो हृष्टैर्नानाप्रहरणोद्यतैः॥ **7.27.35**॥ 1174

त्रासयञ्शत्रुसैन्यानि प्रविवेश रणाजिरम्।
तथादित्यौ महावीर्यौ त्वष्टा पूषा च तौ समम्॥ **7.27.36**॥ 1175

निर्भयौ सह सैन्येन तदा प्राविशतां रणे।
ततो युद्धं समभवत् सुराणां सह राक्षसैः॥ **7.27.37**॥ 1176

क्रुद्धानां रक्षसां कीर्तिं समरेष्वनिवर्तिनाम्।
ततस्ते राक्षसाः सर्वे विबुधान् समरे स्थितान्॥ **7.27.38**॥ 1177

नानाप्रहरणैर्घोरैर्जघ्नुः शतसहस्रशः।
देवाश्च राक्षसान् घोरान् महाबलपराक्रमान्॥ **7.27.39**॥ 1178

समरे विमलैः शस्त्रैरुपनिन्युर्यमक्षयम्।
एतस्मिन्नन्तरे राम सुमाली नाम राक्षसः॥ **7.27.40**॥ 1179

नानाप्रहरणैः क्रुद्धस्तत्सैन्यं सोऽभ्यवर्तत।
स दैवतबलं सर्वं नानाप्रहरणैः शितैः॥ **7.27.41**॥ 1180

व्यध्वंसयत सङ्क्रुद्धो वायुर्जलधरं यथा।
ते महाबाणवर्षैश्च शूलप्रासैः सुदारुणैः॥ **7.27.42**॥ 1181

हन्यमानाः सुराः सर्वे न व्यतिष्ठन्त संहताः।
ततो विद्राव्यमाणेषु दैवतेषु सुमालिना॥ **7.27.43**॥ 1182

वसूनामष्टमः क्रुद्धः सावित्रो वै व्यवस्थितः।
संवृतः स्वैरथानीकैः प्रहरन्तं निशाचरम्॥ **7.27.44**॥ 1183

विक्रमेण महातेजा वारयामास संयुगे।
ततस्तयोर्महद् युद्धमभवल्लोमहर्षणम्॥ **7.27.45**॥ 1184

सुमालिनो वसोश्चैव समरेष्वनिवर्तिनोः।
ततस्तस्य महाबाणैर्वसुना सुमहात्मना॥ **7.27.46**॥ 1185

निहतः पन्नगरथः क्षणेन विनिपातितः।
हत्वा तु संयुगे तस्य रथं बाणशतैश्चितम्॥ **7.27.47**॥ 1186

गदां तस्य वधार्थाय वसुर्जग्राह पाणिना।
ततः प्रगृह्य दीप्ताग्रां कालदण्डोपमां गदाम्॥ **7.27.48**॥ 1187

तां मूर्ध्नि पातयामास सावित्रो वै सुमालिनः।
सा तस्योपरि चोल्काभा पतन्ती विबभौ गदा॥ **7.27.49**॥ 1188

इन्द्रप्रमुक्ता गर्जन्ती गिराविव महाशनिः।
तस्य नैवास्थि न शिरो न मांसं ददृशे तदा॥ **7.27.50**॥ 1189

गदया भस्मतां नीतं निहतस्य रणाजिरे।
तं दृष्ट्वा निहतं सङ्ख्ये राक्षसास्ते समन्ततः॥ **7.27.51**॥ 1190

व्यद्रवन् सहिताः सर्वे क्रोशमानाः परस्परम्।
विद्राव्यमाणा वसुना राक्षसा नावतस्थिरे॥ **7.27.52**॥ 1191

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाविंशः सर्गः ॥

मेघनादजयन्तयोर्युद्धं पुलोम्ना जयन्तस्यान्यत्रापनयनमिन्द्रस्य रणभूमौ प्रवेशो रुद्रैर्मरुद्भिश्च राक्षससेनायाः संहार इन्द्ररावणयोर्युद्धम्

सुमालिनं हतं दृष्ट्वा वसुना भस्मसात्कृतम्।
स्वसैन्यं विद्रुतं चापि लक्षयित्वार्दितं सुरैः॥ **7.28.1** ॥ 1192

ततः स बलवान् क्रुद्धो रावणस्य सुतस्तदा।
निवर्त्य राक्षसान् सर्वान् मेघनादो व्यवस्थितः॥ **7.28.2** ॥ 1193

स रथेनाग्निवर्णेन कामगेन महारथः।
अभिदुद्राव सेनां तां वनान्यग्निरिव ज्वलन्॥ **7.28.3** ॥ 1194

ततः प्रविशतस्तस्य विविधायुधधारिणः।
विदुद्रुवुर्दिशः सर्वा दर्शनादेव देवताः॥ **7.28.4** ॥ 1195

न बभूव तदा कश्चिद् युयुत्सोरस्य सम्मुखे।
सर्वानाविद्ध्य वित्रस्तांस्ततः शक्रोऽब्रवीत् सुरान्॥ **7.28.5** ॥ 1196

न भेतव्यं न गन्तव्यं निवर्तध्वं रणे सुराः।
एष गच्छति पुत्रो मे युद्धार्थमपराजितः॥ **7.28.6** ॥ 1197

ततः शक्रसुतो देवो जयन्त इति विश्रुतः।
रथेनाद्भुतकल्पेन सङ्ग्रामे सोऽभ्यवर्तत॥ **7.28.7** ॥ 1198

ततस्ते त्रिदशाः सर्वे परिवार्य शचीसुतम्।
रावणस्य सुतं युद्धे समासाद्य प्रजघ्निरे॥ **7.28.8**॥ 1199

तेषां युद्धं समभवत् सदृशं देवरक्षसाम्।
महेन्द्रस्य च पुत्रस्य राक्षसेन्द्रसुतस्य च॥ **7.28.9**॥ 1200

ततो मातलिपुत्रस्य गोमुखस्य स रावणिः।
सारथेः पातयामास शरान् कनकभूषणान्॥ **7.28.10**॥ 1201

शचीसुतश्चापि तथा जयन्तस्तस्य सारथिम्।
तं चापि रावणिः क्रुद्धः समन्तात् प्रत्यविध्यत॥ **7.28.11**॥ 1202

स हि क्रोधसमाविष्टो बली विस्फारितेक्षणः।
रावणिः शक्रतनयं शरवर्षैरवाकिरत्॥ **7.28.12**॥ 1203

ततो नानाप्रहरणाञ्छितधारान् सहस्रशः।
पातयामास सङ्क्रुद्धः सुरसैन्येषु रावणिः॥ **7.28.13**॥ 1204

शतघ्नीमुसलप्रासगदाखड्गपरश्वधान्।
महान्ति गिरिशृङ्गाणि पातयामास रावणिः॥ **7.28.14**॥ 1205

ततः प्रव्यथिता लोकाः सञ्जज्ञे च तमस्ततः।
तस्य रावणपुत्रस्य शत्रुसैन्यानि निघ्नतः॥ **7.28.15**॥ 1206

ततस्तद् दैवतबलं समन्तात् तं शचीसुतम्।
बहुप्रकारमस्वस्थमभवच्छरपीडितम्॥ **7.28.16**॥ 1207

नाभ्यजानन्त चान्योन्यं रक्षो वा देवताथवा।
तत्र तत्र विपर्यस्तं समन्तात् परिधावत॥ **7.28.17**॥ 1208

देवा देवान् निजघ्नुस्ते राक्षसान् राक्षसास्तथा।
सम्मूढास्तमसाच्छन्ना व्यद्रवन्नपरे तथा॥ **7.28.18**॥ 1209

एतस्मिन्नन्तरे वीरः पुलोमा नाम वीर्यवान्।
दैत्येन्द्रस्तेन सङ्गृह्य शचीपुत्रोऽपवाहितः॥ **7.28.19**॥ 1210

सङ्गृह्य तं तु दौहित्रं प्रविष्टः सागरं तदा।
आर्यकः स हि तस्यासीत् पुलोमा येन सा शची॥ **7.28.20**॥ 1211

ज्ञात्वा प्रणाशं तु तदा जयन्तस्याथ देवताः।
अप्रहृष्टास्ततः सर्वा व्यथिताः सम्प्रदुद्रुवुः॥ **7.28.21**॥ 1212

रावणिस्त्वथ सङ्क्रुद्धो बलैः परिवृतः स्वकैः।
अभ्यधावत देवांस्तान् मुमोच च महास्वनम्॥ **7.28.22**॥ 1213

दृष्ट्वा प्रणाशं पुत्रस्य दैवतेषु च विद्रुतम्।
मातलिं चाह देवेशो रथः समुपनीयताम्॥ **7.28.23**॥ 1214

स तु दिव्यो महाभीमः सज्ज एव महारथः।
उपस्थितो मातलिना वाह्यमानो महाजवः॥ **7.28.24**॥ 1215

ततो मेघा रथे तस्मिंस्तडित्त्वन्तो महाबलाः।
अग्रतो वायुचपला नेदुः परमनिःस्वनाः॥ **7.28.25**॥ 1216

नानावाद्यानि वाद्यन्त गन्धर्वाश्च समाहिताः।
ननृतुश्चाप्सरःसङ्घा निर्याते त्रिदशेश्वरे॥ **7.28.26**॥ 1217

रुद्रैर्वसुभिरादित्यैरश्विभ्यां समरुद्गणैः।
वृतो नानाप्रहरणैर्निर्ययौ त्रिदशाधिपः॥ **7.28.27**॥ 1218

निर्गच्छतस्तु शक्रस्य परुषः पवनो ववौ।
भास्करो निष्प्रभश्चैव महोल्काश्च प्रपेदिरे॥ **7.28.28**॥ 1219

एतस्मिन्नन्तरे शूरो दशग्रीवः प्रतापवान्।
आरुरोह रथं दिव्यं निर्मितं विश्वकर्मणा॥ **7.28.29**॥ 1220

पन्नगैः सुमहाकायैर्वेष्टितं लोमहर्षणैः।
येषां निःश्वासवातेन प्रदीप्तमिव संयुगे॥ **7.28.30**॥ 1221

दैत्यैर्निशाचरैश्चैव स रथः परिवारितः।
समराभिमुखो दिव्यो महेन्द्रं सोऽभ्यवर्तत॥ **7.28.31**॥ 1222

पुत्रं तं वारयित्वा तु स्वयमेव व्यवस्थितः।
सोऽपि युद्धाद् विनिष्क्रम्य रावणिः समुपाविशत्॥ **7.28.32**॥ 1223

ततो युद्धं प्रवृत्तं तु सुराणां राक्षसैः सह।
शस्त्राणि वर्षतां तेषां मेघानामिव संयुगे॥ **7.28.33**॥ 1224

कुम्भकर्णस्तु दुष्टात्मा नानाप्रहरणोद्यतः।
नाज्ञायत तदा राजन् युद्धं केनाभ्यपद्यत॥ **7.28.34**॥ 1225

दन्तैः पादैर्भुजैर्हस्तैः शक्तितोमरमुद्गरैः।
येन तेनैव सङ्क्रुद्धस्ताडयामास देवताः॥ **7.28.35**॥ 1226

स तु रुद्रैर्महाघोरैः सङ्गम्याथ निशाचरः।
प्रयुद्धस्तैश्च सङ्ग्रामे क्षतः शस्त्रैर्निरन्तरम्॥ **7.28.36**॥ 1227

बभौ शस्त्राचिततनुः कुम्भकर्णः क्षरन्नसृक्।
विद्युत्स्तनितनिर्घोषो धारावानिव तोयदः॥ **7.28.37**॥ 1228

ततस्तद् राक्षसं सैन्यं प्रयुद्धं समरुद्गणैः।
रणे विद्रावितं सर्वं नानाप्रहरणैस्तदा॥ **7.28.38**॥ 1229

केचिद् विनिहताः कृत्ताश्चेष्टन्ति स्म महीतले।
वाहनेष्ववसक्ताश्च स्थिता एवापरे रणे॥ **7.28.39**॥ 1230

रथान् नागान् खरानुष्ट्रान् पन्नगांस्तुरगांस्तथा।
शिशुमारान् वराहांश्च पिशाचवदनानपि॥ **7.28.40**॥ 1231

तान् समालिङ्ग्य बाहुभ्यां विष्टब्धाः केचिदुत्थिताः।
देवैस्तु शस्त्रसम्भिन्ना मम्रिरे च निशाचराः॥ **7.28.41**॥ 1232

चित्रकर्म इवाभाति सर्वेषां रणसम्प्लवः।
निहतानां प्रसुप्तानां राक्षसानां महीतले॥ **7.28.42**॥ 1233

शोणितोदकनिष्पन्दा काकगृध्रसमाकुला।
प्रवृत्ता संयुगमुखे शस्त्रग्राहवती नदी॥ **7.28.43**॥ 1234

एतस्मिन्नन्तरे क्रुद्धो दशग्रीवः प्रतापवान्।
निरीक्ष्य तु बलं सर्वं दैवतैर्विनिपातितम्॥ **7.28.44**॥ 1235

स तं प्रतिविगाह्याशु प्रवृद्धं सैन्यसागरम्।
त्रिदशान् समरे निघ्नञ्शक्रमेवाभ्यवर्तत॥ **7.28.45**॥ 1236

ततः शक्रो महच्चापं विस्फार्य सुमहास्वनम्।
यस्य विस्फारनिर्घोषैः स्तनन्ति स्म दिशो दश॥ **7.28.46**॥ 1237

तद् विकृष्य महच्चापमिन्द्रो रावणमूर्धनि।
पातयामास स शरान् पावकादित्यवर्चसः॥ **7.28.47**॥ 1238

तथैव च महाबाहुर्दशग्रीवो निशाचरः।
शक्रं कार्मुकविभ्रष्टैः शरवर्षैरवाकिरत्॥ **7.28.48**॥ 1239

प्रयुध्यतोरथ तयोर्बाणवर्षैः समन्ततः।
नाज्ञायत तदा किञ्चित् सर्वं हि तमसा वृतम्॥ **7.28.49**॥ 1240

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनत्रिंशः सर्गः ॥

रावणस्य देवसेनामध्यतो निर्गमनं तं निग्रहीतुं देवानां प्रयत्नो मेघनादेन माययेन्द्रस्य निग्रहणं विजयमुपेतस्य तस्य सेनया सह लङ्कां प्रति प्रस्थानम्

ततस्तमसि सञ्जाते सर्वे ते देवराक्षसाः।
अयुद्ध्यन्त बलोन्मत्ताः सूदयन्तः परस्परम्॥ **7.29.1**॥ 1241

ततस्तु देवसैन्येन राक्षसानां बृहद् बलम्।
दशांशं स्थापितं युद्धे शेषं नीतं यमक्षयम्॥ **7.29.2**॥ 1242

तस्मिंस्तु तामसे युद्धे सर्वे ते देवराक्षसाः।
अन्योन्यं नाभ्यजानन्त युद्ध्यमानाः परस्परम्॥ **7.29.3**॥ 1243

इन्द्रश्च रावणश्चैव रावणिश्च महाबलः।
तस्मिंस्तमोजालवृते मोहमीयुर्न ते त्रयः॥ **7.29.4**॥ 1244

स तु दृष्ट्वा बलं सर्वं रावणो निहतं क्षणात्।
क्रोधमभ्यगमत् तीव्रं महानादं च मुक्तवान्॥ **7.29.5**॥ 1245

क्रोधात् सूतं च दुर्धर्षः स्यन्दनस्थमुवाच ह।
परसैन्यस्य मध्येन यावदन्तो नयस्व माम्॥ **7.29.6**॥ 1246

अद्यैतान् त्रिदशान् सर्वान् विक्रमैः समरे स्वयम्।
नानाशस्त्रमहासारैर्नयामि यमसादनम्॥ **7.29.7**॥ 1247

अहमिन्द्रं वधिष्यामि धनदं वरुणं यमम्।
त्रिदशान् विनिहत्याशु स्वयं स्थास्याम्यथोपरि॥ **7.29.8**॥ 1248

विषादो नैव कर्तव्यः शीघ्रं वाहय मे रथम्।
द्विः खलु त्वां ब्रवीम्यद्य यावदन्तं नयस्व माम्॥ **7.29.9**॥ 1249

अयं स नन्दनोद्देशो यत्र वर्तावहे वयम्।
नय मामद्य तत्र त्वमुदयो यत्र पर्वतः॥ **7.29.10**॥ 1250

तस्य तद् वचनं श्रुत्वा तुरगान् स मनोजवान्।
आदिदेशाथ शत्रूणां मध्येनैव च सारथिः॥ **7.29.11**॥ 1251

तस्य तं निश्चयं ज्ञात्वा शक्रो देवेश्वरस्तदा।
रथस्थः समरस्थस्तान् देवान् वाक्यमथाब्रवीत्॥ **7.29.12**॥ 1252

सुराः शृणुत मद्वाक्यं यत् तावन्मम रोचते।
जीवन्नेव दशग्रीवः साधु रक्षो निगृह्यताम्॥ **7.29.13**॥ 1253

एष ह्यतिबलः सैन्ये रथेन पवनौजसा।
गमिष्यति प्रवृद्धोर्मिः समुद्र इव पर्वणि॥ **7.29.14**॥ 1254

नह्येष हन्तुं शक्योऽद्य वरदानात् सुनिर्भयः।
तद् ग्रहीष्यामहे रक्षो यत्ता भवत संयुगे॥ **7.29.15**॥ 1255

यथा बलौ निरुद्धे च त्रैलोक्यं भुज्यते मया।
एवमेतस्य पापस्य निरोधो मम रोचते॥ **7.29.16**॥ 1256

ततोऽन्यं देशमास्थाय शक्रः सन्त्यज्य रावणम्।
अयुध्यत महाराज राक्षसांस्त्रासयन् रणे॥ **7.29.17**॥ 1257

उत्तरेण दशग्रीवः प्रविवेशानिवर्तकः।
दक्षिणेन तु पार्श्वेन प्रविवेश शतक्रतुः॥ **7.29.18**॥ 1258

ततः स योजनशतं प्रविष्टो राक्षसाधिपः।
देवतानां बलं सर्वं शरवर्षैरवाकिरत्॥ **7.29.19**॥ 1259

ततः शक्रो निरीक्ष्याथ प्रणष्टं तु स्वकं बलम्।
न्यवर्तयदसभ्भ्रान्तः समावृत्य दशाननम्॥ **7.29.20**॥ 1260

एतस्मिन्नन्तरे नादो मुक्तो दानवराक्षसैः।
हा हताः स्म इति ग्रस्तं दृष्ट्वा शक्रेण रावणम्॥ **7.29.21**॥ 1261

ततो रथं समास्थाय रावणिः क्रोधमूर्च्छितः।
तत् सैन्यमतिसङ्क्रुद्धः प्रविवेश सुदारुणम्॥ **7.29.22**॥ 1262

तां प्रविश्य महामायां प्राप्तां पशुपतेः पुरा।
प्रविवेश सुसंरब्धस्तत् सैन्यं समभिद्रवत्॥ **7.29.23**॥ 1263

स सर्वा देवतास्त्यक्त्वा शक्रमेवाभ्यधावत।
महेन्द्रश्च महातेजा नापश्यच्च सुतं रिपोः॥ **7.29.24**॥ 1264

विमुक्तकवचस्तत्र वध्यमानोऽपि रावणिः।
त्रिदशैः सुमहावीर्यैर्न चकार च किञ्चन॥ **7.29.25**॥ 1265

स मातलिं समायान्तं ताडयित्वा शरोत्तमैः।
महेन्द्रं बाणवर्षेण भूय एवाभ्यवाकिरत्॥ **7.29.26**॥ 1266

ततस्त्यक्त्वा रथं शक्रो विससर्ज च सारथिम्।
ऐरावतं समारुह्य मृगयामास रावणिम्॥ **7.29.27**॥ 1267

स तत्र मायाबलवानदृश्योऽथान्तरिक्षगः।
इन्द्रं मायापरिक्षिप्तं कृत्वा स प्राद्रवच्छरैः॥ **7.29.28**॥ 1268

स तं यदा परिश्रान्तमिन्द्रं जज्ञेऽथ रावणिः।
तदैनं मायया बद्ध्वा स्वसैन्यमभितोऽनयत्॥ **7.29.29**॥ 1269

तं तु दृष्ट्वा बलात् तेन नीयमानं महारणात्।
महेन्द्रममराः सर्वे किं नु स्यादित्यचिन्तयन्॥ **7.29.30**॥ 1270

दृश्यते न स मायावी शक्रजित् समितिञ्जयः।
विद्यावानपि येनेन्द्रो माययापहतो बलात्॥ **7.29.31**॥ 1271

एतस्मिन्नन्तरे क्रुद्धाः सर्वे सुरगणास्तदा।
रावणं विमुखीकृत्य शरवर्षैरवाकिरन्॥ **7.29.32**॥ 1272

रावणस्तु समासाद्य आदित्यांश्च वसूंस्तदा।
न शशाक स सङ्ग्रामे योद्धुं शत्रुभिरर्दितः॥ **7.29.33**॥ 1273

स तं दृष्ट्वा परिम्लानं प्रहारैर्जर्जरीकृतम्।
रावणिः पितरं युद्धेऽदर्शनस्थोऽब्रवीदिदम्॥ **7.29.34**॥ 1274

आगच्छ तात गच्छामो रणकर्म निवर्तताम्।
जितं नो विदितं तेऽस्तु स्वस्थो भव गतज्वरः॥ **7.29.35**॥ 1275

अयं हि सुरसैन्यस्य त्रैलोक्यस्य च यः प्रभुः।
स गृहीतो देवबलाद् भग्नदर्पाः सुराः कृताः॥ **7.29.36**॥ 1276

यथेष्टं भुङ्क्ष्व लोकांस्त्रीन् निगृह्यारातिमोजसा।
वृथा किं ते श्रमेणेह युद्धमद्य तु निष्फलम्॥ **7.29.37**॥ 1277

ततस्ते दैवतगणा निवृत्ता रणकर्मणः।
तच्छ्रुत्वा रावणेर्वाक्यं शक्रहीनाः सुरा गताः॥ **7.29.38**॥ 1278

अथ रणविगतः स उत्तमौजा -
स्त्रिदशरिपुः प्रथितो निशाचरेन्द्रः।

स्वसुतवचनमादृतः प्रियं तत्
समनुनिशम्य जगाद चैव सूनुम्॥ **7.29.39**॥ 1279

अतिबलसदृशैः पराक्रमैस्त्वं
मम कुलवंशविवर्धनः प्रभो।
यदयमतुल्यबलस्त्वयाद्य वै
त्रिदशपतिस्त्रिदशाश्च निर्जिताः॥ **7.29.40**॥ 1280

नय रथमधिरोप्य वासवं नगर -
मितो व्रज सेनया वृतस्त्वम्।
अहमपि तव पृष्ठतो द्रुतं
सह सचिवैरनुयामि हृष्टवत्॥ **7.29.41**॥ 1281

अथ स बलवृतः सवाहन -
स्त्रिदशपतिं परिगृह्य रावणिः।
स्वभवनमधिगम्य वीर्यवान्
कृतसमरान् विससर्ज राक्षसान्॥ **7.29.42**॥ 1282

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिंशः सर्गः ॥

ब्रह्मणेन्द्रजिते वरं प्रदाय तद्बन्धनत इन्द्रस्य मोचनं तदीयं पूर्वकृतमघं स्मारयित्वा तत्कर्तृकवैष्णवयागस्यानुष्ठानाय सम्मतिदानं तं यज्ञं पूरयित्वेन्द्रस्य स्वर्गलोके गमनम्

जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै।
प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा॥ **7.30.1** ॥ 1283

तत्र रावणमासाद्य पुत्रभ्रातृभिरावृतम्।
अब्रवीद् गगने तिष्ठन् सामपूर्वं प्रजापतिः॥ **7.30.2** ॥ 1284

वत्स रावण तुष्टोऽस्मि पुत्रस्य तव संयुगे।
अहोऽस्य विक्रमौदार्यं तव तुल्योऽधिकोऽपि वा॥ **7.30.3** ॥ 1285

जितं हि भवता सर्वं त्रैलोक्यं स्वेन तेजसा।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि ससुतस्य ते॥ **7.30.4** ॥ 1286

अयं च पुत्रोऽतिबलस्तव रावण वीर्यवान्।
जगतीन्द्रजिदित्येव परिख्यातो भविष्यति॥ **7.30.5** ॥ 1287

बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः।
यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे॥ **7.30.6** ॥ 1288

तन्मुच्यतां महाबाहो महेन्द्रः पाकशासनः।
किं चास्य मोक्षणार्थाय प्रयच्छन्तु दिवौकसः॥ **7.30.7**॥ 1289

अथाब्रवीन्महातेजा इन्द्रजित् समितिञ्जयः।
अमरत्वमहं देव वृणे यद्येष मुच्यते॥ **7.30.8**॥ 1290

ततोऽब्रवीन्महातेजा मेघनादं प्रजापतिः।
नास्ति सर्वामरत्वं हि कस्यचित् प्राणिनो भुवि॥ **7.30.9**॥ 1291

पक्षिणश्चतुष्पदो वा भूतानां वा महौजसाम्।
श्रुत्वा पितामहेनोक्तमिन्द्रजित् प्रभुणाव्ययम्॥ **7.30.10**॥ 1292

अथाब्रवीत् स तत्रस्थं मेघनादो महाबलः।
श्रूयतां या भवेत् सिद्धिः शतक्रतुविमोक्षणे॥ **7.30.11**॥ 1293

ममेष्टं नित्यशो हव्यैर्मन्त्रैः सम्पूज्य पावकम्।
सङ्ग्राममवतर्तुं च शत्रुनिर्जयकाङ्क्षिणः॥ **7.30.12**॥ 1294

अश्वयुक्तो रथो मह्यमुत्तिष्ठेत् तु विभावसोः।
तत्स्थस्यामरता स्यान्मे एष मे निश्चितो वरः॥ **7.30.13**॥ 1295

तस्मिन् यद्यसमाप्ते च जप्यहोमे विभावसौ।
युध्येयं देव सङ्ग्रामे तदा मे स्याद् विनाशनम्॥ **7.30.14**॥ 1296

सर्वो हि तपसा देव वृणोत्यमरतां पुमान्।
विक्रमेण मया त्वेतदमरत्वं प्रवर्तितम्॥ **7.30.15**॥ 1297

एवमस्त्विति तं चाह वाक्यं देवः पितामहः।
मुक्तश्चेन्द्रजिता शक्रो गताश्च त्रिदिवं सुराः॥ **7.30.16**॥ 1298

एतस्मिन्नन्तरे राम दीनो भ्रष्टामरद्युतिः।
इन्द्रश्चिन्तापरीतात्मा ध्यानतत्परतां गतः॥ **7.30.17**॥ 1299

तं तु दृष्ट्वा तथाभूतं प्राह देवः पितामहः।
शतक्रतो किमु पुरा करोति स्म सुदुष्कृतम्॥ **7.30.18**॥ 1300

अमरेन्द्र मया बुद्ध्या प्रजाः सृष्टास्तथा प्रभो।
एकवर्णाः समाभाषा एकरूपाश्च सर्वशः॥ **7.30.19**॥ 1301

तासां नास्ति विशेषो हि दर्शने लक्षणेऽपि वा।
ततोऽहमेकाग्रमनास्ताः प्रजाः समचिन्तयम्॥ **7.30.20**॥ 1302

सोऽहं तासां विशेषार्थं स्त्रियमेकां विनिर्ममे।
यद् यत् प्रजानां प्रत्यक्षं विशिष्टं तत् तदुद्धृतम्॥ **7.30.21**॥ 1303

ततो मया रूपगुणैरहल्या स्त्री विनिर्मिता।
हलं नामेह वैरूप्यं हल्यं तत्प्रभवं भवेत्॥ **7.30.22**॥ 1304

यस्या न विद्यते हल्यं तेनाहल्येति विश्रुता।
अहल्येत्येव च मया तस्या नाम प्रकीर्तितम्॥ **7.30.23**॥ 1305

निर्मितायां च देवेन्द्र तस्यां नार्यां सुरर्षभ।
भविष्यतीति कस्यैषा मम चिन्ता ततोऽभवत्॥ **7.30.24**॥ 1306

त्वं तु शक्र तदा नारी जानीषे मनसा प्रभो।
स्थानाधिकतया पत्नी ममैषेति पुरन्दर॥ **7.30.25**॥ 1307

सा मया न्यासभूता तु गौतमस्य महात्मनः।
न्यस्ता बहूनि वर्षाणि तेन निर्यातिता च ह॥ **7.30.26**॥ 1308

ततस्तस्य परिज्ञाय महास्थैर्यं महामुनेः।
ज्ञात्वा तपसि सिद्धिं च पत्न्यर्थं स्पर्शिता तदा॥ **7.30.27**॥ 1309

स तया सह धर्मात्मा रमते स्म महामुनिः।
आसन्निराशा देवास्तु गौतमे दत्तया तया॥ **7.30.28**॥ 1310

त्वं क्रुद्धस्त्विह कामात्मा गत्वा तस्याश्रमं मुनेः।
दृष्टवांश्च तदा तां स्त्रीं दीप्तामग्निशिखामिव॥ **7.30.29**॥ 1311

सा त्वया धर्षिता शक्र कामार्तेन समन्युना।
दृष्टस्त्वं स तदा तेन आश्रमे परमर्षिणा॥ **7.30.30**॥ 1312

ततः क्रुद्धेन तेनासि शप्तः परमतेजसा।
गतोऽसि येन देवेन्द्र दशाभागविपर्ययम्॥ **7.30.31**॥ 1313

यस्मान्मे धर्षिता पत्नी त्वया वासव निर्भयात्।
तस्मात् त्वं समरे शक्र शत्रुहस्तं गमिष्यसि॥ **7.30.32**॥ 1314

अयं तु भावो दुर्बुद्धे यस्त्वयेह प्रवर्तितः।
मानुषेष्वपि लोकेषु भविष्यति न संशयः॥ **7.30.33**॥ 1315

तत्रार्धं तस्य यः कर्ता त्वय्यर्धं निपतिष्यति।
न च ते स्थावरं स्थानं भविष्यति न संशयः॥ **7.30.34**॥ 1316

यश्च यश्च सुरेन्द्रः स्याद् ध्रुवः स न भविष्यति।
एष शापो मया मुक्त इत्यसौ त्वां तदाब्रवीत्॥ **7.30.35**॥ 1317

तां तु भार्यां सुनिर्भर्त्स्य सोऽब्रवीत् सुमहातपाः।
दुर्विनीते विनिध्वंस ममाश्रमसमीपतः॥ **7.30.36**॥ 1318

रूपयौवनसम्पन्ना यस्मात् त्वमनवस्थिता।
तस्माद् रूपवती लोके न त्वमेका भविष्यति॥ **7.30.37**॥ 1319

रूपं च ते प्रजाः सर्वा गमिष्यन्ति न संशयः।
यत् तदेकं समाश्रित्य विभ्रमोऽयमुपस्थितः॥ **7.30.38**॥ 1320

तदाप्रभृति भूयिष्ठं प्रजा रूपसमन्विता।
सा तं प्रसादयामास महर्षिं गौतमं तदा॥ **7.30.39**॥ 1321

अज्ञानाद् धर्षिता विप्र त्वद्रूपेण दिवौकसा।
न कामकाराद् विप्रर्षे प्रसादं कर्तुमर्हसि॥ **7.30.40**॥ 1322

अहल्यया त्वेवमुक्तः प्रत्युवाच स गौतमः।
उत्पत्स्यति महातेजा इक्ष्वाकूणां महारथः॥ **7.30.41**॥ 1323

रामो नाम श्रुतो लोके वनं चाप्युपयास्यति।
ब्राह्मणार्थे महाबाहुर्विष्णुर्मानुषविग्रहः॥ **7.30.42**॥ 1324

तं द्रक्ष्यसि यदा भद्रे ततः पूता भविष्यसि।
स हि पावयितुं शक्तस्त्वया यद् दुष्कृतं कृतम्॥ **7.30.43**॥ 1325

तस्यातिथ्यं च कृत्वा वै मत्समीपं गमिष्यसि।
वत्स्यसि त्वं मया सार्धं तदा हि वरवर्णिनि॥ **7.30.44**॥ 1326

एवमुक्त्वा स विप्रर्षिराजगाम स्वमाश्रमम्।
तपश्चचार सुमहत् सा पत्नी ब्रह्मवादिनः॥ **7.30.45**॥ 1327

शापोत्सर्गाद्धि तस्येदं मुनेः सर्वमुपस्थितम्।
तत् स्मर त्वं महाबाहो दुष्कृतं यत् त्वया कृतम्॥ **7.30.46**॥ 1328

तेन त्वं ग्रहणं शत्रोर्यातो नान्येन वासव।
शीघ्रं वै यज यज्ञं त्वं वैष्णवं सुसमाहितः॥ **7.30.47**॥ 1329

पावितस्तेन यज्ञेन यास्यसे त्रिदिवं ततः।
पुत्रश्च तव देवेन्द्र न विनष्टो महारणे॥ **7.30.48**॥ 1330

नीतः सन्निहितश्चैव आर्यकेण महोदधौ।
एतच्छ्रुत्वा महेन्द्रस्तु यज्ञमिष्ट्वा च वैष्णवम्॥ **7.30.49**॥ 1331

पुनस्त्रिदिवमाक्रामदन्वशासच्च देवराट्।
एतदिन्द्रजितो नाम बलं यत् कीर्तितं मया॥ **7.30.50**॥ 1332

निर्जितस्तेन देवेन्द्रः प्राणिनोऽन्ये तु किं पुनः।
आश्चर्यमिति रामश्च लक्ष्मणश्चाब्रवीत् तदा॥ **7.30.51**॥ 1333

अगस्त्यवचनं श्रुत्वा वानरा राक्षसास्तदा।
विभीषणस्तु रामस्य पार्श्वस्थो वाक्यमब्रवीत्॥ **7.30.52**॥ 1334

आश्चर्यं स्मारितोऽस्म्यद्य यत् तद् दृष्टं पुरातनम्।
अगस्त्यं त्वब्रवीद् रामः सत्यमेतच्छ्रुतं च मे॥ **7.30.53**॥ 1335

एवं राम समुद्भूतो रावणो लोककण्टकः।
सपुत्रो येन सङ्ग्रामे जितः शक्रः सुरेश्वरः॥ **7.30.54**॥ 1336

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकत्रिंशः सर्गः ॥

रावणस्य माहिष्मत्यां गमनं तत्रत्यं राजानमर्जुनमनुपलभ्य मन्त्रिभिः सह तेन विन्ध्यगिरिपार्श्वे नर्मदायां स्नात्वा भगवतः शिवस्य समाराधनम्

ततो रामो महातेजा विस्मयात् पुनरेव हि।
उवाच प्रणतो वाक्यमगस्त्यमृषिसत्तमम्॥ **7.31.1**॥ 1337

भगवन् राक्षसः क्रूरो यदाप्रभृति मेदिनीम्।
पर्यटत् किं तदा लोकाः शून्या आसन् द्विजोत्तम॥ **7.31.2**॥ 1338

राजा वा राजमात्रो वा किं तदा नात्र कश्चन।
धर्षणं यत्र न प्राप्तो रावणो राक्षसेश्वरः॥ **7.31.3**॥ 1339

उताहो हतवीर्यास्ते बभूवुः पृथिवीक्षितः।
बहिष्कृता वरास्त्रैश्च बहवो निर्जिता नृपाः॥ **7.31.4**॥ 1340

राघवस्य वचः श्रुत्वा अगस्त्यो भगवानृषिः।
उवाच रामं प्रहसन् पितामह इवेश्वरम्॥ **7.31.5**॥ 1341

इत्येवं बाधमानस्तु पार्थिवान् पार्थिवर्षभ।
चचार रावणो राम पृथिवीं पृथिवीपते॥ **7.31.6**॥ 1342

ततो माहिष्मतीं नाम पुरीं स्वर्गपुरीप्रभाम्।
सम्प्राप्तो यत्र सान्निध्यं सदासीद् वसुरेतसः॥ **7.31.7**॥ 1343

तुल्य आसीन्नृपस्तस्य प्रभावाद् वसुरेतसः।
अर्जुनो नाम यत्राग्निः शरकुण्डेशयः सदा॥ **7.31.8**॥ 1344

तमेव दिवसं सोऽथ हैहयाधिपतिर्बली।
अर्जुनो नर्मदां रन्तुं गतः स्त्रीभिः सहेश्वरः॥ **7.31.9**॥ 1345

तमेव दिवसं सोऽथ रावणस्तत्र आगतः।
रावणो राक्षसेन्द्रस्तु तस्यामात्यानपृच्छत॥ **7.31.10**॥ 1346

क्वार्जुनो नृपतिः शीघ्रं सम्यगाख्यातुमर्हथ।
रावणोऽहमनुप्राप्तो युद्धेप्सुर्नृवरेण ह॥ **7.31.11**॥ 1347

ममागमनमप्यग्रे युष्माभिः सन्निवेद्यताम्।
इत्येवं रावणेनोक्तास्तेऽमात्याः सुविपश्चितः॥ **7.31.12**॥ 1348

अब्रुवन् राक्षसपतिमसान्निध्यं महीपतेः।
श्रुत्वा विश्रवसः पुत्रः पौराणामर्जुनं गतम्॥ **7.31.13**॥ 1349

अपसृत्यागतो विन्ध्यं हिमवत्सन्निभं गिरिम्।
स तमभ्रमिवाविष्टमुद्भ्रान्तमिव मेदिनीम्॥ **7.31.14**॥ 1350

अपश्यद् रावणो विन्ध्यमालिखन्तमिवाम्बरम्।
सहस्रशिखरोपेतं सिंहाध्युषितकन्दरम्॥ **7.31.15**॥ 1351

प्रपातपतितैः शीतैः साट्टहासमिवाम्बुभिः।
देवदानवगन्धर्वैः साप्सरोभिः सकिन्नरैः॥ **7.31.16**॥ 1352

स्वस्त्रीभिः क्रीडमानैश्च स्वर्गभूतं महोच्छ्रयम्।
नदीभिः स्यन्दमानाभिः स्फटिकप्रतिमं जलम्॥ **7.31.17**॥ 1353

फणाभिश्चलजिह्वाभिरनन्तमिव विष्ठितम्।
उत्क्रामन्तं दरीवन्तं हिमवत्सन्निभं गिरिम्॥ **7.31.18**॥ 1354

पश्यमानस्ततो विन्ध्यं रावणो नर्मदां ययौ।
चलोपलजलां पुण्यां पश्चिमोदधिगामिनीम्॥ **7.31.19**॥ 1355

महिषैः सृमरैः सिंहैः शार्दूलर्क्षगजोत्तमैः।
उष्णाभितप्तैस्तृषितैः सङ्क्षोभितजलाशयाम्॥ **7.31.20**॥ 1356

चक्रवाकैः सकारण्डैः सहंसजलकुक्कुटैः।
सारसैश्च सदा मत्तैः कूजद्भिः सुसमावृताम्॥ **7.31.21**॥ 1357

फुल्लद्रुमकृतोत्तंसां चक्रवाकयुगस्तनीम्।
विस्तीर्णपुलिनश्रोणीं हंसावलिसुमेखलाम्॥ **7.31.22**॥ 1358

पुष्परेण्वनुलिप्ताङ्गीं जलफेनामलांशुकाम्।
जलावगाहसुस्पर्शीं फुल्लोत्पलसुभेक्षणाम्॥ **7.31.23**॥ 1359

पुष्पकादवरुह्याशु नर्मदां सरितां वराम्।
इष्टामिव वरां नारीमवगाह्य दशाननः॥ **7.31.24**॥ 1360

स तस्याः पुलिने रम्ये नानामुनिनिषेविते।
उपोपविष्टः सचिवैः सार्धं राक्षसपुङ्गवः॥ **7.31.25**॥ 1361

प्रख्याय नर्मदां सोऽथ गङ्गेयमिति रावणः।
नर्मदादर्शने हर्षमाप्तवान् स दशाननः॥ **7.31.26**॥ 1362

उवाच सचिवांस्तत्र सलीलं शुकसारणौ।
एष रश्मिसहस्रेण जगत् कृत्वेव काञ्चनम्॥ **7.31.27**॥ 1363

तीक्ष्णतापकरः सूर्यो नभसो मध्यमास्थितः।
मामासीनं विदित्वैव चन्द्रायति दिवाकरः॥ **7.31.28**॥ 1364

नर्मदाजलशीतश्च सुगन्धिः श्रमनाशनः।
मद्भयादनिलो ह्येष वात्यसौ सुसमाहितः॥ **7.31.29**॥ 1365

इयं वापि सरिच्छ्रेष्ठा नर्मदा नर्मवर्धिनी।
नक्रमीनविहङ्गोर्मिः सभयेवाङ्गना स्थिता॥ **7.31.30**॥ 1366

तद्भवन्तः क्षताः शस्त्रैर्नृपैरिन्द्रसमैर्युधि।
चन्दनस्य रसेनेव रुधिरेण समुक्षिताः॥ **7.31.31**॥ 1367

ते यूयमवगाहध्वं नर्मदां शर्मदां शुभाम्।
सार्वभौममुखा मत्ता गङ्गामिव महागजाः॥ **7.31.32**॥ 1368

अस्यां स्नात्वा महानद्यां पाप्मनो विप्रमोक्ष्यथ।
अहमप्यद्य पुलिने शरदिन्दुसमप्रभे॥ **7.31.33**॥ 1369

पुष्पोपहारं शनकैः करिष्यामि कपर्दिनः।
रावणेनैवमुक्तास्तु प्रहस्तशुकसारणाः॥ **7.31.34**॥ 1370

समहोदरधूम्राक्षा नर्मदां विजगाहिरे।
राक्षसेन्द्रगजैस्तैस्तु क्षोभिता नर्मदा नदी॥ **7.31.35**॥ 1371

वामनाञ्जनपद्माद्यैर्गङ्गा इव महागजैः।
ततस्ते राक्षसाः स्नात्वा नर्मदायां महाबलाः॥ **7.31.36**॥ 1372

उत्तीर्य पुष्पाण्याजह्रुर्बल्यर्थं रावणस्य तु।
नर्मदापुलिने ह्रद्ये शुभ्राभ्रसदृशप्रभे॥ **7.31.37**॥ 1373

राक्षसैस्तु मुहूर्तेन कृतः पुष्पमयो गिरिः।
पुष्पेषूपहृतेष्वेवं रावणो राक्षसेश्वरः॥ **7.31.38**॥ 1374

अवतीर्णो नदी स्नातुं गङ्गामिव महागजः।
तत्र स्नात्वा च विधिवजप्त्वा जप्यमनुत्तमम्॥ **7.31.39**॥ 1375

नर्मदासलिलात् तस्मादुत्ततार स रावणः।
ततः क्लिन्नाम्बरं त्यक्त्वा शुक्लवस्त्रसमावृतः॥ **7.31.40**॥ 1376

रावणं प्राञ्जलिं यान्तमन्वयुः सर्वराक्षसाः।
तद्गतीवशमापन्ना मूर्तिमन्त इवाचलाः॥ **7.31.41**॥ 1377

यत्र यत्र च याति स्म रावणो राक्षसेश्वरः।
जाम्बूनदमयं लिङ्गं तत्र तत्र स्म नीयते॥ **7.31.42**॥ 1378

वालुकावेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः।
अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः॥ **7.31.43**॥ 1379

ततः सतामार्तिहरं परं वरं
वरप्रदं चन्द्रमयूखभूषणम्।
समर्चयित्वा स निशाचरो जगौ
प्रसार्य हस्तान् प्रणनर्त चाग्रतः॥ **7.31.44**॥ 1380

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वात्रिंशः सर्गः ॥

अर्जुनस्य भुजाभिर्नर्मदायाः प्रवाहस्यावरोधो रावणसञ्चितपुष्पोपहारस्य जले वहनं रावणादिनिशाचरैः सहार्जुनस्य युद्धं रावणं निगृह्यार्जुनस्य स्वनगरे प्रस्थानम्

नर्मदापुलिने यत्र राक्षसेन्द्रः स दारुणः।
पुष्पोपहारं कुरुते तस्माद् देशाददूरतः॥ **7.32.1** ॥ 1381

अर्जुनो जयतां श्रेष्ठो माहिष्मत्याः पतिः प्रभुः।
क्रीडते सह नारीभिर्नर्मदातोयमाश्रितः॥ **7.32.2** ॥ 1382

तासां मध्यगतो राजा रराज च तदार्जुनः।
करेणूनां सहस्रस्य मध्यस्थ इव कुञ्जरः॥ **7.32.3** ॥ 1383

जिज्ञासुः स तु बाहूनां सहस्रस्योत्तमं बलम्।
रुरोध नर्मदावेगं बाहुभिर्बहुभिर्वृतः॥ **7.32.4** ॥ 1384

कार्तवीर्यभुजासक्तं तज्जलं प्राप्य निर्मलम्।
कूलोपहारं कुर्वाणं प्रतिस्रोतः प्रधावति॥ **7.32.5** ॥ 1385

समीननक्रमकरः सपुष्पकुशसंस्तरः।
स नर्मदाम्भसो वेगः प्रावृट्काल इवाबभौ॥ **7.32.6** ॥ 1386

स वेगः कार्तवीर्येण सम्प्रेषित इवाभ्भसः।
पुष्पोपहारं सकलं रावणस्य जहार ह॥ **7.32.7**॥ 1387

रावणोऽर्धसमाप्तं तमुत्सृज्य नियमं तदा।
नर्मदां पश्यते कान्तां प्रतिकूलां यथा प्रियाम्॥ **7.32.8**॥ 1388

पश्चिमेन तु तं दृष्ट्वा सागरोद्गारसन्निभम्।
वर्धन्तमभ्भसो वेगं पूर्वामाशां प्रविश्य तु॥ **7.32.9**॥ 1389

ततोऽनुभ्रान्तशकुनां स्वभावे परमे स्थिताम्।
निर्विकाराङ्गनाभासामपश्यद् रावणो नदीम्॥ **7.32.10**॥ 1390

सव्येतरकराङ्गुल्या ह्यशब्दास्यो दशाननः।
वेगप्रभवमन्वेष्टुं सोऽदिशच्छुकसारणौ॥ **7.32.11**॥ 1391

तौ तु रावणसन्दिष्टौ भ्रातरौ शुकसारणौ।
व्योमान्तरगतौ वीरौ प्रस्थितौ पश्चिमामुखौ॥ **7.32.12**॥ 1392

अर्धयोजनमात्रं तु गत्वा तौ रजनीचरौ।
पश्येतां पुरुषं तोये क्रीडन्तं सहयोषितम्॥ **7.32.13**॥ 1393

बृहत्सालप्रतीकाशं तोयव्याकुलमूर्धजम्।
मदरक्तान्तनयनं मदव्याकुलचेतसम्॥ **7.32.14**॥ 1394

नदीं बाहुसहस्रेण रुन्धन्तमरिमर्दनम्।
गिरिं पादसहस्रेण रुन्धन्तमिव मेदिनीम्॥ **7.32.15**॥ 1395

बालानां वरनारीणां सहस्रेण समावृतम्।
समदानां करेणूनां सहस्रेणेव कुञ्जरम्॥ **7.32.16**॥ 1396

तमद्भुततरं दृष्ट्वा राक्षसौ शुकसारणौ।
सन्निवृत्तावुपागम्य रावणं तमथोचतुः॥ **7.32.17**॥ 1397

बृहत्सालप्रतीकाशः कोऽप्यसौ राक्षसेश्वर।
नर्मदां रोधवद् रुद्ध्वा क्रीडापयति योषितः॥ **7.32.18**॥ 1398

तेन बाहुसहस्रेण सन्निरुद्धजला नदी।
सागरोद्वारसङ्काशानुद्वारान् सृजते मुहुः॥ **7.32.19**॥ 1399

इत्येवं भाषमाणौ तौ निशम्य शुकसारणौ।
रावणोऽर्जुन इत्युक्त्वा स ययौ युद्धलालसः॥ **7.32.20**॥ 1400

अर्जुनाभिमुखे तस्मिन् रावणे राक्षसाधिपे।
चण्डः प्रवाति पवनः सनादः सरजस्तथा॥ **7.32.21**॥ 1401

सकृदेव कृतो रावः सरक्तपृषतो घनैः।
महोदरमहापार्श्वधूम्राक्षशुकसारणैः॥ **7.32.22**॥ 1402

संवृतो राक्षसेन्द्रस्तु तत्रागाद् यत्र चार्जुनः।
अदीर्घेणैव कालेन स तदा राक्षसो बली॥ **7.32.23**॥ 1403

तं नर्मदाह्रदं भीममाजगामाञ्जनप्रभः।
स तत्र स्त्रीपरिवृतं वासिताभिरिव द्विपम्॥ **7.32.24**॥ 1404

नरेन्द्रं पश्यते राजा राक्षसानां तदार्जुनम्।
स रोषाद् रक्तनयनो राक्षसेन्द्रो बलोद्धतः॥ **7.32.25**॥ 1405

इत्येवमर्जुनामात्यानाह गम्भीरया गिरा।
अमात्याः क्षिप्रमाख्यात हैहयस्य नृपस्य वै॥ **7.32.26**॥ 1406

युद्धार्थं समनुप्राप्तो रावणो नाम नामतः।
रावणस्य वचः श्रुत्वा मन्त्रिणोऽथार्जुनस्य ते॥ **7.32.27**॥ 1407

उत्तस्थुः सायुधास्तं च रावणं वाक्यमब्रुवन्।
युद्धस्य कालो विज्ञातः साधु भो साधु रावण॥ **7.32.28**॥ 1408

यः क्षीबं स्त्रीगतं चैव योद्धुमुत्सहसे नृपम्।
स्त्रीसमक्षगतं यत् त्वं योद्धुमुत्सहसे नृप॥ **7.32.29**॥ 1409

वासितामध्यगं मत्तं शार्दूल इव कुञ्जरम्।
क्षमस्वाद्य दशग्रीव उष्यतां रजनी त्वया।
युद्धे श्रद्धा तु यद्यस्ति श्वस्तात समरेऽर्जुनम्॥ **7.32.30**॥ 1410

यदि वापि त्वरा तुभ्यं युद्धतृष्णासमावृत।
निपात्यास्मान् रणे युद्धमर्जुनेनोपयास्यसि॥ **7.32.31**॥ 1411

ततस्तै रावणामात्यैरमात्यास्ते नृपस्य तु।
सूदिताश्चापि ते युद्धे भक्षिताश्च बुभुक्षितैः॥ **7.32.32**॥ 1412

ततो हलहलाशब्दो नर्मदातीरगो बभौ।
अर्जुनस्यानुयात्राणां रावणस्य च मन्त्रिणाम्॥ **7.32.33**॥ 1413

इषुभिस्तोमरैः प्रासैस्त्रिशूलैर्वज्रकर्षणैः।
सरावणानर्दयन्तः समन्तात् समभिद्रुताः॥ **7.32.34**॥ 1414

हैहयाधिपयोधानां वेग आसीत् सुदारुणः।
सनक्रमीनमकरसमुद्रस्येव निःस्वनः॥ **7.32.35**॥ 1415

रावणस्य तु तेऽमात्याः प्रहस्तशुकसारणाः।
कार्तवीर्यबलं क्रुद्धा निर्दहन्ति स्म तेजसा॥ **7.32.36**॥ 1416

अर्जुनाय तु तत्कर्म रावणस्य समन्त्रिणः।
क्रीडमानाय कथितं पुरुषैर्भयविह्वलैः॥ **7.32.37**॥ 1417

श्रुत्वा न भेतव्यमिति स्त्रीजनं स तदार्जुनः।
उत्ततार जलात् तस्माद् गङ्गातोयादिवाञ्जनः॥ **7.32.38**॥ 1418

क्रोधदूषितनेत्रस्तु स तदार्जुनपावकः।
प्रजज्वाल महाघोरो युगान्त इव पावकः॥ **7.32.39**॥ 1419

स तूर्णतरमादाय वरहेमाङ्गदो गदाम्।
अभिदुद्राव रक्षांसि तमांसीव दिवाकरः॥ **7.32.40**॥ 1420

बाहुविक्षेपकरणां समुद्यम्य महागदाम्।
गारुडं वेगमास्थाय आपपातैव सोऽर्जुनः॥ **7.32.41**॥ 1421

तस्य मार्गं समारुद्ध्य विन्ध्योऽर्कस्येव पर्वतः।
स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः॥ **7.32.42**॥ 1422

ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः।
प्रहस्तः प्रेषयन् क्रुद्धो ररास च यथान्तकः॥ **7.32.43**॥ 1423

तस्याग्रे मुसलस्याग्निरशोकापीडसन्निभः।
प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव॥ **7.32.44**॥ 1424

आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः।
निपुणं वञ्चयामास गदया गतविक्लवः॥ **7.32.45**॥ 1425

ततस्तमभिदुद्राव सगदो हैहयाधिपः।
भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम्॥ **7.32.46**॥ 1426

ततो हतोऽतिवेगेन प्रहस्तो गदया तदा।
निपपात स्थितः शैलो वज्रिवज्रहतो यथा॥ **7.32.47**॥ 1427

प्रहस्तं पतितं दृष्ट्वा मारीचशुकसारणाः।
समहोदरधूम्राक्षा अपसृष्टा रणाजिरात्॥ **7.32.48**॥ 1428

अपक्रान्तेष्वमात्येषु प्रहस्ते च निपातिते।
रावणोऽभ्यद्रवत् तूर्णमर्जुनं नृपसत्तमम्॥ **7.32.49**॥ 1429

सहस्रबाहोस्तद् युद्धं विंशद्बाहोश्च दारुणम्।
नृपराक्षसयोस्तत्र आरब्धं रोमहर्षणम्॥ **7.32.50**॥ 1430

सागराविव सङ्क्षुब्धौ चलमूलाविवाचलौ।
तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ॥ **7.32.51**॥ 1431

बलोद्धतौ यथा नागौ वासितार्थे यथा वृषौ।
मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ॥ **7.32.52**॥ 1432

रुद्रकालाविव क्रुद्धौ तौ तदा राक्षसार्जुनौ।
परस्परं गदां गृह्य ताडयामासतुर्भृशम्॥ **7.32.53**॥ 1433

वज्रप्रहारानचला यथा घोरान् विषेहिरे।
गदाप्रहारांस्तौ तत्र सेहाते नरराक्षसौ॥ **7.32.54**॥ 1434

यथाशनिरवेभ्यस्तु जायतेऽथ प्रतिश्रुतिः।
तथा तयोर्गदापोथैर्दिशः सर्वाः प्रतिश्रुताः॥ **7.32.55**॥ 1435

अर्जुनस्य गदा सा तु पात्यमानाहितोरसि।
काञ्चनाभं नभश्चक्रे विद्युत्सौदामिनी यथा॥ **7.32.56**॥ 1436

तथैव रावणेनापि पात्यमाना मुहुर्मुहुः।
अर्जुनोरसि निर्भाति गदोल्केव महागिरौ॥ **7.32.57**॥ 1437

नार्जुनः खेदमायाति न राक्षसगणेश्वरः।
सममासीत् तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः॥ **7.32.58**॥ 1438

शृङ्गैरिव वृषायुध्यन् दन्ताग्रैरिव कुञ्जरौ।
परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ॥ **7.32.59**॥ 1439

ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा।
स्तनयोरन्तरे मुक्ता रावणस्य महोरसि॥ **7.32.60**॥ 1440

वरदानकृतत्राणे सा गदा रावणोरसि।
दुर्बलेव यथावेगं द्विधाभूतापतत् क्षितौ॥ **7.32.61**॥ 1441

स त्वर्जुनप्रयुक्तेन गदाघातेन रावणः।
अपासर्पद् धनुर्मात्रं निषसाद च निष्टनन्॥ **7.32.62**॥ 1442

स विह्वलं तदाऽऽलक्ष्य दशग्रीवं ततोऽर्जुनः।
सहसोत्पत्य जग्राह गरुत्मानिव पन्नगम्॥ **7.32.63**॥ 1443

स तु बाहुसहस्रेण बलाद् गृह्य दशाननम्।
बबन्ध बलवान् राजा बलिं नारायणो यथा॥ **7.32.64**॥ 1444

बध्यमाने दशग्रीवे सिद्धचारणदेवताः।
साध्वीति वादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि॥ **7.32.65**॥ 1445

व्याघ्रो मृगमिवादाय मृगराडिव कुञ्जरम्।
ररास हैहयो राजा हर्षादम्बुदवन्मुहुः॥ **7.32.66**॥ 1446

प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम्।
सहसा राक्षसः क्रुद्धो ह्यभिदुद्राव हैहयम्॥ **7.32.67**॥ 1447

नक्तञ्चराणां वेगस्तु तेषामापततां बभौ।
उद्धूत आतपापाये पयोदानामिवाम्बुधौ॥ **7.32.68**॥ 1448

मुञ्चमुञ्चेति भाषन्तस्तिष्ठतिष्ठेति चासकृत्।
मुसलानि च शूलानि सोत्ससर्ज तदा रणे॥ **7.32.69**॥ 1449

अप्राप्तान्येव तान्याशु असभ्भ्रान्तस्तदार्जुनः।
आयुधान्यमरारीणां जग्राहारिनिषूदनः॥ **7.32.70**॥ 1450

ततस्तैरेव रक्षांसि दुर्धरैः प्रवरायुधैः।
भित्त्वा विद्रावयामास वायुरम्बुधरानिव॥ **7.32.71**॥ 1451

राक्षसांस्त्रासयामास कार्तवीर्यार्जुनस्तदा।
रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः॥ **7.32.72**॥ 1452

स कीर्यमाणः कुसुमाक्षतोत्करै -
द्विजैः सपौरैः पुरुहूतसन्निभः।
ततोऽर्जुनः स्वां प्रविवेश तां पुरीं
बलिं निगृह्येव सहस्रलोचनः॥ **7.32.73**॥ 1453

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयस्त्रिंशः सर्गः ॥

पुलस्त्येन रावणस्यार्जुनबन्धनतो मोचनम्

रावणग्रहणं तत् तु वायुग्रहणसन्निभम्।
ततः पुलस्त्यः शुश्राव कथितं दिवि दैवतैः॥ **7.33.1** ॥ 1454

ततः पुत्रकृतस्नेहात् कम्पमानो महाधृतिः।
माहिष्मतीपतिं द्रष्टुमाजगाम महानृषिः॥ **7.33.2** ॥ 1455

स वायुमार्गमास्थाय वायुतुल्यगतिर्द्विजः।
पुरीं माहिष्मतीं प्राप्तो मनःसम्पातविक्रमः॥ **7.33.3** ॥ 1456

सोऽमरावतिसङ्काशां हृष्टपुष्टजनावृताम्।
प्रविवेश पुरीं ब्रह्मा इन्द्रस्येवामरावतीम्॥ **7.33.4** ॥ 1457

पादचारमिवादित्यं निष्पतन्तं सुदुर्दृशम्।
ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन्॥ **7.33.5** ॥ 1458

पुलस्त्य इति विज्ञाय वचनाद्धैहयाधिपः।
शिरस्यञ्जलिमाधाय प्रत्युद्गच्छत् तपस्विनम्॥ **7.33.6** ॥ 1459

पुरोहितोऽस्य गृह्यार्घ्यं मधुपर्कं तथैव च।
पुरस्तात् प्रययौ राज्ञः शक्रस्येव बृहस्पतिः॥ **7.33.7** ॥ 1460

ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम्।
अर्जुनो दृश्य सम्भ्रान्तो ववन्देन्द्र इवेश्वरम्॥ **7.33.8**॥ 1461

स तस्य मधुपर्कं गां पाद्यमर्घ्यं निवेद्य च।
पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा॥ **7.33.9**॥ 1462

अद्यैवममरावत्या तुल्या माहिष्मती कृता।
अद्याहं तु द्विजेन्द्र त्वां यस्मात् पश्यामि दुर्दृशम्॥ **7.33.10**॥ 1463

अद्य मे कुशलं देव अद्य मे कुशलं व्रतम्।
अद्य मे सफलं जन्म अद्य मे सफलं तपः॥ **7.33.11**॥ 1464

यत् ते देवगणैर्वन्द्यौ वन्देऽहं चरणौ तव।
इदं राज्यमिमे पुत्रा इमे दारा इमे वयम्।
ब्रह्मन् किं कुर्मः किं कार्यमाज्ञापयतु नो भवान्॥ **7.33.12**॥ 1465

तं धर्मेऽग्निषु पुत्रेषु शिवं पृष्ट्वा च पार्थिवम्।
पुलस्त्योवाच राजानं हैहयानां तथार्जुनम्॥ **7.33.13**॥ 1466

नरेन्द्राम्बुजपत्राक्ष पूर्णचन्द्रनिभानन।
अतुलं ते बलं येन दशग्रीवस्त्वया जितः॥ **7.33.14**॥ 1467

भयाद् यस्योपतिष्ठेतां निष्पन्दौ सागरानिलौ।
सोऽयं मृधे त्वया बद्धः पौत्रो मे रणदुर्जयः॥ **7.33.15**॥ 1468

पुत्रकस्य यशः पीतं नाम विश्रावितं त्वया।
मद्वाक्याद् याच्यमानोऽद्य मुञ्च वत्स दशाननम्॥ **7.33.16**॥ 1469

पुलस्त्याज्ञां प्रगृह्योचे न किञ्चन वचोऽर्जुनः।
मुमोच वै पार्थिवेन्द्रो राक्षसेन्द्रं प्रहृष्टवत्॥ **7.33.17**॥ 1470

स तं प्रमुच्य त्रिदशारिमर्जुनः
प्रपूज्य दिव्याभरणस्रगम्बरैः।
अहिंसकं सख्यमुपेत्य साग्निकं
प्रणम्य तं ब्रह्मसुतं गृहं ययौ॥ **7.33.18**॥ 1471

पुलस्त्येनापि सन्त्यक्तो राक्षसेन्द्रः प्रतापवान्।
परिष्वक्तः कृतातिथ्यो लज्जमानो विनिर्जितः॥ **7.33.19**॥ 1472

पितामहसुतश्चापि पुलस्त्यो मुनिपुङ्गवः।
मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम ह॥ **7.33.20**॥ 1473

एवं स रावणः प्राप्तः कार्तवीर्यात् प्रधर्षणम्।
पुलस्त्यवचनाच्चापि पुनर्मुक्तो महाबलः॥ **7.33.21**॥ 1474

एवं बलिभ्यो बलिनः सन्ति राघवनन्दन।
नावज्ञा हि परे कार्या य इच्छेच्छ्रेय आत्मनः॥ **7.33.22**॥ 1475

ततः स राजा पिशिताशनानां
सहस्रबाहोरुपलभ्य मैत्रीम्।
पुनर्नृपाणां कदनं चकार
चचार सर्वां पृथिवीं च दर्पात्॥ **7.33.23**॥ 1476

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रयस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुस्त्रिंशः सर्गः ॥

वालिना रावणस्य पराभवो रावणस्य तेन सह मैत्रीभावश्च

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः।
चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः॥ **7.34.1** ॥ 1477

राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकम्।
रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः॥ **7.34.2** ॥ 1478

ततः कदाचित् किष्किन्धां नगरीं वालिपालिताम्।
गत्वाऽऽह्वयति युद्धाय वालिनं हेममालिनम्॥ **7.34.3** ॥ 1479

ततस्तु वानरामात्यास्तारस्तारापिता प्रभुः।
उवाच वानरो वाक्यं युद्धप्रेप्सुमुपागतम्॥ **7.34.4** ॥ 1480

राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत्।
कोऽन्यः प्रमुखतः स्थातुं तव शक्तः प्लवङ्गमः॥ **7.34.5** ॥ 1481

चतुर्भ्योऽपि समुद्रेभ्यः सन्ध्यामन्वास्य रावण।
इदं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम्॥ **7.34.6** ॥ 1482

एतानस्थिचयान् पश्य य एते शङ्खपाण्डुराः।
युद्धार्थिनामिमे राजन् वानराधिपतेजसा॥ **7.34.7** ॥ 1483

यद्वामृतरसः पीतस्त्वया रावण राक्षस।
तदा वालिनमासाद्य तदन्तं तव जीवितम्॥ **7.34.8**॥ 1484

पश्येदानीं जगच्चित्रमिमं विश्रवसः सुत।
इदं मुहूर्तं तिष्ठस्व दुर्लभं ते भविष्यति॥ **7.34.9**॥ 1485

अथवा त्वरसे मर्तुं गच्छ दक्षिणसागरम्।
वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव पावकम्॥ **7.34.10**॥ 1486

स तु तारं विनिर्भर्त्स्य रावणो लोकरावणः।
पुष्पकं तत् समारुह्य प्रययौ दक्षिणार्णवम्॥ **7.34.11**॥ 1487

तत्र हेमगिरिप्रख्यं तरुणार्ककनिभाननम्।
रावणो वालिनं दृष्ट्वा सन्ध्योपासनतत्परम्॥ **7.34.12**॥ 1488

पुष्पकादवरुह्याथ रावणोऽञ्जनसन्निभः।
ग्रहीतुं वालिनं तूर्णं निःशब्दपदमव्रजत्॥ **7.34.13**॥ 1489

यदृच्छया तदा दृष्टो वालिनापि स रावणः।
पापाभिप्रायकं दृष्ट्वा चकार न तु सम्भ्रमम्॥ **7.34.14**॥ 1490

शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा।
न चिन्तयति तं वाली रावणं पापनिश्चयम्॥ **7.34.15**॥ 1491

जिघृक्षमाणमायान्तं रावणं पापचेतसम्।
कक्षावलम्बिनं कृत्वा गमिष्ये त्रीन् महार्णवान्॥ **7.34.16**॥ 1492

द्रक्ष्यन्त्यरिं ममाङ्कस्थं स्रंसदूरुकराम्बरम्।
लम्बमानं दशग्रीवं गरुडस्येव पन्नगम्॥ **7.34.17**॥ 1493

इत्येवं मतिमास्थाय वाली मौनमुपास्थितः।
जपन् वै नैगमान् मन्त्रांस्तस्थौ पर्वतराडिव॥ **7.34.18**॥ 1494

तावन्योन्यं जिघृक्षन्तौ हरिराक्षसपार्थिवौ।
प्रयत्नवन्तौ तत् कर्म ईहतुर्बलदर्पितौ॥ **7.34.19**॥ 1495

हस्तग्राहं तु तं मत्वा पादशब्देन रावणम्।
पराङ्मुखोऽपि जग्राह वाली सर्पमिवाण्डजः॥ **7.34.20**॥ 1496

ग्रहीतुकामं तं गृह्य रक्षसामीश्वरं हरिः।
खमुत्पपात वेगेन कृत्वा कक्षावलम्बिनम्॥ **7.34.21**॥ 1497

तं च पीडयमानं तु वितुदन्तं नखैर्मुहुः।
जहार रावणं वाली पवनस्तोयदं यथा॥ **7.34.22**॥ 1498

अथ ते राक्षसामात्या ह्रियमाणे दशानने।
मुमोक्षयिषवो वालिं रवमाणा अभिद्रुताः॥ **7.34.23**॥ 1499

अन्वीयमानस्तैर्वाली भ्राजतेऽम्बरमध्यगः।
अन्वीयमानो मेघौघैरम्बरस्थ इवांशुमान्॥ **7.34.24**॥ 1500

तेऽशक्नुवन्तः सम्प्राप्तुं वालिनं राक्षसोत्तमाः।
तस्य बाहूरुवेगेन परिश्रान्ता व्यवस्थिताः॥ **7.34.25**॥ 1501

वालिमार्गादपाक्रामन् पर्वतेन्द्रापि गच्छतः।
किं पुनर्जीवनप्रेप्सुर्बिभ्रद् वै मांसशोणितम्॥ **7.34.26**॥ 1502

अपक्षिगणसम्पातान् वानरेन्द्रो महाजवः।
क्रमशः सागरान् सर्वान् सन्ध्याकालमवन्दत॥ **7.34.27**॥ 1503

सम्पूज्यमानो यातस्तु खचरैः खचरोत्तमः।
पश्चिमं सागरं वाली आजगाम सरावणः॥ **7.34.28**॥ 1504

तस्मिन् सन्ध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः।
उत्तरं सागरं प्रायाद् वहमानो दशाननम्॥ **7.34.29**॥ 1505

बहुयोजनसाहस्रं वहमानो महाहरिः।
वायुवच्च मनोवच्च जगाम सह शत्रुणा॥ **7.34.30**॥ 1506

उत्तरे सागरे सन्ध्यामुपासित्वा दशाननम्।
वहमानोऽगमद् वाली पूर्वं वै स महोदधिम्॥ **7.34.31**॥ 1507

तत्रापि सन्ध्यामन्वास्य वासविः स हरीश्वरः।
किष्किन्धामभितो गृह्य रावणं पुनरागमत्॥ **7.34.32**॥ 1508

चतुर्ष्वपि समुद्रेषु सन्ध्यामन्वास्य वानरः।
रावणोद्वहनश्रान्तः किष्किन्धोपवनेऽपतत्॥ **7.34.33**॥ 1509

रावणं तु मुमोचाथ स्वकक्षात् कपिसत्तमः।
कुतस्त्वमिति चोवाच प्रहसन् रावणं मुहुः॥ **7.34.34**॥ 1510

विस्मयं तु महद् गत्वा श्रमलोलनिरीक्षणः।
राक्षसेन्द्रो हरीन्द्रं तमिदं वचनमब्रवीत्॥ **7.34.35**॥ 1511

वानरेन्द्र महेन्द्राभ राक्षसेन्द्रोऽस्मि रावणः।
युद्धेप्सुरिह सम्प्राप्तः स चाद्यासादितस्त्वया॥ **7.34.36**॥ 1512

अहो बलमहो वीर्यमहो गाम्भीर्यमेव च।
येनाहं पशुवद् गृह्य भ्रामितश्चतुरोऽर्णवान्॥ **7.34.37**॥ 1513

एवमश्रान्तवद् वीर शीघ्रमेव च वानर।
मां चैवोद्वहमानस्तु कोऽन्यो वीरो भविष्यति॥ **7.34.38**॥ 1514

त्रयाणामेव भूतानां गतिरेषा प्लवङ्गम।
मनोऽनिलसुपर्णानां तव चात्र न संशयः॥ **7.34.39**॥ 1515

सोऽहं दृष्टबलस्तुभ्यमिच्छामि हरिपुङ्गव।
त्वया सह चिरं सख्यं सुस्निग्धं पावकाग्रतः॥ **7.34.40**॥ 1516

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम्।
सर्वमेवाविभक्तं नौ भविष्यति हरीश्वर॥ **7.34.41**॥ 1517

ततः प्रज्वालयित्वाग्निं तावुभौ हरिराक्षसौ।
भ्रातृत्वमुपसम्पन्नौ परिष्वज्य परस्परम्॥ **7.34.42**॥ 1518

अन्योन्यं लम्बितकरौ ततस्तौ हरिराक्षसौ।
किष्किन्धां विशतुर्हृष्टौ सिंहौ गिरिगुहामिव॥ **7.34.43**॥ 1519

स तत्र मासमुषितः सुग्रीव इव रावणः।
अमात्यैरागतैर्नीतस्त्रैलोक्योत्सादनार्थिभिः॥ **7.34.44**॥ 1520

एवमेतत् पुरा वृत्तं वालिना रावणः प्रभो।
धर्षितश्च वृतश्चापि भ्राता पावकसन्निधौ॥ **7.34.45**॥ 1521

बलमप्रतिमं राम वालिनोऽभवदुत्तमम्।
सोऽपि त्वया विनिर्दग्धः शलभो वह्निना यथा॥ **7.34.46**॥ 1522

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चत्रिंशः सर्गः ॥

हनुमत उत्पत्तिः शैशवावस्थायामस्य सूर्यराह्वैरावतोपर्याक्रमणमिन्द्रस्य वज्रतो मारुतेर्मूर्च्छनं मरुतो रोषात् प्राणिनां दुःखं तत्प्रसादनाय देवैः सह ब्रह्मणो वायोः पार्श्व आगमनम्

अपृच्छत तदा रामो दक्षिणाशाश्रयं मुनिम्।
प्राञ्जलिविनयोपेत इदमाह वचोऽर्थवत्॥ **7.35.1** ॥ 1523

अतुलं बलमेतद् वै वालिनो रावणस्य च।
न त्वेताभ्यां हनुमता समं त्विति मतिर्मम॥ **7.35.2** ॥ 1524

शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम्।
विक्रमश्च प्रभावश्च हनूमति कृतालयाः॥ **7.35.3** ॥ 1525

दृष्ट्वैव सागरं वीक्ष्य सीदन्तीं कपिवाहिनीम्।
समाश्वास्य महाबाहुर्योजनानां शतं प्लुतः॥ **7.35.4** ॥ 1526

धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरं तदा।
दृष्टा सम्भाषिता चापि सीता ह्याश्वासिता तथा॥ **7.35.5** ॥ 1527

सेनाग्रगा मन्त्रिसुताः किङ्करा रावणात्मजः।
एते हनुमता तत्र एकेन विनिपातिताः॥ **7.35.6** ॥ 1528

भूयो बन्धाद् विमुक्तेन भाषयित्वा दशाननम्।
लङ्का भस्मीकृता येन पावकेनेव मेदिनी॥ **7.35.7**॥ 1529

न कालस्य न शक्रस्य न विष्णोर्वित्तपस्य च।
कर्माणि तानि श्रूयन्ते यानि युद्धे हनूमतः॥ **7.35.8**॥ 1530

एतस्य बाहुवीर्येण लङ्का सीता च लक्ष्मणः।
प्राप्ता मया जयश्चैव राज्यं मित्राणि बान्धवाः॥ **7.35.9**॥ 1531

हनूमान् यदि मे न स्याद् वानराधिपतेः सखा।
प्रवृत्तिमपि को वेत्तुं जानक्याः शक्तिमान् भवेत्॥ **7.35.10**॥ 1532

किमर्थं वाली चैतेन सुग्रीवप्रियकाम्यया।
तदा वैरे समुत्पन्ने न दग्धो वीरुधो यथा॥ **7.35.11**॥ 1533

नहि वेदितवान् मन्ये हनूमानात्मनो बलम्।
यद् दृष्टवाञ्जीवितेष्टं क्लिश्यन्तं वानराधिपम्॥ **7.35.12**॥ 1534

एतन्मे भगवन् सर्वं हनूमति महामुने।
विस्तरेण यथातत्त्वं कथयामरपूजित॥ **7.35.13**॥ 1535

राघवस्य वचः श्रुत्वा हेतुयुक्तमृषिस्ततः।
हनूमतः समक्षं तमिदं वचनमब्रवीत्॥ **7.35.14**॥ 1536

सत्यमेतद् रघुश्रेष्ठ यद् ब्रवीषि हनूमति।
न बले विद्यते तुल्यो न गतौ न मतौ परः॥ **7.35.15**॥ 1537

अमोघशापैः शापस्तु दत्तोऽस्य मुनिभिः पुरा।
न वेत्ता हि बलं सर्वं बली सन्नरिमर्दन॥ **7.35.16**॥ 1538

बाल्येऽप्येतेन यत् कर्म कृतं राम महाबल।
तन्न वर्णयितुं शक्यमिति बालतयास्यते॥ **7.35.17**॥ 1539

यदि वास्ति त्वभिप्रायः संश्रोतुं तव राघव।
समाधाय मतिं राम निशामय वदाम्यहम्॥ **7.35.18**॥ 1540

सूर्यदत्तवरस्वर्णः सुमेरुर्नाम पर्वतः।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता॥ **7.35.19**॥ 1541

तस्य भार्या बभूवेष्टा अञ्जनेति परिश्रुता।
जनयामास तस्यां वै वायुरात्मजमुत्तमम्॥ **7.35.20**॥ 1542

शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना।
फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा॥ **7.35.21**॥ 1543

एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः।
रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा॥ **7.35.22**॥ 1544

तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम्।
ददर्श फललोभाच्च ह्युत्पपात रविं प्रति॥ **7.35.23**॥ 1545

बालार्काभिमुखो बालो बालार्क इव मूर्तिमान्।
ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः॥ **7.35.24**॥ 1546

एतस्मिन् प्लवमाने तु शिशुभावे हनूमति।
देवदानवयक्षाणां विस्मयः सुमहानभूत्॥ **7.35.25**॥ 1547

नाप्येवं वेगवान् वायुर्गरुडो न मनस्तथा।
यथायं वायुपुत्रस्तु क्रमतेऽम्बरमुत्तमम्॥ **7.35.26**॥ 1548

यदि तावच्छिशोरस्य ईदृशो गतिविक्रमः।
यौवनं बलमासाद्य कथं वेगो भविष्यति॥ **7.35.27**॥ 1549

तमनुप्लवते वायुः प्लवन्तं पुत्रमात्मनः।
सूर्यदाहभयाद् रक्षंस्तुषारचयशीतलः॥ **7.35.28**॥ 1550

बहुयोजनसाहस्रं क्रामन्नेव गतोऽम्बरम्।
पितुर्बलाच्च बाल्याच्च भास्कराभ्याशमागतः॥ **7.35.29**॥ 1551

शिशुरेष त्वदोषज्ञ इति मत्वा दिवाकरः।
कार्यं चास्मिन् समायत्तमित्येवं न ददाह सः॥ **7.35.30**॥ 1552

यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः।
तमेव दिवसं राहुर्जिघृक्षति दिवाकरम्॥ **7.35.31**॥ 1553

अनेन च परामृष्टो राहुः सूर्यरथोपरि।
अपक्रान्तस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः॥ **7.35.32**॥ 1554

इन्द्रस्य भवनं गत्वा सरोषः सिंहिकासुतः।
अब्रवीद् भ्रुकुटिं कृत्वा देवं देवगणैर्वृतम्॥ **7.35.33**॥ 1555

बुभुक्षापनयं दत्त्वा चन्द्रार्कौ मम वासव।
किमिदं तत् त्वया दत्तमन्यस्य बलवृत्रहन्॥ **7.35.34**॥ 1556

अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः।
अथान्यो राहुरासाद्य जग्राह सहसा रविम्॥ **7.35.35**॥ 1557

स राहोर्वचनं श्रुत्वा वासवः सभ्रमान्वितः।
उत्पपातासनं हित्वा उद्वहन् काञ्चनीं स्रजम्॥ **7.35.36**॥ 1558

ततः कैलासकूटाभं चतुर्दन्तं मदस्रवम्।
शृङ्गारधारिणं प्रांशुं स्वर्णघण्टाट्टहासिनम्॥ **7.35.37**॥ 1559

इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम्।
प्रायाद् यत्राभवत् सूर्यः सहानेन हनूमता॥ **7.35.38**॥ 1560

अथातिरभसेनागाद् राहुरुत्सृज्य वासवम्।
अनेन च स वै दृष्टः प्रधावञ्शैलकूटवत्॥ **7.35.39**॥ 1561

ततः सूर्यं समुत्सृज्य राहुं फलमवेक्ष्य च।
उत्पपात पुनर्योम ग्रहीतुं सिंहिकासुतम्॥ **7.35.40**॥ 1562

उत्सृज्यार्कमिमं राम प्रधावन्तं प्लवङ्गमम्।
अवेक्ष्यैवं परावृत्तो मुखशेषः पराङ्मुखः॥ **7.35.41**॥ 1563

इन्द्रमाशंसमानस्तु त्रातारं सिंहिकासुतः।
इन्द्र इन्द्रेति सन्त्रासान्मुहुर्मुहुरभाषत॥ **7.35.42**॥ 1564

राहोर्विक्रोशमानस्य प्रागेवालक्षितं स्वरम्।
श्रुत्वेन्द्रोवाच मा भैषीरहमेनं निषूदये॥ **7.35.43**॥ 1565

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं तं हस्तिराजानमभिदुद्राव मारुतिः॥ **7.35.44**॥ 1566

तथास्य धावतो रूपमैरावतजिघृक्षया।
मुहूर्तमभवद् घोरमिन्द्राग्न्योरिव भास्वरम्॥ **7.35.45**॥ 1567

एवमाधावमानं तु नातिक्रुद्धः शचीपतिः।
हस्तान्तादतिमुक्तेन कुलिशेनाभ्यताडयत्॥ **7.35.46**॥ 1568

ततो गिरौ पपातैष इन्द्रवज्राभिताडितः।
पतमानस्य चैतस्य वामा हनुरभज्यत॥ **7.35.47**॥ 1569

तस्मिंस्तु पतिते चापि वज्रताडनविह्वले।
चुक्रोधेन्द्राय पवनः प्रजानामहिताय सः॥ **7.35.48**॥ 1570

प्रचारं स तु सङ्गृह्य प्रजास्वन्तर्गतः प्रभुः।
गुहां प्रविष्टः स्वसुतं शिशुमादाय मारुतः॥ **7.35.49**॥ 1571

विण्मूत्राशयमावृत्य प्रजानां परमार्तिकृत्।
रुरोध सर्वभूतानि यथा वर्षाणि वासवः॥ **7.35.50**॥ 1572

वायुप्रकोपाद् भूतानि निरुच्छ्वासानि सर्वतः।
सन्धिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे॥ **7.35.51**॥ 1573

निःस्वाध्यायवषट्कारं निष्क्रियं धर्मवर्जितम्।
वायुप्रकोपात् त्रैलोक्यं निरयस्थमिवाभवत्॥ **7.35.52**॥ 1574

ततः प्रजाः सगन्धर्वाः सदेवासुरमानुषाः।
प्रजापतिं समाधावन् दुःखिताश्च सुखेच्छया॥ **7.35.53**॥ 1575

ऊचुः प्राञ्जलयो देवा महोदरनिभोदराः।
त्वया तु भगवन् सृष्टाः प्रजा नाथ चतुर्विधाः॥ **7.35.54**॥ 1576

त्वया दत्तोऽयमस्माकमायुषः पवनः पतिः।
सोऽस्मान् प्राणेश्वरो भूत्वा कस्मादेषोऽद्य सत्तम॥ **7.35.55**॥ 1577

रुरोध दुःखं जनयन्नन्तःपुर इव स्त्रियः।
तस्मात् त्वां शरणं प्राप्ता वायुनोपहता वयम्॥ **7.35.56**॥ 1578

वायुसंरोधजं दुःखमिदं नो नुद दुःखहन्।
एतत् प्रजानां श्रुत्वा तु प्रजानाथः प्रजापतिः॥ **7.35.57**॥ 1579

कारणादिति चोक्त्वासौ प्रजाः पुनरभाषत।
यस्मिंश्च कारणे वायुश्चुक्रोध च रुरोध च॥ **7.35.58**॥ 1580

प्रजाः शृणुध्वं तत् सर्वं श्रोतव्यं चात्मनः क्षमम्।
पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः॥ **7.35.59**॥ 1581

राहोर्वचनमास्थाय ततः स कुपितोऽनिलः।
अशरीरः शरीरेषु वायुश्चरति पालयन्॥ **7.35.60**॥ 1582

शरीरं हि विना वायुं समतां याति दारुभिः।
वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत्॥ **7.35.61**॥ 1583

वायुना सम्परित्यक्तं न सुखं विन्दते जगत्।
अद्यैव च परित्यक्तं वायुना जगदायुषा॥ **7.35.62**॥ 1584

अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः।
तद् यामस्तत्र यत्रास्ते मारुतो रुक्प्रदो हि नः।
मा विनाशं गमिष्याम अप्रसाद्यादितेः सुताः॥ **7.35.63**॥ 1585

ततः प्रजाभिः सहितः प्रजापतिः
सदेवगन्धर्वभुजङ्गगुह्यकैः।
जगाम तत्रास्यति यत्र मारुतः
सुतं सुरेन्द्राभिहतं प्रगृह्य सः॥ **7.35.64**॥ 1586

ततोऽर्कवैश्वानरकाञ्चनप्रभं
सुतं तदोत्सङ्गगतं सदागतेः।
चतुर्मुखो वीक्ष्य कृपामथाकरोत्
सदेवगन्धर्वऋषियक्षराक्षसैः॥ **7.35.65**॥ 1587

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्त्रिंशः सर्गः ॥

हनुमन्तं जीवयित्वा ब्रह्मादिदेवैस्तस्मै वरप्रदानं तमादाय वायोरञ्जनागृहे गमनम्, ऋषिशापाद्धनुमतः स्वबलस्य विस्मृतिः, श्रीरामेण स्वयज्ञे समागन्तुं प्रार्थ्यागस्त्यप्रभृतीनां विसर्जनम्

ततः पितामहं दृष्ट्वा वायुः पुत्रवधार्दितः।
शिशुकं तं समादाय उत्तस्थौ धातुरग्रतः॥ **7.36.1** ॥ 1588

चलकुण्डलमौलिस्रक् तपनीयविभूषणः।
पादयोर्न्यपतद् वायुस्त्रिरुपस्थाय वेधसे॥ **7.36.2** ॥ 1589

तं तु वेदविदा तेन लम्बाभरणशोभिना।
वायुमुत्थाप्य हस्तेन शिशुं तं परिमृष्टवान्॥ **7.36.3** ॥ 1590

स्पृष्टमात्रस्ततः सोऽथ सलीलं पद्मजन्मना।
जलसिक्तं यथा सस्यं पुनर्जीवितमाप्तवान्॥ **7.36.4** ॥ 1591

प्राणवन्तमिमं दृष्ट्वा प्राणो गन्धवहो मुदा।
चचार सर्वभूतेषु सन्निरुद्धं यथा पुरा॥ **7.36.5** ॥ 1592

मरुद्रोधाद् विनिर्मुक्तास्ताः प्रजा मुदिताऽभवन्।
शीतवातविनिर्मुक्ताः पद्मिन्य इव साम्बुजाः॥ **7.36.6** ॥ 1593

ततस्त्रियुग्मस्त्रिककुत् त्रिधामा त्रिदशार्चितः।
उवाच देवता ब्रह्मा मारुतप्रियकाम्यया॥ **7.36.7**॥ 1594

भो महेन्द्राग्निवरुणा महेश्वरधनेश्वराः।
जानतामपि वः सर्वं वक्ष्यामि श्रूयतां हितम्॥ **7.36.8**॥ 1595

अनेन शिशुना कार्यं कर्तव्यं वो भविष्यति।
तद् ददध्वं वरान् सर्वे मारुतस्यास्य तुष्टये॥ **7.36.9**॥ 1596

ततः सहस्रनयनः प्रीतियुक्तः शुभाननः।
कुशेशयमयीं मालामुत्क्षेप्येदं वचोऽब्रवीत्॥ **7.36.10**॥ 1597

मत्करोत्सृष्टवज्रेण हनुरस्य यथा हतः।
नाम्ना वै कपिशार्दूलो भविता हनुमानिति॥ **7.36.11**॥ 1598

अहमस्य प्रदास्यामि परमं वरमद्भुतम्।
इतः प्रभृति वज्रस्य ममावध्यो भविष्यति॥ **7.36.12**॥ 1599

मार्तण्डस्त्वब्रवीत् तत्र भगवांस्तिमिरापहः।
तेजसोऽस्य मदीयस्य ददामि शतिकां कलाम्॥ **7.36.13**॥ 1600

यदा च शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति।
तदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति।
न चास्य भविता कश्चित् सदृशः शास्त्रदर्शने॥ **7.36.14**॥ 1601

वरुणश्च वरं प्रादान्नास्य मृत्युर्भविष्यति।
वर्षायुतशतेनापि मत्पाशादुदकादपि॥ **7.36.15**॥ 1602

यमो दण्डादवध्यत्वमरोगत्वं च दत्तवान्।
वरं ददामि सन्तुष्ट अविषादं च संयुगे॥ **7.36.16**॥ 1603

गदेयं मामिका नैनं संयुगेषु वधिष्यति।
इत्येवं धनदः प्राह तदा ह्येकाक्षिपिङ्गलः॥ **7.36.17**॥ 1604

मत्तो मदायुधानां च अवध्योऽयं भविष्यति।
इत्येवं शङ्करेणापि दत्तोऽस्य परमो वरः॥ **7.36.18**॥ 1605

विश्वकर्मा च दृष्ट्वेमं बालसूर्योपमं शिशुम्।
शिल्पिनां प्रवरः प्रादाद् वरमस्य महामतिः॥ **7.36.19**॥ 1606

मत्कृतानि च शस्त्राणि यानि दिव्यानि तानि च।
तैरवध्यत्वमापन्नश्चिरजीवी भविष्यति॥ **7.36.20**॥ 1607

दीर्घायुश्च महात्मा च ब्रह्मा तं प्राब्रवीद् वचः।
सर्वेषां ब्रह्मदण्डानामवध्योऽयं भविष्यति॥ **7.36.21**॥ 1608

ततः सुराणां तु वरैर्दृष्ट्वा ह्येनमलङ्कृतम्।
चतुर्मुखस्तुष्टमना वायुमाह जगद्गुरुः॥ **7.36.22**॥ 1609

अमित्राणां भयकरो मित्राणामभयङ्करः।
अजेयो भविता पुत्रस्तव मारुत मारुतिः॥ **7.36.23**॥ 1610

कामरूपः कामचारी कामगः प्लवतां वरः।
भवत्यव्याहतगतिः कीर्तिमांश्च भविष्यति॥ **7.36.24**॥ 1611

रावणोत्सादनार्थानि रामप्रीतिकराणि च।
रोमहर्षकराण्येव कर्ता कर्माणि संयुगे॥ **7.36.25**॥ 1612

एवमुक्त्वा तमामन्त्र्य मारुतं त्वमरैः सह।
यथागतं ययुः सर्वे पितामहपुरोगमाः॥ **7.36.26**॥ 1613

सोऽपि गन्धवहः पुत्रं प्रगृह्य गृहमानयत्।
अञ्जनायास्तमाख्याय वरदत्तं विनिर्गतः॥ **7.36.27**॥ 1614

प्राप्य राम वरानेष वरदानबलान्वितः।
जवेनात्मनि संस्थेन सोऽसौ पूर्ण इवार्णवः॥ **7.36.28**॥ 1615

तरसा पूर्यमाणोऽपि तदा वानरपुङ्गवः।
आश्रमेषु महर्षीणामपराध्यति निर्भयः॥ **7.36.29**॥ 1616

स्रग्भाण्डान्यग्निहोत्राणि वल्कलानां च सञ्चयान्।
भग्नविच्छिन्नविध्वस्तान् संशान्तानां करोत्ययम्॥ **7.36.30**॥ 1617

एवंविधानि कर्माणि प्रावर्तत महाबलः।
सर्वेषां ब्रह्मदण्डानामवध्यः शम्भुना कृतः॥ **7.36.31**॥ 1618

जानन्त ऋषयः सर्वे सहन्ते तस्य शक्तितः।
तथा केसरिणा त्वेष वायुना सोऽञ्जनीसुतः॥ **7.36.32**॥ 1619

प्रतिषिद्धोऽपि मर्यादां लङ्घयत्येव वानरः।
ततो महर्षयः क्रुद्धा भृग्वङ्गिरसवंशजाः॥ **7.36.33**॥ 1620

शेपुरेनं रघुश्रेष्ठ नातिक्रुद्धातिमन्यवः।
बाधसे यत् समाश्रित्य बलमस्मान् प्लवङ्गम॥ **7.36.34**॥ 1621

तद् दीर्घकालं वेत्तासि नास्माकं शापमोहितः।
यदा ते स्मार्यते कीर्तिस्तदा ते वर्धते बलम्॥ **7.36.35**॥ 1622

ततस्तु हततेजौजा महर्षिवचनौजसा।
एषोऽऽश्रमाणि तान्येव मृदुभावं गतोऽचरत्॥ **7.36.36**॥ 1623

अथर्क्षरजसो नाम वालिसुग्रीवयोः पिता।
सर्ववानरराजासीत् तेजसा इव भास्करः॥ **7.36.37**॥ 1624

स तु राज्यं चिरं कृत्वा वानराणां महेश्वरः।
ततस्त्वर्क्षरजा नाम कालधर्मेण योजितः॥ **7.36.38**॥ 1625

तस्मिन्नस्तमिते चाथ मन्त्रिभिर्मन्त्रकोविदैः।
पित्र्ये पदे कृतो वाली सुग्रीवो वालिनः पदे॥ **7.36.39**॥ 1626

सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम्।
आबाल्यं सख्यमभवदनिलस्याग्निना यथा॥ **7.36.40**॥ 1627

एष शापवशादेव न वेद बलमात्मनः।
वालिसुग्रीवयोर्वैरं यदा राम समुत्थितम्॥ **7.36.41**॥ 1628

न ह्येष राम सुग्रीवो भ्राम्यमाणोऽपि वालिना।
देव जानाति न ह्येष बलमात्मनि मारुतिः॥ **7.36.42**॥ 1629

ऋषिशापाहतबलस्तदैव कपिसत्तमः।
सिंहः कुञ्जररुद्धो वा आस्थितः सहितो रणे॥ **7.36.43**॥ 1630

पराक्रमोत्साहमतिप्रताप -
सौशील्यमाधुर्यनयानयैश्च।
गाम्भीर्यचातुर्यसुवीर्यधैर्यै -
र्हनूमतः कोऽप्यधिकोऽस्ति लोके॥ **7.36.44**॥ 1631

असौ पुनर्व्याकरणं ग्रहीष्यन्
सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः।
उद्यद्गिरेरस्तगिरिं जगाम
ग्रन्थं महद्धारयनप्रमेयः॥ **7.36.45**॥ 1632

ससूत्रवृत्त्यर्थपदं महार्थं
ससङ्ग्रहं सिद्ध्यति वै कपीन्द्रः।
नह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे
वैशारदे छन्दगतौ तथैव॥ **7.36.46**॥ 1633

सर्वासु विद्यासु तपोविधाने
प्रस्पर्धतेऽयं हि गुरुं सुराणाम्।
सोऽयं नवव्याकरणार्थवेत्ता
ब्रह्मा भविष्यत्यपि ते प्रसादात्॥ **7.36.47**॥ 1634

प्रवीविविक्षोरिव सागरस्य
लोकान् दिधक्षोरिव पावकस्य।
लोकक्षयेष्वेव यथान्तकस्य
हनूमतः स्थास्यति कः पुरस्तात्॥ **7.36.48**॥ 1635

एषेव चान्ये च महाकपीन्द्राः
सुग्रीवमैन्दद्विविदाः सनीलाः।
सतारतारेयनलाः सरम्भा -
स्त्वत्कारणाद् राम सुरैर्हि सृष्टाः॥ **7.36.49**॥ 1636

गजो गवाक्षो गवयः सुदंष्ट्रो
मैन्दः प्रभो ज्योतिमुखो नलश्च।
एते च ऋक्षाः सह वानरेन्द्रै -
स्त्वत्कारणाद् राम सुरैर्हि सृष्टाः॥ **7.36.50**॥ 1637

तदेतत् कथितं सर्वं यन्मां त्वं परिपृच्छसि।
हनूमतो बालभावे कर्मैतत् कथितं मया॥ **7.36.51**॥ 1638

श्रुत्वागस्त्यस्य कथितं रामः सौमित्रिरेव च।
विस्मयं परमं जग्मुर्वानरा राक्षसैः सह॥ **7.36.52**॥ 1639

अगस्त्यस्त्वब्रवीद् रामं सर्वमेतच्छ्रुतं त्वया।
दृष्टः सम्भाषितश्चासि राम गच्छामहे वयम्॥ **7.36.53**॥ 1640

श्रुत्वैतद् राघवो वाक्यमगस्त्यस्योग्रतेजसः।
प्राञ्जलिः प्रणतश्चापि महर्षिमिदमब्रवीत्॥ **7.36.54**॥ 1641

अद्य मे देवतास्तुष्टाः पितरः प्रपितामहाः।
युष्माकं दर्शनादेव नित्यं तुष्टाः सबान्धवाः॥ **7.36.55**॥ 1642

विज्ञाप्यं तु ममैतद्धि यद् वदाम्यागतस्पृहः।
तद् भवद्भिर्मम कृते कर्तव्यमनुकम्पया॥ **7.36.56**॥ 1643

पौरजानपदान् स्थाप्य स्वकार्येष्वहमागतः।
क्रतूनहं करिष्यामि प्रभावाद् भवतां सताम्॥ **7.36.57**॥ 1644

सदस्या मम यज्ञेषु भवन्तो नित्यमेव तु।
भविष्यथ महावीर्या ममानुग्रहकाङ्क्षिणः॥ **7.36.58**॥ 1645

अहं युष्मान् समाश्रित्य तपोनिर्धूतकल्मषान्।
अनुगृहीतः पितृभिर्भविष्यामि सुनिर्वृतः॥ **7.36.59**॥ 1646

तदागन्तव्यमनिशं भवद्भिरिह सङ्गतैः।
अगस्त्याद्यास्तु तच्छ्रुत्वा ऋषयः संशितव्रताः॥ **7.36.60**॥ 1647

एवमस्त्विति तं प्रोच्य प्रयातुमुपचक्रमुः।
एवमुक्त्वा गताः सर्वे ऋषयस्ते यथागतम्॥ **7.36.61**॥ 1648

राघवश्च तमेवार्थं चिन्तयामास विस्मितः।
ततोऽस्तं भास्करे याते विसृज्य नृपवानरान्॥ **7.36.62**॥ 1649

सन्ध्यामुपास्य विधिवत् तदा नरवरोत्तमः।
प्रवृत्तायां रजन्यां तु सोऽन्तःपुरचरोऽभवत्॥ **7.36.63**॥ 1650

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे षड्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तत्रिंशः सर्गः ॥

श्रीरामस्य सदस्यैः सह राजसभायामुपवेशनम्

अभिषिक्ते तु काकुत्स्थे धर्मेण विदितात्मनि।
व्यतीता या निशा पूर्वा पौराणां हर्षवर्धिनी ॥ 7.37.1 ॥ 1651

तस्यां रजन्यां व्युष्टायां प्रातर्नृपतिबोधकाः।
बन्दिनः समुपातिष्ठन् सौम्या नृपतिवेश्मनि ॥ 7.37.2 ॥ 1652

ते रक्तकण्ठिनः सर्वे किन्नरा इव शिक्षिताः।
तुष्टुवुर्नृपतिं वीरं यथावत् सम्प्रहर्षिणः ॥ 7.37.3 ॥ 1653

वीर सौम्य प्रबुध्यस्व कौसल्याप्रीतिवर्धन।
जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ॥ 7.37.4 ॥ 1654

विक्रमस्ते यथा विष्णो रूपं चैवाश्विनोरिव।
बुद्ध्या बृहस्पतेस्तुल्यः प्रजापतिसमो ह्यसि ॥ 7.37.5 ॥ 1655

क्षमा ते पृथिवीतुल्या तेजसा भास्करोपमः।
वेगस्ते वायुना तुल्यो गाम्भीर्यमुदधेरिव ॥ 7.37.6 ॥ 1656

अप्रकम्प्यो यथा स्थाणुश्चन्द्रे सौम्यत्वमीदृशम्।
नेदृशाः पार्थिवाः पूर्वं भवितारो नराधिप ॥ 7.37.7 ॥ 1657

यथा त्वमसि दुर्धर्षो धर्मनित्यः प्रजाहितः।
न त्वां जहाति कीर्तिश्च लक्ष्मीश्च पुरुषर्षभ॥ **7.37.8**॥ 1658

श्रीश्च धर्मश्च काकुत्स्थ त्वयि नित्यं प्रतिष्ठितौ।
एताश्चान्याश्च मधुरा बन्दिभिः परिकीर्तिताः॥ **7.37.9**॥ 1659

सूताश्च संस्तवैर्दिव्यैर्बोधयन्ति स्म राघवम्।
स्तुतिभिः स्तूयमानाभिः प्रत्यबुध्यत राघवः॥ **7.37.10**॥ 1660

स तद्विहाय शयनं पाण्डराच्छादनास्ततम्।
उत्तस्थौ नागशयनाद्धरिर्नारायणो यथा॥ **7.37.11**॥ 1661

तमुत्थितं महात्मानं प्रह्वाः प्राञ्जलयो नराः।
सलिलं भाजनैः शुभैरुपतस्थुः सहस्रशः॥ **7.37.12**॥ 1662

कृतोदकः शुचिर्भूत्वा काले हुतहुताशनः।
देवागारं जगामाशु पुण्यमिक्ष्वाकुसेवितम्॥ **7.37.13**॥ 1663

तत्र देवान् पितॄन् विप्रानर्चयित्वा यथाविधि।
बाह्यकक्षान्तरं रामो निर्जगाम जनैर्वृतः॥ **7.37.14**॥ 1664

उपतस्थुर्महात्मानो मन्त्रिणः सपुरोहिताः।
वसिष्ठप्रमुखाः सर्वे दीप्यमाना इवाग्नयः॥ **7.37.15**॥ 1665

क्षत्रियाश्च महात्मानो नानाजनपदेश्वराः।
रामस्योपाविशन् पार्श्वे शक्रस्येव यथामराः॥ **7.37.16**॥ 1666

भरतो लक्ष्मणश्चात्र शत्रुघ्नश्च महायशाः।
उपासाञ्चक्रिरे हृष्टा वेदास्त्रय इवाध्वरम्॥ **7.37.17**॥ 1667

याताः प्राञ्जलयो भूत्वा किङ्करा मुदिताननाः।
मुदिता नाम पार्श्वस्था बहवः समुपाविशन्॥ **7.37.18**॥ 1668

वानराश्च महावीर्या विंशतिः कामरूपिणः।
सुग्रीवप्रमुखा राममुपासन्ते महौजसः॥ **7.37.19**॥ 1669

विभीषणश्च रक्षोभिश्चतुर्भिः परिवारितः।
उपासते महात्मानं धनेशमिव गुह्यकः॥ **7.37.20**॥ 1670

तथा निगमवृद्धाश्च कुलीना ये च मानवाः।
शिरसा वन्द्य राजानमुपासन्ते विचक्षणाः॥ **7.37.21**॥ 1671

तथा परिवृतो राजा श्रीमद्भिर्ऋषिभिर्वरैः।
राजभिश्च महावीर्यैर्वानरैश्च सराक्षसैः॥ **7.37.22**॥ 1672

यथा देवेश्वरो नित्यमृषिभिः समुपास्यते।
अधिकस्तेन रूपेण सहस्राक्षाद् विरोचते॥ **7.37.23**॥ 1673

तेषां समुपविष्टानां तास्ताः सुमधुराः कथाः।
कथ्यन्ते धर्मसंयुक्ताः पुराणज्ञैर्महात्मभिः॥ **7.37.24**॥ 1674

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टात्रिंशः सर्गः ॥

श्रीरामेण जनकयुधाजित्प्रतर्दनप्रभृतीनां भूपानां स्वदेशे प्रस्थापनम्

एवमास्ते महाबाहुरहन्यहनि राघवः।
प्रशासत् सर्वकार्याणि पौरजानपदेषु च ॥ **7.38.1** ॥ 1675

ततः कतिपयाहःसु वैदेहं मिथिलाधिपम्।
राघवः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह ॥ **7.38.2** ॥ 1676

भवान् हि गतिरव्यग्रा भवता पालिता वयम्।
भवतस्तेजसोग्रेण रावणो निहतो मया ॥ **7.38.3** ॥ 1677

इक्ष्वाकूणां च सर्वेषां मैथिलानां च सर्वशः।
अतुलाः प्रीतयो राजन् सम्बन्धकपुरोगमाः ॥ **7.38.4** ॥ 1678

तद् भवान् स्वपुरं यातु रत्नान्यादाय पार्थिव।
भरतश्च सहायार्थं पृष्ठतश्चानुयास्यति ॥ **7.38.5** ॥ 1679

स तथेति ततः कृत्वा राघवं वाक्यमब्रवीत्।
प्रीतोऽस्मि भवता राजन् दर्शनेन नयेन च ॥ **7.38.6** ॥ 1680

यान्येतानि तु रत्नानि मदर्थं सञ्चितानि वै।
दुहित्रे तान्यहं राजन् सर्वाण्येव ददामि वै ॥ **7.38.7** ॥ 1681

एवमुक्त्वा तु काकुत्स्थं जनको हृष्टमानसः।
प्रययौ मिथिलां श्रीमांस्तमनुज्ञाय राघवम्॥ **7.38.8**॥ 1682

ततः प्रयाते जनके केकयं मातुलं प्रभुम्।
राघवः प्राञ्जलिर्भूत्वा विनयाद् वाक्यमब्रवीत्॥ **7.38.9**॥ 1683

इदं राज्यमहं चैव भरतश्च सलक्ष्मणः।
आयत्तस्त्वं हि नो राजन् गतिश्च पुरुषर्षभ॥ **7.38.10**॥ 1684

राजा हि वृद्धः सन्तापं त्वदर्थमुपयास्यति।
तस्माद् गमनमद्यैव रोचते तव पार्थिव॥ **7.38.11**॥ 1685

लक्ष्मणेनानुयात्रेण पृष्ठतोऽनुगमिष्यते।
धनमादाय बहुलं रत्नानि विविधानि च॥ **7.38.12**॥ 1686

युधाजित् तु तथेत्याह गमनं प्रति राघव।
रत्नानि च धनं चैव त्वय्येवाक्षय्यमस्त्विति॥ **7.38.13**॥ 1687

प्रदक्षिणं च राजानं कृत्वा केकयवर्धनः।
रामेण च कृतः पूर्वमभिवाद्य प्रदक्षिणम्॥ **7.38.14**॥ 1688

लक्ष्मणेन सहायेन प्रयातः केकयेश्वरः।
हतेऽसुरे यथा वृत्रे विष्णुना सह वासवः॥ **7.38.15**॥ 1689

तं विसृज्य ततो रामो वयस्यमकुतोभयम्।
प्रतर्दनं काशिपतिं परिष्वज्येदमब्रवीत्॥ **7.38.16**॥ 1690

दर्शिता भवता प्रीतिर्दर्शितं सौहृदं परम्।
उद्योगश्च त्वया राजन् भरतेन कृतः सह॥ **7.38.17**॥ 1691

तद् भवानद्य काशेय पुरीं वाराणसीं व्रज।
रमणीयां त्वया गुप्तां सुप्राकारां सुतोरणाम्॥ **7.38.18**॥ 1692

एतावदुक्त्वा चोत्थाय काकुत्स्थः परमासनात्।
पर्यष्वजत धर्मात्मा निरन्तरमुरोगतम्॥ **7.38.19**॥ 1693

विसर्जयामास तदा कौसल्याप्रीतिवर्धनः।
राघवेण कृतानुज्ञः काशेयो ह्यकुतोभयः॥ **7.38.20**॥ 1694

वाराणसी ययौ तूर्णं राघवेण विसर्जितः।
विसृज्य तं काशिपतिं त्रिशतं पृथिवीपतीन्॥ **7.38.21**॥ 1695

प्रहसन् राघवो वाक्यमुवाच मधुराक्षरम्।
भवतां प्रीतिरव्यग्रा तेजसा परिरक्षिता॥ **7.38.22**॥ 1696

धर्मश्च नियतो नित्यं सत्यं च भवतां सदा।
युष्माकं चानुभावेन तेजसा च महात्मनाम्॥ **7.38.23**॥ 1697

हतो दुरात्मा दुर्बुद्धी रावणो राक्षसाधमः।
हेतुमात्रमहं तत्र भवतां तेजसा हतः॥ **7.38.24**॥ 1698

रावणः सगणो युद्धे सपुत्रामात्यबान्धवः।
भवन्तश्च समानीता भरतेन महात्मना॥ **7.38.25**॥ 1699

श्रुत्वा जनकराजस्य काननात् तनयां हृताम्।
उद्युक्तानां च सर्वेषां पार्थिवानां महात्मनाम्॥ **7.38.26**॥ 1700

कालोऽप्यतीतः सुमहान् गमनं रोचयाम्यतः।
प्रत्यूचुस्तं च राजानो हर्षेण महता वृताः॥ **7.38.27**॥ 1701

दिष्ट्या त्वं विजयी राम स्वराज्येऽपि प्रतिष्ठितः।
दिष्ट्या प्रत्याहृता सीता दिष्ट्या शत्रुः पराजितः॥ **7.38.28**॥ 1702

एष नः परमः काम एषा नः प्रीतिरुत्तमा।
यत् त्वां विजयिनं राम पश्यामो हतशात्रवम्॥ **7.38.29**॥ 1703

एतत् त्वय्युपपन्नं च यदस्मांस्त्वं प्रशंससे।
प्रशंसार्हं न जानीमः प्रशंसां वक्तुमीदृशीम्॥ **7.38.30**॥ 1704

आपृच्छामो गमिष्यामो हृदिस्थो नः सदा भवान्।
वर्तामहे महाबाहो प्रीत्यात्र महता वृताः॥ **7.38.31**॥ 1705

भवेच्च ते महाराज प्रीतिरस्मासु नित्यदा।
बाढमित्येव राजानो हर्षेण परमान्विताः॥ **7.38.32**॥ 1706

ऊचुः प्राञ्जलयः सर्वे राघवं गमनोत्सुकाः।
पूजितास्ते च रामेण जग्मुर्देशान् स्वकान् स्वकान्॥ **7.38.33**॥ 1707

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनचत्वारिंशः सर्गः ॥

राजभिः श्रीरामायोपहारस्य प्रेषणं तमादाय श्रीरामेण स्वमित्रेभ्यो वानरादिभ्यस्तस्य वितरणं वानरादीनां तत्र सुखेनावस्थानम्

ते प्रयाता महात्मानः पार्थिवास्ते प्रहृष्टवत्।
गजवाजिसहस्रौघैः कम्पयन्तो वसुन्धराम्॥ **7.39.1**॥ 1708

अक्षौहिण्यो हि तत्रासन् राघवार्थे समुद्यताः।
भरतस्याज्ञयानेकाः प्रहृष्टबलवाहनाः॥ **7.39.2**॥ 1709

ऊचुस्ते च महीपाला बलदर्पसमन्विताः।
न राम रावणं युद्धे पश्यामः पुरतः स्थितम्॥ **7.39.3**॥ 1710

भरतेन वयं पश्चात् समानीता निरर्थकम्।
हता हि राक्षसाः क्षिप्रं पार्थिवैः स्युर्न संशयः॥ **7.39.4**॥ 1711

रामस्य बाहुवीर्येण रक्षिता लक्ष्मणस्य च।
सुखं पारे समुद्रस्य युध्येम विगतज्वराः॥ **7.39.5**॥ 1712

एताश्चान्याश्च राजानः कथास्तत्र सहस्रशः।
कथयन्तः स्वराज्यानि जग्मुर्हर्षसमन्विताः॥ **7.39.6**॥ 1713

स्वानि राज्यानि मुख्यानि ऋद्धानि मुदितानि च।
समृद्धधनधान्यानि पूर्णानि वसुमन्ति च॥ **7.39.7**॥ 1714

यथापुराणि ते गत्वा रत्नानि विविधान्यथ।
रामस्य प्रियकामार्थमुपहारं नृपा ददुः॥ **7.39.8**॥ 1715

अश्वान् यानानि रत्नानि हस्तिनश्च मदोत्कटान्।
चन्दनानि च मुख्यानि दिव्यान्याभरणानि च॥ **7.39.9**॥ 1716

मणिमुक्ताप्रवालांस्तु दास्यो रूपसमन्विताः।
अजाविकं च विविधं रथांस्तु विविधान् बहून्॥ **7.39.10**॥ 1717

भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महाबलः।
आदाय तानि रत्नानि स्वां पुरीं पुनरागताः॥ **7.39.11**॥ 1718

आगम्य च पुरीं रम्यामयोध्यां पुरुषर्षभाः।
तानि रत्नानि चित्राणि रामाय समुपानयन्॥ **7.39.12**॥ 1719

प्रतिगृह्य च तत् सर्वं रामः प्रीतिसमन्वितः।
सुग्रीवाय ददौ राज्ञे महात्मा कृतकर्मणे॥ **7.39.13**॥ 1720

विभीषणाय च ददौ तथान्येभ्योऽपि राघवः।
राक्षसेभ्यः कपिभ्यश्च यैर्वृतो जयमाप्तवान्॥ **7.39.14**॥ 1721

ते सर्वे रामदत्तानि रत्नानि कपिराक्षसाः।
शिरोभिर्धारयामासुर्भुजेषु च महाबलाः॥ **7.39.15**॥ 1722

हनूमन्तं च नृपतिरिक्ष्वाकूणां महारथः।
अङ्गदं च महाबाहुमङ्कमारोप्य वीर्यवान्॥ **7.39.16**॥ 1723

रामः कमलपत्राक्षः सुग्रीवमिदमब्रवीत्।
अङ्गदस्ते सुपुत्रोऽयं मन्त्री चाप्यनिलात्मजः॥ **7.39.17**॥ 1724

सुग्रीवमन्त्रिते युक्तौ मम चापि हिते रतौ।
अर्हतो विविधां पूजां त्वत्कृते वै हरीश्वर॥ **7.39.18**॥ 1725

इत्युक्त्वा व्यपमुच्याङ्गाद् भूषणानि महायशाः।
स बबन्ध महार्हाणि तदाङ्गदहनूमतोः॥ **7.39.19**॥ 1726

आभाष्य च महावीर्यान् राघवो यूथपर्षभान्।
नीलं नलं केसरिणं कुमुदं गन्धमादनम्॥ **7.39.20**॥ 1727

सुषेणं पनसं वीरं मैन्दं द्विविदमेव च।
जाम्बवन्तं गवाक्षं च विनतं धूम्रमेव च॥ **7.39.21**॥ 1728

बलीमुखं प्रजङ्घं च सन्नादं च महाबलम्।
दरीमुखं दधिमुखमिन्द्रजानुं च यूथपम्॥ **7.39.22**॥ 1729

मधुरं श्लक्ष्णया वाचा नेत्राभ्यामापिबन्निव।
सुहृदो मे भवन्तश्च शरीरं भ्रातरस्तथा॥ **7.39.23**॥ 1730

युष्माभिरुद्धृतश्चाहं व्यसनात् काननौकसः।
धन्यो राजा च सुग्रीवो भवद्भिः सुहृदां वरैः॥ **7.39.24**॥ 1731

एवमुक्त्वा ददौ तेभ्यो भूषणानि यथार्हतः।
वज्राणि च महार्हाणि सस्वजे च नरर्षभः॥ **7.39.25**॥ 1732

ते पिबन्तः सुगन्धीनि मधूनि मधुपिङ्गलाः।
मांसानि च सुमृष्टानि मूलानि च फलानि च॥ **7.39.26**॥ 1733

एवं तेषां निवसतां मासः साग्रो ययौ तदा।
मुहूर्तमिव ते सर्वे रामभक्त्या च मेनिरे॥ **7.39.27**॥ 1734

रामोऽपि रेमे तैः सार्धं वानरैः कामरूपिभिः।
राक्षसैश्च महावीर्यैर्ऋक्षैश्चैव महाबलैः॥ **7.39.28**॥ 1735

एवं तेषां ययौ मासो द्वितीयः शिशिरः सुखम्।
वानराणां प्रहृष्टानां राक्षसानां च सर्वशः॥ **7.39.29**॥ 1736

इक्ष्वाकुनगरे रम्ये परां प्रीतिमुपासताम्।
रामस्य प्रीतिकरणैः कालस्तेषां सुखं ययौ॥ 7.39.30॥ 1737

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चत्वारिंशः सर्गः ॥

श्रीरामेण वानरर्क्षरक्षसां स्वदेशे प्रस्थापनम्

तथा स्म तेषां वसतामृक्षवानररक्षसाम्।
राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत्॥ **7.40.1**॥ 1738

गम्यतां सौम्य किष्किन्धां दुराधर्षां सुरासुरैः।
पालयस्व सहामात्यै राज्यं निहतकण्टकम्॥ **7.40.2**॥ 1739

अङ्गदं च महाबाहो प्रीत्या परमया युतः।
पश्य त्वं हनुमन्तं च नलं च सुमहाबलम्॥ **7.40.3**॥ 1740

सुषेणं श्वशुरं वीरं तारं च बलिनां वरम्।
कुमुदं चैव दुर्धर्षं नीलं चैव महाबलम्॥ **7.40.4**॥ 1741

वीरं शतबलिं चैव मैन्दं द्विविदमेव च।
गजं गवाक्षं गवयं शरभं च महाबलम्॥ **7.40.5**॥ 1742

ऋक्षराजं च दुर्धर्षं जाम्बवन्तं महाबलम्।
पश्य प्रीतिसमायुक्तो गन्धमादनमेव च॥ **7.40.6**॥ 1743

ऋषभं च सुविक्रान्तं प्लवङ्गं च सुपाटलम्।
केसरिं शरभं शुम्भं शङ्खचूडं महाबलम्॥ **7.40.7**॥ 1744

ये ये मे सुमहात्मानो मदर्थे त्यक्तजीविताः।
पश्य त्वं प्रीतिसंयुक्तो मा चैषां विप्रियं कृथाः॥ **7.40.8**॥ 1745

एवमुक्त्वा च सुग्रीवमाश्लिष्य च पुनः पुनः।
विभीषणमुवाचाथ रामो मधुरया गिरा॥ **7.40.9**॥ 1746

लङ्कां प्रशाधि धर्मेण धर्मज्ञस्त्वं मतो मम।
पुरस्य राक्षसानां च भ्रातुर्वैश्रवणस्य च॥ **7.40.10**॥ 1747

मा च बुद्धिमधर्मे त्वं कुर्या राजन् कथञ्चन।
बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम्॥ **7.40.11**॥ 1748

अहं च नित्यशो राजन् सुग्रीवसहितस्त्वया।
स्मर्तव्यः परया प्रीत्या गच्छ त्वं विगतज्वरः॥ **7.40.12**॥ 1749

रामस्य भाषितं श्रुत्वा ऋक्षवानरराक्षसाः।
साधुसाध्विति काकुत्स्थं प्रशशंसुः पुनः पुनः॥ **7.40.13**॥ 1750

तव बुद्धिर्महाबाहो वीर्यमद्भुतमेव च।
माधुर्यं परमं राम स्वयम्भोरिव नित्यदा॥ **7.40.14**॥ 1751

तेषामेवं ब्रुवाणानां वानराणां च रक्षसाम्।
हनूमान् प्रणतो भूत्वा राघवं वाक्यमब्रवीत्॥ **7.40.15**॥ 1752

स्नेहो मे परमो राजंस्त्वयि तिष्ठतु नित्यदा।
भक्तिश्च नियता वीर भावो नान्यत्र गच्छतु॥ **7.40.16**॥ 1753

यावद् रामकथा वीर चरिष्यति महीतले।
तावच्छरीरे वत्स्यन्तु प्राणा मम न संशयः॥ **7.40.17**॥ 1754

यच्चैतच्चरितं दिव्यं कथा ते रघुनन्दन।
तन्ममाप्सरसो राम श्रावयेयुर्नरर्षभ॥ **7.40.18**॥ 1755

तच्छ्रुत्वाहं ततो वीर तव चर्यामृतं प्रभो।
उत्कण्ठां तां हरिष्यामि मेघलेखामिवानिलः॥ **7.40.19**॥ 1756

एवं ब्रुवाणं रामस्तु हनूमन्तं वरासनात्।
उत्थाय सस्वजे स्नेहाद् वाक्यमेतदुवाच ह॥ **7.40.20**॥ 1757

एवमेतत् कपिश्रेष्ठ भविता नात्र संशयः।
चरिष्यति कथा यावदेषा लोके च मामिका॥ **7.40.21**॥ 1758

तावत् ते भविता कीर्तिः शरीरेऽप्यसवस्तथा।
लोका हि यावत्स्थास्यन्ति तावत् स्थास्यन्ति मे कथाः॥ **7.40.22**॥ 1759

एकैकस्योपकारस्य प्राणान् दास्यामि ते कपे।
शेषस्येहोपकाराणां भवाम ऋणिनो वयम्॥ **7.40.23**॥ 1760

मदङ्गे जीर्णतां यातु यत् त्वयोपकृतं कपे।
नरः प्रत्युपकाराणामापत्स्वायाति पात्रताम्॥ **7.40.24**॥ 1761

ततोऽस्य हारं चन्द्राभं मुच्य कण्ठात् स राघवः।
वैदूर्यतरलं कण्ठे बबन्ध च हनूमतः॥ **7.40.25**॥ 1762

तेनोरसि निबद्धेन हारेण महता कपिः।
रराज हेमशैलेन्द्रश्चन्द्रेणाक्रान्तमस्तकः॥ **7.40.26**॥ 1763

श्रुत्वा तु राघवस्यैतदुत्थायोत्थाय वानराः।
प्रणम्य शिरसा पादौ निर्जग्मुस्ते महाबलाः॥ **7.40.27**॥ 1764

सुग्रीवः स च रामेण निरन्तरमुरोगतः।
विभीषणश्च धर्मात्मा सर्वे ते बाष्पविक्लवाः॥ **7.40.28**॥ 1765

सर्वे च ते बाष्पकलाः साश्रुनेत्रा विचेतसः।
सम्मूढा इव दुःखेन त्यजन्तो राघवं तदा॥ **7.40.29**॥ 1766

कृतप्रसादास्तेनैवं राघवेण महात्मना।
जग्मुः स्वं स्वं गृहं सर्वे देही देहमिव त्यजन्॥ **7.40.30**॥ 1767

ततस्तु ते राक्षसऋक्षवानराः
प्रणम्य रामं रघुवंशवर्धनम्।
वियोगजाश्रुप्रतिपूर्णलोचनाः
प्रतिप्रयातास्तु यथा निवासिनः॥ **7.40.31**॥ 1768

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकचत्वारिंशः सर्गः ॥

कुबेरप्रहितस्य पुष्पकविमानस्यागमनं श्रीरामेण पूजितस्यानुगृहीतस्य च तस्य तिरोभावो भरतेन रामराज्यस्याद्भुतप्रभावाणां वर्णनम्

विसृज्य च महाबाहुर्ऋक्षवानरराक्षसान्।
भ्रातृभिः सहितो रामः प्रमुमोद सुखं सुखी ॥ **7.41.1** ॥ 1769

अथापराह्णसमये भ्रातृभिः सह राघवः।
शुश्राव मधुरां वाणीमन्तरिक्षान्महाप्रभुः ॥ **7.41.2** ॥ 1770

सौम्य राम निरीक्षस्व सौम्येन वदनेन माम्।
कुबेरभवनात् प्राप्तं विद्धि मां पुष्पकं प्रभो ॥ **7.41.3** ॥ 1771

तव शासनमाज्ञाय गतोऽस्मि भवनं प्रति।
उपस्थातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥ **7.41.4** ॥ 1772

निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना।
निहत्य युधि दुर्धर्षं रावणं राक्षसेश्वरम् ॥ **7.41.5** ॥ 1773

ममापि परमा प्रीतिर्हते तस्मिन् दुरात्मनि।
रावणे सगणे चैव सपुत्रे सहबान्धवे ॥ **7.41.6** ॥ 1774

स त्वं रामेण लङ्कायां निर्जितः परमात्मना।
वह सौम्य तमेव त्वमहमाज्ञापयामि ते ॥ **7.41.7** ॥ 1775

परमो ह्येष मे कामो यत् त्वं राघवनन्दनम्।
वहेर्लोकस्य संयानं गच्छस्व विगतज्वरः॥ **7.41.8**॥ 1776

सोऽहं शासनमाज्ञाय धनदस्य महात्मनः।
त्वत्सकाशमनुप्राप्तो निर्विशङ्कः प्रतीच्छ माम्॥ **7.41.9**॥ 1777

अधृष्यः सर्वभूतानां सर्वेषां धनदाज्ञया।
चराम्यहं प्रभावेण तवाज्ञां परिपालयन्॥ **7.41.10**॥ 1778

एवमुक्तस्तदा रामः पुष्पकेण महाबलः।
उवाच पुष्पकं दृष्ट्वा विमानं पुनरागतम्॥ **7.41.11**॥ 1779

यद्येवं स्वागतं तेऽस्तु विमानवर पुष्पक।
आनुकूल्याद् धनेशस्य वृत्तदोषो न नो भवेत्॥ **7.41.12**॥ 1780

लाजैश्चैव तथा पुष्पैर्धूपैश्चैव सुगन्धिभिः।
पूजयित्वा महाबाहू राघवः पुष्पकं तदा॥ **7.41.13**॥ 1781

गम्यतामिति चोवाच आगच्छ त्वं स्मरे यदा।
सिद्धानां च गतौ सौम्य मा विषादेन योजय॥ **7.41.14**॥ 1782

प्रतिघातश्च ते मा भूद् यथेष्टं गच्छतो दिशः।
एवमस्त्विति रामेण पूजयित्वा विसर्जितम्॥ **7.41.15**॥ 1783

अभिप्रेतां दिशं तस्मात् प्रायात् तत् पुष्पकं तदा।
एवमन्तर्हिते तस्मिन् पुष्पके सुकृतात्मनि॥ **7.41.16**॥ 1784

भरतः प्राञ्जलिर्वाक्यमुवाच रघुनन्दनम्।
विबुधात्मनि दृश्यन्ते त्वयि वीर प्रशासति॥ **7.41.17**॥ 1785

अमानुषाणि सत्त्वानि व्याहृतानि मुहुर्मुहुः।
अनामयश्च मर्त्यानां साग्रो मासो गतो ह्ययम्॥ **7.41.18**॥ 1786

जीर्णानामपि सत्त्वानां मृत्युर्नायाति राघव।
अरोगप्रसवा नार्यो वपुष्मन्तो हि मानवाः॥ **7.41.19**॥ 1787

हर्षश्चाभ्यधिको राजञ्जनस्य पुरवासिनः।
काले वर्षति पर्जन्यः पातयन्नमृतं पयः॥ **7.41.20**॥ 1788

वाताश्चापि प्रवान्त्येते स्पर्शयुक्ताः सुखाः शिवाः।
ईदृशो नश्चिरं राजा भवेदिति नरेश्वरः॥ **7.41.21**॥ 1789

कथयन्ति पुरे राजन् पौरजानपदास्तथा।
एता वाचः सुमधुरा भरतेन समीरिताः।
श्रुत्वा रामो मुदा युक्तो बभूव नृपसत्तमः॥ **7.41.22**॥ 1790

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विचत्वारिंशः सर्गः ॥

अशोकवाटिकायां श्रीसीतारामयोर्विहारो गर्भवत्याः सीतायास्तपोवनं द्रष्टुमिच्छाया उदयः श्रीरामेण तदर्थं स्वीकृतिप्रदानम्

स विसृज्य ततो रामः पुष्पकं हेमभूषितम्।
प्रविवेश महाबाहुरशोकवनिकां तदा ॥ **7.42.1** ॥ 1791

चन्दनागुरुचूतैश्च तुङ्गकालेयकैरपि।
देवदारुवनैश्चापि समन्तादुपशोभिताम् ॥ **7.42.2** ॥ 1792

चम्पकाशोकपुन्नागमधूकपनसासनैः।
शोभितां पारिजातैश्च विधूमज्वलनप्रभैः ॥ **7.42.3** ॥ 1793

लोध्रनीपार्जुनैर्नागैः सप्तपर्णातिमुक्तकैः।
मन्दारकदलीगुल्मलताजालसमावृताम् ॥ **7.42.4** ॥ 1794

प्रियङ्गुभिः कदम्बैश्च तथा च बकुलैरपि।
जम्बूभिर्दाडिमैश्चैव कोविदारैश्च शोभिताम् ॥ **7.42.5** ॥ 1795

सर्वदा कुसुमै रम्यैः फलवद्भिर्मनोरमैः।
दिव्यगन्धरसोपेतैस्तरुणाङ्कुरपल्लवैः ॥ **7.42.6** ॥ 1796

तथैव तरुभिर्दिव्यैः शिल्पिभिः परिकल्पितैः।
चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसङ्कुलैः ॥ **7.42.7** ॥ 1797

कोकिलैर्भृङ्गराजैश्च नानावर्णैश्च पक्षिभिः।
शोभितां शतशश्चित्रां चूतवृक्षावतंसकैः॥ **7.42.8**॥ 1798

शातकुम्भनिभाः केचित् केचिदग्निशिखोपमाः।
नीलाञ्जननिभाश्चान्ये भान्ति तत्र स्म पादपाः॥ **7.42.9**॥ 1799

सुरभीणि च पुष्पाणि माल्यानि विविधानि च।
दीर्घिका विविधाकाराः पूर्णाः परमवारिणा॥ **7.42.10**॥ 1800

माणिक्यकृतसोपानाः स्फाटिकान्तरकुट्टिमाः।
फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः॥ **7.42.11**॥ 1801

दात्यूहशुकसङ्घुष्टा हंससारसनादिताः।
तरुभिः पुष्पशबलैस्तीरजैरुपशोभिताः॥ **7.42.12**॥ 1802

प्राकारैर्विविधाकारैः शोभिताश्च शिलातलैः।
तत्रैव च वनोद्देशे वैदूर्यमणिसन्निभैः॥ **7.42.13**॥ 1803

शाद्वलैः परमोपेतां पुष्पितद्रुमकाननाम्।
तत्र सङ्घर्षजातानां वृक्षाणां पुष्पशालिनाम्॥ **7.42.14**॥ 1804

प्रस्तराः पुष्पशबला नभस्तारागणैरिव।
नन्दनं हि यथेन्द्रस्य ब्राह्मं चैत्ररथं यथा॥ **7.42.15**॥ 1805

तथाभूतं हि रामस्य काननं सन्निवेशनम्।
बह्वासनगृहोपेतां लतागृहसमावृताम्॥ **7.42.16**॥ 1806

अशोकवनिकां स्फीतां प्रविश्य रघुनन्दनः।
आसने च शुभाकारे पुष्पप्रकरभूषिते॥ **7.42.17**॥ 1807

कुथास्तरणसंस्तीर्णे रामः सन्निषसाद ह।
सीतामादाय हस्तेन मधु मैरेयकं शुचि॥ **7.42.18**॥ 1808

पाययामास काकुत्स्थः शचीमिव पुरन्दरः।
मांसानि च सुमृष्टानि फलानि विविधानि च॥ **7.42.19**॥ 1809

रामस्याभ्यवहारार्थं किङ्करास्तूर्णमाहरन्।
उपानृत्यंश्च राजानं नृत्यगीतविशारदाः॥ **7.42.20**॥ 1810

अप्सरोरगसङ्घाश्च किन्नरीपरिवारिताः।
दक्षिणा रूपवत्यश्च स्त्रियः पानवशं गताः॥ **7.42.21**॥ 1811

उपानृत्यन्त काकुत्स्थं नृत्यगीतविशारदाः।
मनोऽभिरामा रामास्ता रामो रमयतां वरः॥ **7.42.22**॥ 1812

रमयामास धर्मात्मा नित्यं परमभूषिताः।
स तया सीतया सार्धमासीनो विरराज ह॥ **7.42.23**॥ 1813

अरुन्धत्या इवासीनो वसिष्ठ इव तेजसा।
एवं रामो मुदा युक्तः सीतां सुरसुतोपमाम्॥ **7.42.24**॥ 1814

रमयामास वैदेहीमहन्यहनि देववत्।
तथा तयोर्विहरतोः सीताराघवयोश्चिरम्॥ **7.42.25**॥ 1815

अत्यक्रामच्छुभः कालः शैशिरो भोगदः सदा।
प्राप्तयोर्विविधान् भोगानतीतः शिशिरागमः॥ **7.42.26**॥ 1816

पूर्वाह्णे धर्मकार्याणि कृत्वा धर्मेण धर्मवित्।
शेषं दिवसभागार्धमन्तःपुरगतोऽभवत्॥ **7.42.27**॥ 1817

सीतापि देवकार्याणि कृत्वा पौर्वाह्णिकानि वै।
श्वश्रूणामकरोत् पूजां सर्वासामविशेषतः॥ **7.42.28**॥ 1818

अभ्यगच्छत् ततो रामं विचित्राभरणाम्बरा।
त्रिविष्टपे सहस्राक्षमुपविष्टं यथा शची॥ **7.42.29**॥ 1819

दृष्ट्वा तु राघवः पत्नीं कल्याणेन समन्विताम्।
प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत्॥ **7.42.30**॥ 1820

अब्रवीच्च वरारोहां सीतां सुरसुतोपमाम्।
अपत्यलाभो वैदेहि त्वय्ययं समुपस्थितः॥ **7.42.31**॥ 1821

किमिच्छसि वरारोहे कामः किं क्रियतां तव।
स्मितं कृत्वा तु वैदेही रामं वाक्यमथाब्रवीत्॥ **7.42.32**॥ 1822

तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव।
गङ्गातीरोपविष्टानामृषीणामुग्रतेजसाम्॥ **7.42.33**॥ 1823

फलमूलाशिनां देव पादमूलेषु वर्तितुम्।
एष मे परमः कामो यन्मूलफलभोजिनाम्॥ **7.42.34**॥ 1824

अप्येकरात्रिं काकुत्स्थ निवसेयं तपोवने।
तथेति च प्रतिज्ञातं रामेणाक्लिष्टकर्मणा।
विस्रब्धा भव वैदेहि श्वो गमिष्यस्यसंशयम्॥ **7.42.35**॥ 1825

एवमुक्त्वा तु काकुत्स्थो मैथिलीं जनकात्मजाम्।
मध्यकक्षान्तरं रामो निर्जगाम सुहृद्वृतः॥ **7.42.36**॥ 1826

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिचत्वारिंशः सर्गः ॥

भद्रेण पौराणां मुखादाकर्णितायाः सीताविषयकाशुभचर्चायाः श्रीरामसमक्षे निवेदनम्

तत्रोपविष्टं राजानमुपासन्ते विचक्षणाः।
कथानां बहुरूपाणां हास्यकाराः समन्ततः॥ **7.43.1** ॥ 1827

विजयो मधुमत्तश्च काश्यपो मङ्गलः कुलः।
सुराजिः कालियो भद्रो दन्तवक्त्रः सुमागधः॥ **7.43.2** ॥ 1828

एते कथा बहुविधाः परिहाससमन्विताः।
कथयन्ति स्म संहृष्टा राघवस्य महात्मनः॥ **7.43.3** ॥ 1829

ततः कथायां कस्याञ्चिद् राघवः समभाषत।
काः कथा नगरे भद्र वर्तन्ते विषयेषु च॥ **7.43.4** ॥ 1830

मामाश्रितानि कान्याहुः पौरजानपदा जनाः।
किं च सीतां समाश्रित्य भरतं किं च लक्ष्मणम्॥ **7.43.5** ॥ 1831

किं नु शत्रुघ्नमुद्दिश्य कैकेयीं किं नु मातरम्।
वक्तव्यतां च राजानो वने राज्ये व्रजन्ति च॥ **7.43.6** ॥ 1832

एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत्।
स्थिताः शुभाः कथा राजन् वर्तन्ते पुरवासिनाम्॥ **7.43.7** ॥ 1833

अमुं तु विजयं सौम्य दशग्रीववधार्जितम्।
भूयिष्ठं स्वपुरे पौरैः कथ्यन्ते पुरुषर्षभ॥ **7.43.8**॥ 1834

एवमुक्तस्तु भद्रेण राघवो वाक्यमब्रवीत्।
कथयस्व यथातत्त्वं सर्वं निरवशेषतः॥ **7.43.9**॥ 1835

शुभाशुभानि वाक्यानि कान्याहुः पुरवासिनः।
श्रुत्वेदानीं शुभं कुर्यां न कुर्यामशुभानि च॥ **7.43.10**॥ 1836

कथयस्व च विस्रब्धो निर्भयं विगतज्वरः।
कथयन्ति यथा पौराः पापा जनपदेषु च॥ **7.43.11**॥ 1837

राघवेणैवमुक्तस्तु भद्रः सुरुचिरं वचः।
प्रत्युवाच महाबाहुं प्राञ्जलिः सुसमाहितः॥ **7.43.12**॥ 1838

शृणु राजन् यथा पौराः कथयन्ति शुभाशुभम्।
चत्वरापणरथ्यासु वनेषूपवनेषु च॥ **7.43.13**॥ 1839

दुष्करं कृतवान् रामः समुद्रे सेतुबन्धनम्।
अश्रुतं पूर्वकैः कैश्चिद् देवैरपि सदानवैः॥ **7.43.14**॥ 1840

रावणश्च दुराधर्षो हतः सबलवाहनः।
वानराश्च वशं नीता ऋक्षाश्च सह राक्षसैः॥ **7.43.15**॥ 1841

हत्वा च रावणं सङ्ख्ये सीतामाहृत्य राघवः।
अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत्॥ **7.43.16**॥ 1842

कीदृशं हृदये तस्य सीतासम्भोगजं सुखम्।
अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम्॥ **7.43.17**॥ 1843

लङ्कामपि पुरा नीतामशोकवनिकां गताम्।
रक्षसां वशमापन्नां कथं रामो न कुत्स्यति॥ **7.43.18**॥ 1844

अस्माकमपि दारेषु सहनीयं भविष्यति।
यथा हि कुरुते राजा प्रजास्तमनुवर्तते॥ **7.43.19**॥ 1845

एवं बहुविधा वाचो वदन्ति पुरवासिनः।
नगरेषु च सर्वेषु राजन् जनपदेषु च॥ **7.43.20**॥ 1846

तस्यैवं भाषितं श्रुत्वा राघवः परमार्तवत्।
उवाच सुहृदः सर्वान् कथमेतद् वदन्तु माम्॥ **7.43.21**॥ 1847

सर्वे तु शिरसा भूमावभिवाद्य प्रणम्य च।
प्रत्यूचू राघवं दीनमेवमेतन्न संशयः॥ **7.43.22**॥ 1848

श्रुत्वा तु वाक्यं काकुत्स्थः सर्वेषां समुदीरितम्।
विसर्जयामास तदा वयस्याञ्छत्रुसूदनः॥ **7.43.23**॥ 1849

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुश्चत्वारिंशः सर्गः ॥

श्रीरामस्याज्ञया समेषां भ्रातॄणां तत्पार्श्व आगमनम्

विसृज्य तु सुहृद्वर्गं बुद्ध्या निश्चित्य राघवः।
समीपे द्वाःस्थमासीनमिदं वचनमब्रवीत्॥ **7.44.1**॥ 1850

शीघ्रमानय सौमित्रिं लक्ष्मणं शुभलक्षणम्।
भरतं च महाभागं शत्रुघ्नमपराजितम्॥ **7.44.2**॥ 1851

रामस्य वचनं श्रुत्वा द्वाःस्थो मूर्ध्नि कृताञ्जलिः।
लक्ष्मणस्य गृहं गत्वा प्रविवेशानिवारितः॥ **7.44.3**॥ 1852

उवाच सुमहात्मानं वर्धयित्वा कृताञ्जलिः।
द्रष्टुमिच्छति राजा त्वां गम्यतां तत्र मा चिरम्॥ **7.44.4**॥ 1853

बाढमित्येव सौमित्रिः कृत्वा राघवशासनम्।
प्राद्रवद् रथमारुह्य राघवस्य निवेशनम्॥ **7.44.5**॥ 1854

प्रयान्तं लक्ष्मणं दृष्ट्वा द्वाःस्थो भरतमन्तिकात्।
उवाच भरतं तत्र वर्धयित्वा कृताञ्जलिः॥ **7.44.6**॥ 1855

विनयावनतो भूत्वा राजा त्वां द्रष्टुमिच्छति।
भरतस्तु वचः श्रुत्वा द्वाःस्थाद् रामसमीरितम्॥ **7.44.7**॥ 1856

उत्पपातासनात् तूर्णं पद्भ्यामेव महाबलः।
दृष्ट्वा प्रयान्तं भरतं त्वरमाणः कृताञ्जलिः॥ **7.44.8**॥ 1857

शत्रुघ्नभवनं गत्वा ततो वाक्यमुवाच ह।
एह्यागच्छ रघुश्रेष्ठ राजा त्वां द्रष्टुमिच्छति॥ **7.44.9**॥ 1858

गतो हि लक्ष्मणः पूर्वं भरतश्च महायशाः।
श्रुत्वा तु वचनं तस्य शत्रुघ्नः परमासनात्॥ **7.44.10**॥ 1859

शिरसा वन्द्य धरणीं प्रययौ यत्र राघवः।
द्वाःस्थस्त्वागम्य रामाय सर्वानेव कृताञ्जलिः॥ **7.44.11**॥ 1860

निवेदयामास तथा भ्रातॄन् स्वान् समुपस्थितान्।
कुमारानागताञ्छ्रुत्वा चिन्ताव्याकुलितेन्द्रियः॥ **7.44.12**॥ 1861

अवाङ्मुखो दीनमना द्वाःस्थं वचनमब्रवीत्।
प्रवेशय कुमारांस्त्वं मत्समीपं त्वरान्वितः॥ **7.44.13**॥ 1862

एतेषु जीवितं मह्यमेते प्राणाः प्रिया मम।
आज्ञप्तास्तु नरेन्द्रेण कुमाराः शुक्लवाससः॥ **7.44.14**॥ 1863

प्रह्वाः प्राञ्जलयो भूत्वा विविशुस्ते समाहिताः।
ते तु दृष्ट्वा मुखं तस्य सग्रहं शशिनं यथा॥ **7.44.15**॥ 1864

सन्ध्यागतमिवादित्यं प्रभया परिवर्जितम्।
बाष्पपूर्णे च नयने दृष्ट्वा रामस्य धीमतः।
हतशोभं यथा पद्मं मुखं वीक्ष्य च तस्य ते॥ **7.44.16**॥ 1865

ततोऽभिवाद्य त्वरिताः पादौ रामस्य मूर्धभिः।
तस्थुः समाहिताः सर्वे रामस्त्वश्रूण्यवर्तयत्॥ **7.44.17**॥ 1866

तान् परिष्वज्य बाहुभ्यामुत्थाप्य च महाबलः।
आसनेष्वासतेत्युक्त्वा ततो वाक्यं जगाद ह॥ **7.44.18**॥ 1867

भवन्तो मम सर्वस्वं भवन्तो जीवितं मम।
भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः॥ **7.44.19**॥ 1868

भवन्तः कृतशास्त्रार्था बुद्ध्या च परिनिष्ठिताः।
सभ्भूय च मदर्थोऽयमन्वेष्टव्यो नरेश्वराः॥ **7.44.20**॥ 1869

तथा वदति काकुत्स्थे अवधानपरायणाः।
उद्विग्नमनसः सर्वे किं नु राजाभिधास्यति॥ **7.44.21**॥ 1870

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुश्चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चचत्वारिंशः सर्गः ॥

बन्धूनां समक्षे सर्वत्र प्रसृतस्य लोकापवादस्य वर्णनं कृत्वा श्रीरामेण सीतां वने विसर्जयितुं लक्ष्मणं प्रत्यादेशः

तेषां समुपविष्टानां सर्वेषां दीनचेतसाम्।
उवाच वाक्यं काकुत्स्थो मुखेन परिशुष्यता॥ **7.45.1** ॥ 1871

सर्वे शृणुत भद्रं वो मा कुरुध्वं मनोऽन्यथा।
पौराणां मम सीतायां यादृशी वर्तते कथा॥ **7.45.2** ॥ 1872

पौरापवादः सुमहांस्तथा जनपदस्य च।
वर्तते मयि बीभत्सा सा मे मर्माणि कृन्तति॥ **7.45.3** ॥ 1873

अहं किल कुले जात इक्ष्वाकूणां महात्मनाम्।
सीतापि सत्कुले जाता जनकानां महात्मनाम्॥ **7.45.4** ॥ 1874

जानासि त्वं यथा सौम्य दण्डके विजने वने।
रावणेन हृता सीता स च विध्वंसितो मया॥ **7.45.5** ॥ 1875

तत्र मे बुद्धिरुत्पन्ना जनकस्य सुतां प्रति।
अत्रोषितामिमां सीतामानयेयं कथं पुरीम्॥ **7.45.6** ॥ 1876

प्रत्ययार्थं ततः सीता विवेश ज्वलनं तदा।
प्रत्यक्षं तव सौमित्रे देवानां हव्यवाहनः॥ **7.45.7** ॥ 1877

अपापां मैथिलीमाह वायुश्चाकाशगोचरः।
चन्द्रादित्यौ च शंसेते सुराणां सन्निधौ पुरा॥ **7.45.8**॥ 1878

ऋषीणां चैव सर्वेषामपापां जनकात्मजाम्।
एवं शुद्धसमाचारा देवगन्धर्वसन्निधौ॥ **7.45.9**॥ 1879

लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेशिता।
अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्॥ **7.45.10**॥ 1880

ततो गृहीत्वा वैदेहीमयोध्यामहमागतः।
अयं तु मे महान् वादः शोकश्च हृदि वर्तते॥ **7.45.11**॥ 1881

पौरापवादः सुमहांस्तथा जनपदस्य च।
अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित्॥ **7.45.12**॥ 1882

पतत्येवाधमान् लोकान् यावच्छब्दः प्रकीर्त्यते।
अकीर्तिर्निन्द्यते देवैः कीर्तिर्लोकेषु पूज्यते॥ **7.45.13**॥ 1883

कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम्।
अप्यहं जीवितं जह्यां युष्मान् वा पुरुषर्षभाः॥ **7.45.14**॥ 1884

अपवादभयाद् भीतः किं पुनर्जनकात्मजाम्।
तस्माद् भवन्तः पश्यन्तु पतितं शोकसागरे॥ **7.45.15**॥ 1885

नहि पश्याम्यहं भूतं किञ्चिद् दुःखमतोऽधिकम्।
श्वस्त्वं प्रभाते सौमित्रे सुमन्त्राधिष्ठितं रथम्॥ **7.45.16**॥ 1886

आरुह्य सीतामारोप्य विषयान्ते समुत्सृज।
गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः॥ **7.45.17**॥ 1887

आश्रमो दिव्यसङ्काशस्तमसातीरमाश्रितः।
तत्रैतां विजने देशे विसृज्य रघुनन्दन॥ **7.45.18**॥ 1888

शीघ्रमागच्छ सौमित्रे कुरुष्व वचनं मम।
न चास्मि प्रतिवक्तव्यः सीतां प्रति कथञ्चन॥ **7.45.19**॥ 1889

तस्मात् त्वं गच्छ सौमित्रे नात्र कार्या विचारणा।
अप्रीतिर्हि परा मह्यं त्वयैतत् प्रतिवारिते॥ **7.45.20**॥ 1890

शापिता हि मया यूयं पादाभ्यां जीवितेन च।
ये मां वाक्यान्तरे ब्रूयुरनुनेतुं कथञ्चन॥ **7.45.21**॥ 1891

अहिता नाम ते नित्यं मदभीष्टविघातनात्।
मानयन्तु भवन्तो मां यदि मच्छासने स्थिताः॥ **7.45.22**॥ 1892

इतोऽद्य नीयतां सीता कुरुष्व वचनं मम।
पूर्वमुक्तोऽहमनया गङ्गातीरेऽहमाश्रमान्॥ **7.45.23**॥ 1893

पश्येयमिति तस्याश्च कामः संवर्त्यतामयम्।
एवमुक्त्वा तु काकुत्स्थो बाष्पेण पिहितेक्षणः॥ **7.45.24**॥ 1894

संविवेश स धर्मात्मा भ्रातृभिः परिवारितः।
शोकसंविग्नहृदयो निशश्वास यथा द्विपः॥ **7.45.25**॥ 1895

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्चत्वारिंशः सर्गः ॥

सीतां रथ उपवेश्य वने परित्यक्तुं लक्ष्मणस्य गमनं गङ्गातटे समुपस्थानं च

ततो रजन्यां व्युष्टायां लक्ष्मणो दीनचेतनः।
सुमन्त्रमब्रवीद् वाक्यं मुखेन परिशुष्यता॥ **7.46.1** ॥ 1896

सारथे तुरगाञ्शीघ्रान् योजयस्व रथोत्तमे।
स्वास्तीर्णं राजवचनात् सीतायाश्चासनं शुभम्॥ **7.46.2** ॥ 1897

सीता हि राजवचनादाश्रमं पुण्यकर्मणाम्।
मया नेया महर्षीणां शीघ्रमानीयतां रथः॥ **7.46.3** ॥ 1898

सुमन्त्रस्तु तथेत्युक्त्वा युक्तं परमवाजिभिः।
रथं सुरुचिरप्रख्यं स्वास्तीर्णं सुखशय्यया॥ **7.46.4** ॥ 1899

आनीयोवाच सौमित्रिं मित्राणां मानवर्धनम्।
रथोऽयं समनुप्राप्तो यत्कार्यं क्रियतां प्रभो॥ **7.46.5** ॥ 1900

एवमुक्तः सुमन्त्रेण राजवेश्मनि लक्ष्मणः।
प्रविश्य सीतामासाद्य व्याजहार नरर्षभः॥ **7.46.6** ॥ 1901

त्वया किलैष नृपतिर्वरं वै याचितः प्रभुः।
नृपेण च प्रतिज्ञातमाज्ञप्तश्चाश्रमं प्रति॥ **7.46.7** ॥ 1902

गङ्गातीरे मया देवि ऋषीणामाश्रमाञ्शुभान्।
शीघ्रं गत्वा तु वैदेहि शासनात् पार्थिवस्य नः॥ **7.46.8**॥ 1903

अरण्ये मुनिभिर्जुष्टे अवनेया भविष्यसि।
एवमुक्ता तु वैदेही लक्ष्मणेन महात्मना॥ **7.46.9**॥ 1904

प्रहर्षमतुलं लेभे गमनं चाप्यरोचयत्।
वासांसि च महार्हाणि रत्नानि विविधानि च॥ **7.46.10**॥ 1905

गृहीत्वा तानि वैदेही गमनायोपचक्रमे।
इमानि मुनिपत्नीनां दास्याम्याभरणान्यहम्॥ **7.46.11**॥ 1906

वस्त्राणि च महार्हाणि धनानि विविधानि च।
सौमित्रिस्तु तथेत्युक्त्वा रथमारोप्य मैथिलीम्॥ **7.46.12**॥ 1907

प्रययौ शीघ्रतुरगं रामस्याज्ञामनुस्मरन्।
अब्रवीच्च तदा सीता लक्ष्मणं लक्ष्मिवर्धनम्॥ **7.46.13**॥ 1908

अशुभानि बहून्येव पश्यामि रघुनन्दन।
नयनं मे स्फुरत्यद्य गात्रोत्कम्पश्च जायते॥ **7.46.14**॥ 1909

हृदयं चैव सौमित्रे अस्वस्थमिव लक्षये।
औत्सुक्यं परमं चापि अधृतिश्च परा मम॥ **7.46.15**॥ 1910

शून्यामेव च पश्यामि पृथिवीं पृथुलोचन।
अपि स्वस्ति भवेत् तस्य भ्रातुस्ते भ्रातृवत्सल॥ **7.46.16**॥ 1911

श्वश्रूणां चैव मे वीर सर्वासामविशेषतः।
पुरे जनपदे चैव कुशलं प्राणिनामपि॥ **7.46.17**॥ 1912

इत्यञ्जलिकृता सीता देवता अभ्ययाचत।
लक्ष्मणोऽर्थं ततः श्रुत्वा शिरसा वन्द्य मैथिलीम्॥ **7.46.18**॥ 1913

शिवमित्यब्रवीद्धृष्टो हृदयेन विशुष्यता।
ततो वासमुपागम्य गोमतीतीर आश्रमे॥ **7.46.19**॥ 1914

प्रभाते पुनरुत्थाय सौमित्रिः सूतमब्रवीत्।
योजयस्व रथं शीघ्रमद्य भागीरथीजलम्॥ **7.46.20**॥ 1915

शिरसा धारयिष्यामि त्रियम्बक इवौजसा।
सोऽश्वान् विचारयित्वा तु रथे युक्तान् मनोजवान्॥ **7.46.21**॥ 1916

आरोहस्वेति वैदेहीं सूतः प्राञ्जलिरब्रवीत्।
सा तु सूतस्य वचनादारुरोह रथोत्तमम्॥ **7.46.22**॥ 1917

सीता सौमित्रिणा सार्धं सुमन्त्रेण च धीमता।
आससाद विशालाक्षी गङ्गां पापविनाशिनीम्॥ **7.46.23**॥ 1918

अथार्धदिवसे गत्वा भागीरथ्या जलाशयम्।
निरीक्ष्य लक्ष्मणो दीनः प्ररुरोद महास्वनः॥ **7.46.24**॥ 1919

सीता तु परमायत्ता दृष्ट्वा लक्ष्मणमातुरम्।
उवाच वाक्यं धर्मज्ञा किमिदं रुद्यते त्वया॥ **7.46.25**॥ 1920

जाह्नवीतीरमासाद्य चिराभिलषितं मम।
हर्षकाले किमर्थं मां विषादयसि लक्ष्मण॥ **7.46.26**॥ 1921

नित्यं त्वं रामपार्श्वेषु वर्तसे पुरुषर्षभ।
कच्चिद् विनाकृतस्तेन द्विरात्रं शोकमागतः॥ **7.46.27**॥ 1922

ममापि दयितो रामो जीवितादपि लक्ष्मण।
न चाहमेवं शोचामि मैवं त्वं बालिशो भव॥ **7.46.28**॥ 1923

तारयस्व च मां गङ्गां दर्शयस्व च तापसान्।
ततो मुनिभ्यो वासांसि दास्याम्याभरणानि च॥ **7.46.29**॥ 1924

ततः कृत्वा महर्षीणां यथार्हमभिवादनम्।
तत्र चैकां निशामुष्य यास्यामस्तां पुरी पुनः॥ **7.46.30**॥ 1925

ममापि पद्मपत्राक्षं सिंहोरस्कं कृशोदरम्।
त्वरते हि मनो द्रष्टुं रामं रमयतां वरम्॥ **7.46.31**॥ 1926

तस्यास्तद् वचनं श्रुत्वा प्रमृज्य नयने शुभे।
नाविकानाह्वयामास लक्ष्मणः परवीरहा।
इयं च सज्जा नौश्चेति दाशाः प्राञ्जलयोऽब्रुवन्॥ **7.46.32**॥ 1927

तितीर्षुर्लक्ष्मणो गङ्गां शुभां नावमुपारुहत्।
गङ्गां सन्तारयामास लक्ष्मणस्तां समाहितः॥ **7.46.33**॥ 1928

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्त्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तचत्वारिंशः सर्गः ॥

नावा सीतां गङ्गापारं नीत्वा लक्ष्मणेन तां प्रति दुःखेन तदीयपरित्यागवार्तायाः प्रकटनम्

अथ नावं सुविस्तीर्णां नैषादीं राघवानुजः।
आरुरोह समायुक्तां पूर्वमारोप्य मैथिलीम्॥ **7.47.1**॥ 1929

सुमन्त्रं चैव सरथं स्थीयतामिति लक्ष्मणः।
उवाच शोकसन्तप्तः प्रयाहीति च नाविकम्॥ **7.47.2**॥ 1930

ततस्तीरमुपागम्य भागीरथ्याः स लक्ष्मणः।
उवाच मैथिलीं वाक्यं प्राञ्जलिर्बाष्पसंवृतः॥ **7.47.3**॥ 1931

हृद्गतं मे महच्छल्यं यस्मादार्येण धीमता।
अस्मिन्निमित्ते वैदेहि लोकस्य वचनीकृतः॥ **7.47.4**॥ 1932

श्रेयो हि मरणं मेऽद्य मृत्युर्वा यत्परं भवेत्।
न चास्मिन्नीदृशे कार्ये नियोज्यो लोकनिन्दिते॥ **7.47.5**॥ 1933

प्रसीद च न मे पापं कर्तुमर्हसि शोभने।
इत्यञ्जलिकृतो भूमौ निपपात स लक्ष्मणः॥ **7.47.6**॥ 1934

रुदन्तं प्राञ्जलिं दृष्ट्वा काङ्क्षन्तं मृत्युमात्मनः।
मैथिली भृशसंविग्ना लक्ष्मणं वाक्यमब्रवीत्॥ **7.47.7**॥ 1935

किमिदं नावगच्छामि ब्रूहि तत्त्वेन लक्ष्मण।
पश्यामि त्वां न च स्वस्थमपि क्षेमं महीपतेः॥ **7.47.8**॥ 1936

शापितोऽसि नरेन्द्रेण यत् त्वं सन्तापमागतः।
तद् ब्रूयाः सन्निधौ मह्यमहमाज्ञापयामि ते॥ **7.47.9**॥ 1937

वैदेह्या चोद्यमानस्तु लक्ष्मणो दीनचेतनः।
अवाङ्मुखो बाष्पगलो वाक्यमेतदुवाच ह॥ **7.47.10**॥ 1938

श्रुत्वा परिषदो मध्ये ह्यपवादं सुदारुणम्।
पुरे जनपदे चैव त्वत्कृते जनकात्मजे॥ **7.47.11**॥ 1939

रामः सन्तप्तहृदयो मां निवेद्य गृहं गतः।
न तानि वचनीयानि मया देवि तवाग्रतः॥ **7.47.12**॥ 1940

यानि राज्ञा हृदि न्यस्तान्यमर्षात्पृष्ठतः कृतः।
सा त्वं त्यक्ता नृपतिना निर्दोषा मम सन्निधौ॥ **7.47.13**॥ 1941

पौरापवादभीतेन ग्राह्यं देवि न तेऽन्यथा।
आश्रमान्तेषु च मया त्यक्तव्या त्वं भविष्यसि॥ **7.47.14**॥ 1942

राज्ञः शासनमादाय तथैव किल दौर्हृदम्।
तदेतज्जाह्नवीतीरे ब्रह्मर्षीणां तपोवनम्॥ **7.47.15**॥ 1943

पुण्यं च रमणीयं च मा विषादं कृथाः शुभे।
राज्ञो दशरथस्यैव पितुर्मे मुनिपुङ्गवः॥ **7.47.16**॥ 1944

सखा परमको विप्रो वाल्मीकिः सुमहायशाः।
पादच्छायामुपागम्य सुखमस्य महात्मनः।
उपवासपरैकाग्रा वस त्वं जनकात्मजे॥ **7.47.17**॥ 1945

पतिव्रतात्वमास्थाय रामं कृत्वा सदा हृदि।
श्रेयस्ते परमं देवि तथा कृत्वा भविष्यति॥ 7.47.18॥ 1946

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टचत्वारिंशः सर्गः ॥

सीतायाः सदुःखं वचनं श्रीरामं प्रति तस्याः सन्देशो लक्ष्मणस्य गमनं सीताया विलापश्च

लक्ष्मणस्य वचः श्रुत्वा दारुणं जनकात्मजा।
परं विषादमागम्य वैदेही निपपात ह ॥ **7.48.1** ॥ 1947

सा मुहूर्तमिवासंज्ञा बाष्पपर्याकुलेक्षणा।
लक्ष्मणं दीनया वाचा उवाच जनकात्मजा ॥ **7.48.2** ॥ 1948

मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण।
धात्रा यस्यास्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ **7.48.3** ॥ 1949

किं नु पापं कृतं पूर्व को वा दारैर्वियोजितः।
याहं शुद्धसमाचारा त्यक्ता नृपतिना सती ॥ **7.48.4** ॥ 1950

पुराहमाश्रमे वासं रामपादानुवर्तिनी।
अनुरुध्यापि सौमित्रे दुःखे च परिवर्तिनी ॥ **7.48.5** ॥ 1951

सा कथं ह्याश्रमे सौम्य वत्स्यामि विजनीकृता।
आख्यास्यामि च कस्याहं दुःखं दुःखपरायणा ॥ **7.48.6** ॥ 1952

किं नु वक्ष्यामि मुनिषु कर्म चासत्कृतं प्रभो।
कस्मिन् वा कारणे त्यक्ता राघवेण महात्मना ॥ **7.48.7** ॥ 1953

न खल्वद्यैव सौमित्रे जीवितं जाह्नवीजले।
त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते॥ **7.48.8**॥ 1954

यथाज्ञं कुरु सौमित्रे त्यज्य मां दुःखभागिनीम्।
निदेशे स्थीयतां राज्ञः शृणु चेदं वचो मम॥ **7.48.9**॥ 1955

श्वश्रूणामविशेषेण प्राञ्जलिप्रग्रहेण च।
शिरसा वन्द्य चरणौ कुशलं ब्रूहि पार्थिवम्॥ **7.48.10**॥ 1956

शिरसाभिनतो ब्रूयाः सर्वासामेव लक्ष्मण।
वक्तव्यश्चापि नृपतिधर्मेषु सुसमाहितः॥ **7.48.11**॥ 1957

जानासि च यथा शुद्धा सीता तत्त्वेन राघव।
भक्त्या च परया युक्ता हिता च तव नित्यशः॥ **7.48.12**॥ 1958

अहं त्यक्ता च ते वीर अयशोभीरुणा जने।
यच्च ते वचनीयं स्यादपवादः समुत्थितः॥ **7.48.13**॥ 1959

मया च परिहर्तव्यं त्वं हि मे परमा गतिः।
वक्तव्यश्चैव नृपतिर्धर्मेण सुसमाहितः॥ **7.48.14**॥ 1960

यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा।
परमो ह्येष धर्मस्ते तस्मात् कीर्तिरनुत्तमा॥ **7.48.15**॥ 1961

यत्तु पौरजने राजन् धर्मेण समवाप्नुयात्।
अहं तु नानुशोचामि स्वशरीरं नरर्षभ॥ **7.48.16**॥ 1962

यथापवादं पौराणां तथैव रघुनन्दन।
पतिर्हि देवता नार्याः पतिर्बन्धुः पतिर्गुरुः॥ **7.48.17**॥ 1963

प्राणैरपि प्रियं तस्माद् भर्तुः कार्यं विशेषतः।
इति मद्वचनाद् रामो वक्तव्यो मम सङ्ग्रहः॥ **7.48.18**॥ 1964

निरीक्ष्य माद्य गच्छ त्वमृतुकालातिवर्तिनीम्।
एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः॥ **7.48.19**॥ 1965

शिरसा वन्द्य धरणीं व्याहर्तुं न शशाक ह।
प्रदक्षिणं च तां कृत्वा रुदन्नेव महास्वनः॥ **7.48.20**॥ 1966

ध्यात्वा मुहूर्तं तामाह किं मां वक्ष्यसि शोभने।
दृष्टपूर्वं न ते रूपं पादौ दृष्टौ तवानघे॥ **7.48.21**॥ 1967

कथमत्र हि पश्यामि रामेण रहितां वने।
इत्युक्त्वा तां नमस्कृत्य पुनर्नावमुपारुहत्॥ **7.48.22**॥ 1968

आरुरोह पुनर्नावं नाविकं चाभ्यचोदयत्।
स गत्वा चोत्तरं तीरं शोकभारसमन्वितः॥ **7.48.23**॥ 1969

सम्मूढ इव दुःखेन रथमध्यारुहद् द्रुतम्।
मुहुर्मुहुः परावृत्य दृष्ट्वा सीतामनाथवत्॥ **7.48.24**॥ 1970

चेष्टन्तीं परतीरस्थां लक्ष्मणः प्रययावथ।
दूरस्थं रथमालोक्य लक्ष्मणं च मुहुर्मुहुः।
निरीक्ष्यमाणां तूद्विग्नां सीतां शोकः समाविशत्॥ **7.48.25**॥ 1971

सा दुःखभारावनता यशस्विनी
यशोधरा नाथमपश्यती सती।
रुरोद सा बर्हिणनादिते वने
महास्वनं दुःखपरायणा सती॥ **7.48.26**॥ 1972

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनपञ्चाशः सर्गः ॥

मुनिकुमारेभ्यः श्रुत्वा वाल्मीकेः सीतापार्श्व आगमनं तेन तस्यै सान्त्वनाप्रदानं तस्याः स्वाश्रमे समानयनं च

सीतां तु रुदतीं दृष्ट्वा ते तत्र मुनिदारकाः।
प्राद्रवन् यत्र भगवानास्ते वाल्मीकिरुग्रधीः॥ **7.49.1** ॥ 1973

अभिवाद्य मुनेः पादौ मुनिपुत्रा महर्षये।
सर्वे निवेदयामासुस्तस्यास्तु रुदितस्वनम्॥ **7.49.2** ॥ 1974

अदृष्टपूर्वा भगवन् कस्याप्येषा महात्मनः।
पत्नी श्रीरिव सम्मोहाद् विरौति विकृतानना॥ **7.49.3** ॥ 1975

भगवन् साधु पश्येस्त्वं देवतामिव खाच्च्युताम्।
नद्यास्तु तीरे भगवन् वरस्त्री कापि दुःखिता॥ **7.49.4** ॥ 1976

दृष्टास्माभिः प्ररुदिता दृढं शोकपरायणा।
अनर्हा दुःखशोकाभ्यामेका दीना अनाथवत्॥ **7.49.5** ॥ 1977

न ह्येनां मानुषीं विद्मः सत्क्रियास्याः प्रयुज्यताम्।
आश्रमस्याविदूरे च त्वामियं शरणं गता॥ **7.49.6** ॥ 1978

त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि।
तेषां तु वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित्॥ **7.49.7** ॥ 1979

तपसा लब्धचक्षुष्मान् प्राद्रवद् यत्र मैथिली।
तं प्रयान्तमभिप्रेत्य शिष्या ह्येनं महामतिम्॥ **7.49.8**॥ 1980

तं तु देशमभिप्रेत्य किञ्चित् पद्भ्यां महामतिः।
अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत्।
ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत्॥ **7.49.9**॥ 1981

तां सीतां शोकभारार्तां वाल्मीकिर्मुनिपुङ्गवः।
उवाच मधुरां वाणीं ह्लादयन्निव तेजसा॥ **7.49.10**॥ 1982

स्नुषा दशरथस्य त्वं रामस्य महिषी प्रिया।
जनकस्य सुता राज्ञः स्वागतं ते पतिव्रते॥ **7.49.11**॥ 1983

आयान्ती चासि विज्ञाता मया धर्मसमाधिना।
कारणं चैव सर्वं मे हृदयेनोपलक्षितम्॥ **7.49.12**॥ 1984

तव चैव महाभागे विदितं मम तत्त्वतः।
सर्वं च विदितं मह्यं त्रैलोक्ये यद्धि वर्तते॥ **7.49.13**॥ 1985

अपापां वेद्मि सीते ते तपोलब्धेन चक्षुषा।
विस्रब्धा भव वैदेहि साम्प्रतं मयि वर्तसे॥ **7.49.14**॥ 1986

आश्रमस्याविदूरे मे तापस्यस्तपसि स्थिताः।
तास्त्वां वत्से यथा वत्सं पालयिष्यन्ति नित्यशः॥ **7.49.15**॥ 1987

इदमर्घ्यं प्रतीच्छ त्वं विस्रब्धा विगतज्वरा।
यथा स्वगृहमभ्येत्य विषादं चैव मा कृथाः॥ **7.49.16**॥ 1988

श्रुत्वा तु भाषितं सीता मुनेः परममद्भुतम्।
शिरसा वन्द्य चरणौ तथेत्याह कृताञ्जलिः॥ **7.49.17**॥ 1989

तं प्रयान्तं मुनिं सीता प्राञ्जलिः पृष्ठतोऽन्वगात्।
तं दृष्ट्वा मुनिमायान्तं वैदेह्या मुनिपत्नयः।
उपाजग्मुर्मुदा युक्ता वचनं चेदमब्रुवन्॥ **7.49.18**॥ 1990

स्वागतं ते मुनिश्रेष्ठ चिरस्यागमनं च ते।
अभिवादयामस्त्वां सर्वा उच्यतां किं च कुर्महे॥ **7.49.19**॥ 1991

तासां तद् वचनं श्रुत्वा वाल्मीकिरिदमब्रवीत्।
सीतेयं समनुप्राप्ता पत्नी रामस्य धीमतः॥ **7.49.20**॥ 1992

स्नुषा दशरथस्यैषा जनकस्य सुता सती।
अपापा पतिना त्यक्ता परिपाल्या मया सदा॥ **7.49.21**॥ 1993

इमां भवत्यः पश्यन्तु स्नेहेन परमेण हि।
गौरवान्मम वाक्याच्च पूज्या वोऽस्तु विशेषतः॥ **7.49.22**॥ 1994

मुहुर्मुहुश्च वैदेहीं परिदाय महायशाः।
स्वमाश्रमं शिष्यवृतः पुनरायान्महातपाः॥ **7.49.23**॥ 1995

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशः सर्गः ॥

लक्ष्मणसुमन्त्रयोः संवादः

दृष्ट्वा तु मैथिलीं सीतामाश्रमे सम्प्रवेशिताम्।
सन्तापमगमद् घोरं लक्ष्मणो दीनचेतनः॥ **7.50.1** ॥ 1996

अब्रवीच महातेजाः सुमन्त्रं मन्त्रसारथिम्।
सीतासन्तापजं दुःखं पश्य रामस्य सारथे॥ **7.50.2** ॥ 1997

ततो दुःखतरं किं नु राघवस्य भविष्यति।
पत्नीं शुद्धसमाचारां विसृज्य जनकात्मजाम्॥ **7.50.3** ॥ 1998

व्यक्तं दैवादहं मन्ये राघवस्य विनाभवम्।
वैदेह्या सारथे नित्यं दैवं हि दुरतिक्रमम्॥ **7.50.4** ॥ 1999

यो हि देवान् सगन्धर्वानसुरान् सह राक्षसैः।
निहन्याद् राघवः क्रुद्धः स दैवं पर्युपासते॥ **7.50.5** ॥ 2000

पुरा रामः पितुर्वाक्याद् दण्डके विजने वने।
उषित्वा नव वर्षाणि पञ्च चैव महावने॥ **7.50.6** ॥ 2001

ततो दुःखतरं भूयः सीताया विप्रवासनम्।
पौराणां वचनं श्रुत्वा नृशंसं प्रतिभाति मे॥ **7.50.7** ॥ 2002

को नु धर्माश्रयः सूत कर्मण्यस्मिन् यशोहरे।
मैथिलीं समनुप्राप्तः पौरैर्हीनार्थवादिभिः॥ **7.50.8**॥ 2003

एता वाचो बहुविधाः श्रुत्वा लक्ष्मणभाषिताः।
सुमन्त्रः श्रद्धया प्राज्ञो वाक्यमेतदुवाच ह॥ **7.50.9**॥ 2004

न सन्तापस्त्वया कार्यः सौमित्रे मैथिलीं प्रति।
दृष्टमेतत् पुरा विप्रैः पितुस्ते लक्ष्मणाग्रतः॥ **7.50.10**॥ 2005

भविष्यति दृढं रामो दुःखप्रायो विसौख्यभाक्।
प्राप्स्यते च महाबाहुर्विप्रयोगं प्रियैर्वृतम्॥ **7.50.11**॥ 2006

त्वां चैव मैथिलीं चैव शत्रुघ्नभरतौ तथा।
स त्यजिष्यति धर्मात्मा कालेन महता महान्॥ **7.50.12**॥ 2007

इदं त्वयि न वक्तव्यं सौमित्रे भरतेऽपि वा।
राज्ञा वो व्याहृतं वाक्यं दुर्वासा यदुवाच ह॥ **7.50.13**॥ 2008

महाजनसमीपे च मम चैव नरर्षभ।
ऋषिणा व्याहृतं वाक्यं वसिष्ठस्य च सन्निधौ॥ **7.50.14**॥ 2009

ऋषेस्तु वचनं श्रुत्वा मामाह पुरुषर्षभः।
सूत न क्वचिदेवं ते वक्तव्यं जनसन्निधौ॥ **7.50.15**॥ 2010

तस्याहं लोकपालस्य वाक्यं तत्सुसमाहितः।
नैव जात्वनृतं कुर्यामिति मे सौम्य दर्शनम्॥ **7.50.16**॥ 2011

सर्वथैव न वक्तव्यं मया सौम्य तवाग्रतः।
यदि ते श्रवणे श्रद्धा श्रूयतां रघुनन्दन॥ **7.50.17**॥ 2012

यद्यप्यहं नरेन्द्रेण रहस्यं श्रावितः पुरा।
तथाप्युदाहरिष्यामि दैवं हि दुरतिक्रमम्॥ **7.50.18**॥ 2013

येनेदमीदृशं प्राप्तं दुःखं शोकसमन्वितम्।
न त्वया भरतस्याग्रे शत्रुघ्नस्यापि सन्निधौ॥ **7.50.19**॥ 2014

तच्छ्रुत्वा भाषितं तस्य गम्भीरार्थपदं महत्।
तथ्यं ब्रूहीति सौमित्रिः सूतं तं वाक्यमब्रवीत्॥ **7.50.20**॥ 2015

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकपञ्चाशः सर्गः ॥

मार्गे सुमन्त्रेण दुर्वाससो मुखादाकर्णितां भृगुशापकथां किञ्चिद् भाववृत्तं च वर्णयित्वा दुःखान्विताय लक्ष्मणाय सान्त्वनादानम्

तथा सञ्चोदितः सूतो लक्ष्मणेन महात्मना।
तद् वाक्यमृषिणा प्रोक्तं व्याहर्तुमुपचक्रमे ॥ **7.51.1** ॥ 2016

पुरा नाम्ना हि दुर्वासा अत्रेः पुत्रो महामुनिः।
वसिष्ठस्याश्रमे पुण्ये वार्षिक्यं समुवास ह ॥ **7.51.2** ॥ 2017

तमाश्रमं महातेजाः पिता ते सुमहायशाः।
पुरोहितं महात्मानं दिदृक्षुरगमत् स्वयम् ॥ **7.51.3** ॥ 2018

स दृष्ट्वा सूर्यसङ्काशं ज्वलन्तमिव तेजसा।
उपविष्टं वसिष्ठस्य सव्यपार्श्वे महामुनिम् ॥ **7.51.4** ॥ 2019

तौ मुनी तापसश्रेष्ठौ विनीतो ह्यभ्यवादयत्।
स ताभ्यां पूजितो राजा स्वागतेनासनेन च ॥ **7.51.5** ॥ 2020

पाद्येन फलमूलैश्च उवास मुनिभिः सह।
तेषां तत्रोपविष्टानां तास्ताः सुमधुराः कथाः ॥ **7.51.6** ॥ 2021

बभूवुः परमर्षीणां मध्यादित्यगतेऽहनि।
ततः कथायां कस्याञ्चित् प्राञ्जलिः प्रग्रहो नृपः ॥ **7.51.7** ॥ 2022

उवाच तं महात्मानमत्रेः पुत्रं तपोधनम्।
भगवन् किं प्रमाणेन मम वंशो भविष्यति॥ **7.51.8**॥ 2023

किमायुश्च हि मे रामः पुत्राश्चान्ये किमायुषः।
रामस्य स सुता ये स्युस्तेषामायुः कियद् भवेत्॥ **7.51.9**॥ 2024

काम्यया भगवन् ब्रूहि वंशस्यास्य गतिं मम।
तच्छ्रुत्वा व्याहृतं वाक्यं राज्ञो दशरथस्य तु॥ **7.51.10**॥ 2025

दुर्वासाः सुमहातेजा व्याहर्तुमुपचक्रमे।
शृणु राजन् पुरा वृत्तं तदा देवासुरे युधि॥ **7.51.11**॥ 2026

दैत्याः सुरैर्भर्त्स्यमाना भृगुपत्नीं समाश्रिताः।
तया दत्ताभयास्तत्र न्यवसन्नभयास्तदा॥ **7.51.12**॥ 2027

तया परिगृहीतांस्तान् दृष्ट्वा क्रुद्धः सुरेश्वरः।
चक्रेण शितधारेण भृगुपत्न्याः शिरोऽहरत्॥ **7.51.13**॥ 2028

ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः।
शशाप सहसा क्रुद्धो विष्णुं रिपुकुलार्दनम्॥ **7.51.14**॥ 2029

यस्मादवध्यां मे पत्नीमवधीः क्रोधमूर्छितः।
तस्मात् त्वं मानुषे लोके जनिष्यसि जनार्दन॥ **7.51.15**॥ 2030

तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्।
शापाभिहतचेतास्तु स्वात्मना भावितोऽभवत्॥ **7.51.16**॥ 2031

अर्चयामास तं देवं भृगुः शापेन पीडितः।
तपसाऽऽराधितो देवो ह्यब्रवीद् भक्तवत्सलः॥ **7.51.17**॥ 2032

लोकानां सम्प्रियार्थं तु तं शापं गृह्यमुक्तवान्।
इति शप्तो महातेजा भृगुणा पूर्वजन्मनि॥ **7.51.18**॥ 2033

इहागतो हि पुत्रत्वं तव पार्थिवसत्तम।
राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद॥ **7.51.19**॥ 2034

तत् फलं प्राप्स्यते चापि भृगुशापकृतं महत्।
अयोध्यायाः पती रामो दीर्घकालं भविष्यति॥ **7.51.20**॥ 2035

सुखिनश्च समृद्धाश्च भविष्यन्त्यस्य येऽनुगाः।
दशवर्षसहस्राणि दशवर्षशतानि च॥ **7.51.21**॥ 2036

रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति।
समृद्धैश्चाश्वमेधैश्च इष्ट्वा परमदुर्जयः॥ **7.51.22**॥ 2037

राजवंशांश्च बहुशो बहून् संस्थापयिष्यति।
द्वौ पुत्रौ तु भविष्येते सीतायां राघवस्य तु॥ **7.51.23**॥ 2038

स सर्वमखिलं राज्ञो वंशस्याह गतागतम्।
आख्याय सुमहातेजास्तूष्णीमासीन्महामुनिः॥ **7.51.24**॥ 2039

तूष्णीभूते तदा तस्मिन् राजा दशरथो मुनौ।
अभिवाद्य महात्मानौ पुनरायात् पुरोत्तमम्॥ **7.51.25**॥ 2040

एतद् वचो मया तत्र मुनिना व्याहृतं पुरा।
श्रुतं हृदि च निक्षिप्तं नान्यथा तद् भविष्यति॥ **7.51.26**॥ 2041

सीतायाश्च ततः पुत्रावभिषेक्ष्यति राघवः।
अन्यत्र न त्वयोध्यायां मुनेस्तु वचनं यथा॥ **7.51.27**॥ 2042

एवं गते न सन्तापं कर्तुमर्हसि राघव।
सीतार्थे राघवार्थे वा दृढो भव नरोत्तम॥ **7.51.28**॥ 2043

श्रुत्वा तु व्याहृतं वाक्यं सूतस्य परमाद्भुतम्।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत्॥ **7.51.29**॥ 2044

ततः संवदतोरेवं सूतलक्ष्मणयोः पथि।
अस्तमर्के गते वासं केशिन्यां तावथोषतुः॥ **7.51.30**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विपञ्चाशः सर्गः ॥

अयोध्याया राजभवने प्रविष्टेन लक्ष्मणेन खिन्नं श्रीरामं दृष्ट्वा तस्मै सान्त्वनादानम्

तत्र तां रजनीमुष्य केशिन्यां रघुनन्दनः।
प्रभाते पुनरुत्थाय लक्ष्मणः प्रययौ तदा ॥ **7.52.1** ॥ 2046

ततोऽर्धदिवसे प्राप्ते प्रविवेश महारथः।
अयोध्यां रत्नसम्पूर्णां हृष्टपुष्टजनावृताम् ॥ **7.52.2** ॥ 2047

सौमित्रिस्तु परं दैन्यं जगाम सुमहामतिः।
रामपादौ समासाद्य वक्ष्यामि किमहं गतः ॥ **7.52.3** ॥ 2048

तस्यैवं चिन्तयानस्य भवनं शशिसन्निभम्।
रामस्य परमोदारं पुरस्तात् समदृश्यत ॥ **7.52.4** ॥ 2049

राज्ञस्तु भवनद्वारि सोऽवतीर्य नरोत्तमः।
अवाङ्मुखो दीनमनाः प्रविवेशानिवारितः ॥ **7.52.5** ॥ 2050

स दृष्ट्वा राघवं दीनमासीनं परमासने।
नेत्राभ्यामश्रुपूर्णाभ्यां ददर्शाग्रजमग्रतः ॥ **7.52.6** ॥ 2051

जग्राह चरणौ तस्य लक्ष्मणो दीनचेतनः।
उवाच दीनया वाचा प्राञ्जलिः सुसमाहितः ॥ **7.52.7** ॥ 2052

आर्यस्याज्ञां पुरस्कृत्य विसृज्य जनकात्मजाम्।
गङ्गातीरे यथोद्दिष्टे वाल्मीकेराश्रमे शुभे॥ **7.52.8**॥ 2053

तत्र तां च शुभाचारामाश्रमान्ते यशस्विनीम्।
पुनरप्यागतो वीर पादमूलमुपासितुम्॥ **7.52.9**॥ 2054

मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी।
त्वद्विधा नहि शोचन्ति बुद्धिमन्तो मनस्विनः॥ **7.52.10**॥ 2055

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्॥ **7.52.11**॥ 2056

तस्मात् पुत्रेषु दारेषु मित्रेषु च धनेषु च।
नातिप्रसङ्गः कर्तव्यो विप्रयोगो हि तैर्ध्रुवम्॥ **7.52.12**॥ 2057

शक्तस्त्वमात्मनाऽऽत्मानं विनेतुं मनसा मनः।
लोकान् सर्वांश्च काकुत्स्थ किं पुनः शोकमात्मनः॥ **7.52.13**॥ 2058

नेदृशेषु विमुह्यन्ति त्वद्विधाः पुरुषर्षभाः।
अपवादः स किल ते पुनरेष्यति राघव॥ **7.52.14**॥ 2059

यदर्थं मैथिली त्यक्ता अपवादभयान्नृप।
सोऽपवादः पुरे राजन् भविष्यति न संशयः॥ **7.52.15**॥ 2060

स त्वं पुरुषशार्दूल धैर्येण सुसमाहितः।
त्यजेमां दुर्बलां बुद्धिं सन्तापं मा कुरुष्व ह॥ **7.52.16**॥ 2061

एवमुक्तः स काकुत्स्थो लक्ष्मणेन महात्मना।
उवाच परया प्रीत्या सौमित्रिं मित्रवत्सलः॥ **7.52.17**॥ 2062

एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण।
परितोषश्च मे वीर मम कार्यानुशासने॥ **7.52.18**॥ 2063

निवृत्तिश्चागता सौम्य सन्तापश्च निराकृतः।
भवद्वाक्यैः सुरुचिरैरनुनीतोऽस्मि लक्ष्मण॥ **7.52.19**॥ 2064

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिपञ्चाशः सर्गः ॥

श्रीरामेण कार्यार्थिनामुपेक्षातो नृगसम्बन्धिशापकथां श्रावयित्वा लक्ष्मणस्य कार्यार्थिनां निरीक्षणाय नियोजनम्

लक्ष्मणस्य तु तद् वाक्यं निशम्य परमाद्भुतम्।
सुप्रीतश्चाभवद् रामो वाक्यमेतदुवाच ह॥ **7.53.1**॥ 2065

दुर्लभस्त्वीदृशो बन्धुरस्मिन् काले विशेषतः।
यादृशस्त्वं महाबुद्धिर्मम सौम्य मनोऽनुगः॥ **7.53.2**॥ 2066

यच्च मे हृदये किञ्चिद् वर्तते शुभलक्षण।
तन्निशामय च श्रुत्वा कुरुष्व वचनं मम॥ **7.53.3**॥ 2067

चत्वारो दिवसाः सौम्य कार्यं पौरजनस्य च।
अकुर्वाणस्य सौमित्रे तन्मे मर्माणि कृन्तति॥ **7.53.4**॥ 2068

आहूयन्तां प्रकृतयः पुरोधा मन्त्रिणस्तथा।
कार्यार्थिनश्च पुरुषाः स्त्रियो वा पुरुषर्षभ॥ **7.53.5**॥ 2069

पौरकार्याणि यो राजा न करोति दिने दिने।
संवृते नरके घोरे पतितो नात्र संशयः॥ **7.53.6**॥ 2070

श्रूयते हि पुरा राजा नृगो नाम महायशाः।
बभूव पृथिवीपालो ब्रह्मण्यः सत्यवाक् शुचिः॥ **7.53.7**॥ 2071

स कदाचिद् गवां कोटीः सवत्साः स्वर्णभूषिताः।
नृदेवो भूमिदेवेभ्यः पुष्करेषु ददौ नृपः॥ **7.53.8**॥ 2072

ततः सङ्गाद् गता धेनुः सवत्सा स्पर्शितानघ।
ब्राह्मणस्याहिताग्नेस्तु दरिद्रस्योञ्छवर्तिनः॥ **7.53.9**॥ 2073

स नष्टां गां क्षुधार्तो वै अन्विषंस्तत्र तत्र ह।
नापश्यत् सर्वराष्ट्रेषु संवत्सरगणान् बहून्॥ **7.53.10**॥ 2074

ततः कनखलं गत्वा जीर्णवत्सां निरामयाम्।
ददृशे तां स्विकां धेनुं ब्राह्मणस्य निवेशने॥ **7.53.11**॥ 2075

अथ तां नामधेयेन स्वकेनोवाच ब्राह्मणः।
आगच्छ शबलेत्येवं सा तु शुश्राव गौः स्वरम्॥ **7.53.12**॥ 2076

तस्य तं स्वरमाज्ञाय क्षुधार्तस्य द्विजस्य वै।
अन्वगात् पृष्ठतः सा गौर्गच्छन्तं पावकोपमम्॥ **7.53.13**॥ 2077

योऽपि पालयते विप्रः सोऽपि गामन्वगाद् द्रुतम्।
गत्वा च तमृषिं चष्टे मम गौरिति सत्वरम्॥ **7.53.14**॥ 2078

स्पर्शिता राजसिंहेन मम दत्ता नृगेण ह।
तयोर्ब्राह्मणयोर्वादो महानासीद् विपश्चितोः॥ **7.53.15**॥ 2079

विवदन्तौ ततोऽन्योन्यं दातारमभिजग्मतुः।
तौ राजभवनद्वारि न प्राप्तौ नृगशासनम्॥ **7.53.16**॥ 2080

अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः।
ऊचतुश्च महात्मानौ तावुभौ द्विजसत्तमौ॥ **7.53.17**॥ 2081

क्रुद्धौ परमसन्तप्तौ वाक्यं घोराभिसंहितम्।
अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वं नैषि दर्शनम्॥ **7.53.18**॥ 2082

अदृश्यः सर्वभूतानां कृकलासो भविष्यसि।
बहुवर्षसहस्राणि बहुवर्षशतानि च॥ **7.53.19**॥ 2083

श्वभ्रे त्वं कृकलीभूतो दीर्घकालं निवत्स्यसि।
उत्पत्स्यते हि लोकेऽस्मिन् यदूनां कीर्तिवर्धनः॥ **7.53.20**॥ 2084

वासुदेव इति ख्यातो विष्णुः पुरुषविग्रहः।
स ते मोक्षयिता शापाद् राजंस्तस्माद् भविष्यसि॥ **7.53.21**॥ 2085

कृता च तेन कालेन निष्कृतिस्ते भविष्यति।
भारावतरणार्थं हि नरनारायणावुभौ॥ **7.53.22**॥ 2086

उत्पत्स्येते महावीरौ कलौ युग उपस्थिते।
एवं तौ शापमुत्सृज्य ब्राह्मणौ विगतज्वरौ॥ **7.53.23**॥ 2087

तां गां हि दुर्बलां वृद्धां ददतुर्ब्राह्मणाय वै।
एवं स राजा तं शापमुपभुङ्क्ते सुदारुणम्॥ **7.53.24**॥ 2088

कार्यार्थिनां विमर्दो हि राज्ञां दोषाय कल्पते।
तच्छीघ्रं दर्शनं मह्यमभिवर्तन्तु कार्यिणः॥ **7.53.25**॥ 2089

सुकृतस्य हि कार्यस्य फलं नावैति पार्थिवः।
तस्माद् गच्छ प्रतीक्षस्व सौमित्रे कार्यवाञ्जनः॥ **7.53.26**॥ 2090

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःपञ्चाशः सर्गः ॥

राज्ञा नृगेण स्वपुत्राय राज्यं दत्त्वा भूमौ रुचिरं गर्तं निर्माण्य तत्र प्रविश्य शापस्योपभोगकरणम्

रामस्य भाषितं श्रुत्वा लक्ष्मणः परमार्थवित्।
उवाच प्राञ्जलिर्वाक्यं राघवं दीप्ततेजसम्॥ **7.54.1** ॥ 2091

अल्पापराधे काकुत्स्थ द्विजाभ्यां शाप ईदृशः।
महान् नृगस्य राजर्षेर्यमदण्ड इवापरः॥ **7.54.2** ॥ 2092

श्रुत्वा तु पापसंयुक्तमात्मानं पुरुषर्षभ।
किमुवाच नृगो राजा द्विजौ क्रोधसमन्वितौ॥ **7.54.3** ॥ 2093

लक्ष्मणेनैवमुक्तस्तु राघवः पुनरब्रवीत्।
शृणु सौम्य यथा पूर्वं स राजा शापविक्षतः॥ **7.54.4** ॥ 2094

अथाध्वनि गतौ विप्रौ विज्ञाय स नृपस्तदा।
आहूय मन्त्रिणः सर्वान् नैगमान् सपुरोधसः॥ **7.54.5** ॥ 2095

तानुवाच नृगो राजा सर्वाश्च प्रकृतीस्तथा।
दुःखेन सुसमाविष्टः श्रूयतां मे समाहिताः॥ **7.54.6** ॥ 2096

नारदः पर्वतश्चैव मम दत्त्वा महद्भयम्।
गतौ त्रिभुवनं भद्रौ वायुभूतावनिन्दितौ॥ **7.54.7** ॥ 2097

कुमारोऽयं वसुर्नाम स चेहाद्याभिषिच्यताम्।
श्वभ्रं च यत् सुखस्पर्शं क्रियतां शिल्पिभिर्मम॥ **7.54.8**॥ 2098

यत्राहं सङ्क्षयिष्यामि शापं ब्राह्मणनिःसृतम्।
वर्षघ्नमेकं श्वभ्रं तु हिमघ्नमपरं तथा॥ **7.54.9**॥ 2099

ग्रीष्मघ्नं तु सुखस्पर्शमेकं कुर्वन्तु शिल्पिनः।
फलवन्तश्च ये वृक्षाः पुष्पवत्यश्च या लताः॥ **7.54.10**॥ 2100

विरोप्यन्तां बहुविधाश्छायावन्तश्च गुल्मिनः।
क्रियतां रमणीयं च श्वभ्राणां सर्वतोदिशम्॥ **7.54.11**॥ 2101

सुखमत्र वसिष्यामि यावत्कालस्य पर्ययः।
पुष्पाणि च सुगन्धीनि क्रियन्तां तेषु नित्यशः॥ **7.54.12**॥ 2102

परिवार्य यथा मे स्युरध्यर्धं योजनं तथा।
एवं कृत्वा विधानं स सन्निवेश्य वसुं तदा॥ **7.54.13**॥ 2103

धर्मनित्यः प्रजाः पुत्र क्षत्रधर्मेण पालय।
प्रत्यक्षं ते तथा शापो द्विजाभ्यां मयि पातितः॥ **7.54.14**॥ 2104

नरश्रेष्ठ सरोषाभ्यामपराधेऽपि तादृशे।
मा कृथास्त्वनुसन्तापं मत्कृते हि नरर्षभ॥ **7.54.15**॥ 2105

कृतान्तः कुशलः पुत्र येनास्मि व्यसनीकृतः।
प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति॥ **7.54.16**॥ 2106

लब्धव्यान्येव लभते दुःखानि च सुखानि च।
पूर्वे जात्यन्तरे वत्स मा विषादं कुरुष्व ह॥ **7.54.17**॥ 2107

एवमुक्त्वा नृपस्तत्र सुतं राजा महायशाः।
श्वभ्रं जगाम सुकृतं वासाय पुरुषर्षभ॥ **7.54.18**॥ 2108

एवं प्रविश्येव नृपस्तदानीं
श्वभ्रं महद्रत्नविभूषितं तत्।
सम्पादयामास तदा महात्मा
शापं द्विजाभ्यां हि रुषा विमुक्तम्॥ 7.54.19॥ 2109

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुःपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चपञ्चाशः सर्गः ॥

राज्ञो निमेर्वसिष्ठस्य च मिथः शापेन देहत्यागः

एष ते नृगशापस्य विस्तरोऽभिहितो मया।
यद्यस्ति श्रवणे श्रद्धा शृणुष्वेहापरां कथाम्॥ **7.55.1**॥ 2110

एवमुक्तस्तु रामेण सौमित्रिः पुनरब्रवीत्।
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे नृप॥ **7.55.2**॥ 2111

लक्ष्मणेनैवमुक्तस्तु राम इक्ष्वाकुनन्दनः।
कथां परमधर्मिष्ठां व्याहर्तुमुपचक्रमे॥ **7.55.3**॥ 2112

आसीद् राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम्।
पुत्रो द्वादशमो वीर्ये धर्मे च परिनिष्ठितः॥ **7.55.4**॥ 2113

स राजा वीर्यसम्पन्नः पुरं देवपुरोपमम्।
निवेशयामास तदा अभ्याशे गौतमस्य तु॥ **7.55.5**॥ 2114

पुरस्य सुकृतं नाम वैजयन्तमिति श्रुतम्।
निवेशं यत्र राजर्षिर्निमिश्चक्रे महायशाः॥ **7.55.6**॥ 2115

तस्य बुद्धिः समुत्पन्ना निवेश्य सुमहापुरम्।
यजेयं दीर्घसत्रेण पितुः प्रह्लादयन् मनः॥ **7.55.7**॥ 2116

ततः पितरमामन्त्र्य इक्ष्वाकुं हि मनोः सुतम्।
वसिष्ठं वरयामास पूर्वं ब्रह्मर्षिसत्तमम्॥ **7.55.8**॥ 2117

अनन्तरं स राजर्षिर्निमिरिक्ष्वाकुनन्दनः।
अत्रिमङ्गिरसं चैव भृगुं चैव तपोनिधिम्॥ **7.55.9**॥ 2118

तमुवाच वसिष्ठस्तु निमिं राजर्षिसत्तमम्।
वृतोऽहं पूर्वमिन्द्रेण अन्तरं प्रतिपालय॥ **7.55.10**॥ 2119

अनन्तरं महाविप्रो गौतमः प्रत्यपूरयत्।
वसिष्ठोऽपि महातेजा इन्द्रयज्ञमथाकरोत्॥ **7.55.11**॥ 2120

निमिस्तु राजा विप्रांस्तान् समानीय नराधिपः।
अयजद्धिमवत्पार्श्वे स्वपुरस्य समीपतः।
पञ्चवर्षसहस्राणि राजा दीक्षामथाकरोत्॥ **7.55.12**॥ 2121

इन्द्रयज्ञावसाने तु वसिष्ठो भगवानृषिः।
सकाशमागतो राज्ञो हौत्रं कर्तुमनिन्दितः॥ **7.55.13**॥ 2122

तदन्तरमथापश्यद् गौतमेनाभिपूरितम्।
कोपेन महताविष्टो वसिष्ठो ब्रह्मणः सुतः॥ **7.55.14**॥ 2123

स राज्ञो दर्शनाकाङ्क्षी मुहूर्तं समुपाविशत्।
तस्मिन्नहनि राजर्षिर्निद्रयापहृतो भृशम्॥ **7.55.15**॥ 2124

ततो मन्युर्वसिष्ठस्य प्रादुरासीन्महात्मनः।
अदर्शनेन राजर्षेर्व्याहर्तुमुपचक्रमे॥ **7.55.16**॥ 2125

यस्मात् त्वमन्यं वृतवान् मामवज्ञाय पार्थिव।
चेतनेन विनाभूतो देहस्ते पार्थिवैष्यति॥ **7.55.17**॥ 2126

ततः प्रबुद्धो राजा तु श्रुत्वा शापमुदाहृतम्।
ब्रह्मयोनिमथोवाच स राजा क्रोधमूर्च्छितः॥ **7.55.18**॥ 2127

अजानतः शयानस्य क्रोधेन कलुषीकृतः।
उक्तवान् मम शापाग्निं यमदण्डमिवापरम्॥ **7.55.19**॥ 2128

तस्मात् तवापि ब्रह्मर्षे चेतनेन विनाकृतः।
देहः स सुचिरप्रख्यो भविष्यति न संशयः॥ **7.55.20**॥ 2129

इति रोषवशादुभौ तदानी -
मन्योन्यं शपितौ नृपद्विजेन्द्रौ।
सहसैव बभूवतुर्विदेहौ
तत्तुल्याधिगतप्रभाववन्तौ॥ **7.55.21**॥ 2130

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्पञ्चाशः सर्गः ॥

ब्रह्मणः कथनेन वसिष्ठस्य वरुणरेतसि समावेशो वरुणेनोर्वशीसमीपे एकस्मिन् कलशे स्ववीर्यस्याधानं मित्रशापेनोर्वश्या भूतले पुरूरवसः पार्श्वे स्थित्वा पुत्रस्योत्पादनम्

रामस्य भाषितं श्रुत्वा लक्ष्मणः परवीरहा।
उवाच प्राञ्जलिर्भूत्वा राघवं दीप्ततेजसम्॥ **7.56.1**॥ 2131

निक्षिप्य देहौ काकुत्स्थ कथं तौ द्विजपार्थिवौ।
पुनर्देहेन संयोगं जग्मतुर्देवसम्मतौ॥ **7.56.2**॥ 2132

लक्ष्मणेनैवमुक्तस्तु राम इक्ष्वाकुनन्दनः।
प्रत्युवाच महातेजा लक्ष्मणं पुरुषर्षभः॥ **7.56.3**॥ 2133

तौ परस्परशापेन देहमुत्सृज्य धार्मिकौ।
अभूतां नृपविप्रर्षी वायुभूतौ तपोधनौ॥ **7.56.4**॥ 2134

अशरीरः शरीरस्य कृतेऽन्यस्य महामुनिः।
वसिष्ठस्तु महातेजा जगाम पितुरन्तिकम्॥ **7.56.5**॥ 2135

सोऽभिवाद्य ततः पादौ देवदेवस्य धर्मवित्।
पितामहमथोवाच वायुभूत इदं वचः॥ **7.56.6**॥ 2136

भगवन् निमिशापेन विदेहत्वमुपागमम्।
देवदेव महादेव वायुभूतोऽहमण्डज॥ **7.56.7**॥ 2137

सर्वेषां देहहीनानां महद् दुःखं भविष्यति।
लुप्यन्ते सर्वकार्याणि हीनदेहस्य वै प्रभो॥ **7.56.8**॥ 2138

देहस्यान्यस्य सद्भावे प्रसादं कर्तुमर्हसि।
तमुवाच ततो ब्रह्मा स्वयम्भूरमितप्रभः॥ **7.56.9**॥ 2139

मित्रावरुणजं तेज आविश त्वं महायशः।
अयोनिजस्त्वं भविता तत्रापि द्विजसत्तम।
धर्मेण महता युक्तः पुनरेष्यसि मे वशम्॥ **7.56.10**॥ 2140

एवमुक्तस्तु देवेन अभिवाद्य प्रदक्षिणम्।
कृत्वा पितामहं तूर्णं प्रययौ वरुणालयम्॥ **7.56.11**॥ 2141

तमेव कालं मित्रोऽपि वरुणत्वमकारयत्।
क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः॥ **7.56.12**॥ 2142

एतस्मिन्नेव काले तु उर्वशी परमाप्सराः।
यदृच्छया तमुद्देशमागता सखिभिर्वृता॥ **7.56.13**॥ 2143

तां दृष्ट्वा रूपसम्पन्नां क्रीडन्तीं वरुणालये।
तदाविशत् परो हर्षो वरुणं चोर्वशीकृते॥ **7.56.14**॥ 2144

स तां पद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम्।
वरुणो वरयामास मैथुनायाप्सरोवराम्॥ **7.56.15**॥ 2145

प्रत्युवाच ततः सा तु वरुणं प्राञ्जलिः स्थिता।
मित्रेणाहं वृता साक्षात् पूर्वमेव सुरेश्वर॥ **7.56.16**॥ 2146

वरुणस्त्वब्रवीद् वाक्यं कन्दर्पशरपीडितः।
इदं तेजः समुत्स्रक्ष्ये कुम्भेऽस्मिन् देवनिर्मिते॥ **7.56.17**॥ 2147

एवमुत्सृज्य सुश्रोणि त्वय्यहं वरवर्णिनि।
कृतकामो भविष्यामि यदि नेच्छसि सङ्गमम्॥ **7.56.18**॥ 2148

तस्य तल्लोकनाथस्य वरुणस्य सुभाषितम्।
उर्वशी परमप्रीता श्रुत्वा वाक्यमुवाच ह॥ **7.56.19**॥ 2149

काममेतद् भवत्वेवं हृदयं मे त्वयि स्थितम्।
भावश्चाप्यधिकं तुभ्यं देहो मित्रस्य तु प्रभो॥ **7.56.20**॥ 2150

उर्वश्या एवमुक्तस्तु रेतस्तन्महदद्भुतम्।
ज्वलदग्निसमप्रख्यं तस्मिन् कुम्भे न्यवासृजत्॥ **7.56.21**॥ 2151

उर्वशी त्वगमत् तत्र मित्रो वै यत्र देवता।
तां तु मित्रः सुसङ्क्रुद्ध उर्वशीमिदमब्रवीत्॥ **7.56.22**॥ 2152

मयाभिमन्त्रिता पूर्वं कस्मात् त्वमवसर्जिता।
पतिमन्यं वृतवती किमर्थं दुष्टचारिणि॥ **7.56.23**॥ 2153

अनेन दुष्कृतेन त्वं मत्क्रोधकलुषीकृता।
मनुष्यलोकमास्थाय कञ्चित् कालं निवत्स्यसि॥ **7.56.24**॥ 2154

बुधस्य पुत्रो राजर्षिः काशिराजः पुरूरवाः।
तमभ्यागच्छ दुर्बुद्धे स ते भर्ता भविष्यति॥ **7.56.25**॥ 2155

ततः सा शापदोषेण पुरूरवसमभ्यगात्।
प्रतिष्ठाने पुरूरवं बुधस्यात्मजमौरसम्॥ **7.56.26**॥ 2156

तस्य जज्ञे ततः श्रीमानायुः पुत्रो महाबलः।
नहुषो यस्य पुत्रस्तु बभूवेन्द्रसमद्युतिः॥ **7.56.27**॥ 2157

वज्रमुत्सृज्य वृत्राय श्रान्तेऽथ त्रिदिवेश्वरे।
शतं वर्षसहस्राणि येनेन्द्रत्वं प्रशासितम्॥ **7.56.28**॥ 2158

सा तेन शापेन जगाम भूमिं
तदोर्वशी चारुदती सुनेत्रा।
बहूनि वर्षाण्यवसच्च सुभ्रूः
शापक्षयादिन्द्रसदो ययौ च॥ **7.56.29**॥ 2159

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षट्पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तपञ्चाशः सर्गः ॥

वसिष्ठकर्तृकं नूतनदेहधारणं निमेः प्राणिनां नयनेषु निवासश्च

तां श्रुत्वा दिव्यसङ्काशां कथामद्भुतदर्शनाम्।
लक्ष्मणः परमप्रीतो राघवं वाक्यमब्रवीत्॥ **7.57.1**॥ 2160

निक्षिप्तदेही काकुत्स्थ कथं तौ द्विजपार्थिवौ।
पुनर्देहेन संयोगं जग्मतुर्देवसम्मतौ॥ **7.57.2**॥ 2161

तस्य तद् भाषितं श्रुत्वा रामः सत्यपराक्रमः।
तां कथां कथयामास वसिष्ठस्य महात्मनः॥ **7.57.3**॥ 2162

यः स कुम्भो रघुश्रेष्ठ तेजःपूर्णो महात्मनोः।
तस्मिंस्तेजोमयौ विप्रौ सम्भूतावृषिसत्तमौ॥ **7.57.4**॥ 2163

पूर्वं समभवत् तत्र अगस्त्यो भगवानृषिः।
नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत्॥ **7.57.5**॥ 2164

तद्धि तेजस्तु मित्रस्य उर्वश्याः पूर्वमाहितम्।
तस्मिन् समभवत् कुम्भे तत्तेजो यत्र वारुणम्॥ **7.57.6**॥ 2165

कस्यचित् त्वथ कालस्य मित्रावरुणसम्भवः।
वसिष्ठस्तेजसा युक्तो जज्ञे इक्ष्वाकुदैवतम्॥ **7.57.7**॥ 2166

तमिक्ष्वाकुर्महातेजा जातमात्रमनिन्दितम्।
वव्रे पुरोधसं सौम्य वंशस्यास्य हिताय नः॥ **7.57.8**॥ 2167

एवं त्वपूर्वदेहस्य वसिष्ठस्य महात्मनः।
कथितो निर्गमः सौम्य निमेः शृणु यथाभवत्॥ **7.57.9**॥ 2168

दृष्ट्वा विदेहं राजानमृषयः सर्व एव ते।
तं च ते याजयामासुर्यज्ञदीक्षां मनीषिणः॥ **7.57.10**॥ 2169

तं च देहं नरेन्द्रस्य रक्षन्ति स्म द्विजोत्तमाः।
गन्धैर्माल्यैश्च वस्त्रैश्च पौरभृत्यसमन्विताः॥ **7.57.11**॥ 2170

ततो यज्ञे समाप्ते तु भृगुस्तत्रेदमब्रवीत्।
आनयिष्यामि ते चेतस्तुष्टोऽस्मि तव पार्थिव॥ **7.57.12**॥ 2171

सुप्रीताश्च सुराः सर्वे निमेश्चेतस्तदाब्रुवन्।
वरं वरय राजर्षे क्व ते चेतो निरूप्यताम्॥ **7.57.13**॥ 2172

एवमुक्तः सुरैः सर्वैर्निमेश्चेतस्तदाब्रवीत्।
नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः॥ **7.57.14**॥ 2173

बाढमित्येव विबुधा निमेश्चेतस्तदाब्रुवन्।
नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि॥ **7.57.15**॥ 2174

त्वत्कृते च निमिष्यन्ति चक्षूंषि पृथिवीपते।
वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः॥ **7.57.16**॥ 2175

एवमुक्त्वा तु विबुधाः सर्वे जग्मुर्यथागतम्।
ऋषयोऽपि महात्मानो निमेर्देहं समाहरन्॥ **7.57.17**॥ 2176

अरणिं तत्र निक्षिप्य मथनं चक्रुरोजसा।
मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा॥ **7.57.18**॥ 2177

अरण्यां मध्यमानायां प्रादुर्भूतो महातपाः।
मथनान्मिथिरित्याहुर्जननाजनकोऽभवत्॥ **7.57.19**॥ 2178

यस्माद् विदेहात् सम्भूतो वैदेहस्तु ततः स्मृतः।
एवं विदेहराजश्च जनकः पूर्वकोऽभवत्।
मिथिर्नाम महातेजास्तेनायं मैथिलोऽभवत्॥ **7.57.20**॥ 2179

इति सर्वमशेषतो मया
कथितं सम्भवकारणं तु सौम्य।
नृपपुङ्गवशापजं द्विजस्य
द्विजशापाच्च यदद्भुतं नृपस्य॥ **7.57.21**॥ 2180

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टपञ्चाशः सर्गः ॥

ययातिं प्रति शुक्राचार्यस्य शापः

एवं ब्रुवति रामे तु लक्ष्मणः परवीरहा।
प्रत्युवाच महात्मानं ज्वलन्तमिव तेजसा॥ **7.58.1** ॥ 2181

महदद्भुतमाश्चर्यं विदेहस्य पुरातनम्।
निर्वृत्तं राजशार्दूल वसिष्ठस्य मुनेश्च ह॥ **7.58.2** ॥ 2182

निमिस्तु क्षत्रियः शूरो विशेषेण च दीक्षितः।
न क्षमं कृतवान् राजा वसिष्ठस्य महात्मनः॥ **7.58.3** ॥ 2183

एवमुक्तस्तु तेनायं रामः क्षत्रियपुङ्गवः।
उवाच लक्ष्मणं वाक्यं सर्वशास्त्रविशारदम्॥ **7.58.4** ॥ 2184

रामो रमयतां श्रेष्ठो भ्रातरं दीप्ततेजसम्।
न सर्वत्र क्षमा वीर पुरुषेषु प्रदृश्यते॥ **7.58.5** ॥ 2185

सौमित्रे दुःसहो रोषो यथा क्षान्तो ययातिना।
सत्त्वानुगं पुरस्कृत्य तन्निबोध समाहितः॥ **7.58.6** ॥ 2186

नहुषस्य सुतो राजा ययातिः पौरवर्धनः।
तस्य भार्याद्वयं सौम्य रूपेणाप्रतिमं भुवि॥ **7.58.7** ॥ 2187

एका तु तस्य राजर्षेर्नाहुषस्य पुरस्कृता।
शर्मिष्ठा नाम दैतेयी दुहिता वृषपर्वणः॥ **7.58.8**॥ 2188

अन्या तूशनसः पत्नी ययातेः पुरुषर्षभ।
न तु सा दयिता राज्ञो देवयानी सुमध्यमा॥ **7.58.9**॥ 2189

तयोः पुत्रौ तु सम्भूतौ रूपवन्तौ समाहितौ।
शर्मिष्ठाजनयत् पूरुं देवयानी यदुं तदा॥ **7.58.10**॥ 2190

पूरुस्तु दयितो राज्ञो गुणैर्मातृकृतेन च।
ततो दुःखसमाविष्टो यदुर्मातरमब्रवीत्॥ **7.58.11**॥ 2191

भार्गवस्य कुले जाता देवस्याक्लिष्टकर्मणः।
सहसे ह्यद्य तं दुःखमवमानं च दुःसहम्॥ **7.58.12**॥ 2192

आवां च सहितौ देवि प्रविशाव हुताशनम्।
राजा तु रमतां सार्धं दैत्यपुत्र्या बहुक्षपाः॥ **7.58.13**॥ 2193

यदि वा सहनीयं ते मामनुज्ञातुमर्हसि।
क्षम त्वं न क्षमिष्येऽहं मरिष्यामि न संशयः॥ **7.58.14**॥ 2194

पुत्रस्य भाषितं श्रुत्वा परमार्तस्य रोदतः।
देवयानी तु सङ्क्रुद्धा सस्मार पितरं तदा॥ **7.58.15**॥ 2195

इङ्गितं तदभिज्ञाय दुहितुर्भार्गवस्तदा।
आगतस्त्वरितं तत्र देवयानी स्म यत्र सा॥ **7.58.16**॥ 2196

दृष्ट्वा चाप्रकृतिस्थां तामप्रहृष्टामचेतनाम्।
पिता दुहितरं वाक्यं किमेतदिति चाब्रवीत्॥ **7.58.17**॥ 2197

पृच्छन्तमसकृत् तं वै भार्गवं दीप्ततेजसम्।
देवयानी तु सङ्क्रुद्धा पितरं वाक्यमब्रवीत्॥ **7.58.18**॥ 2198

अहमग्निं विषं तीक्ष्णमपो वा मुनिसत्तम।
भक्षयिष्ये प्रवेक्ष्ये वा न तु शक्ष्यामि जीवितुम्॥ **7.58.19**॥ 2199

न मां त्वमवजानीषे दुःखितामवमानिताम्।
वृक्षस्यावज्ञया ब्रह्मंश्छिद्यन्ते वृक्षजीविनः॥ **7.58.20**॥ 2200

अवज्ञया च राजर्षिः परिभूय च भार्गव।
मय्यवज्ञां प्रयुङ्क्ते हि न च मां बहु मन्यते॥ **7.58.21**॥ 2201

तस्यास्तद् वचनं श्रुत्वा कोपेनाभिपरीवृतः।
व्याहर्तुमुपचक्राम भार्गवो नहुषात्मजम्॥ **7.58.22**॥ 2202

यस्मान्मामवजानीषे नाहुष त्वं दुरात्मवान्।
वयसा जरया जीर्णः शैथिल्यमुपयास्यसि॥ **7.58.23**॥ 2203

एवमुक्त्वा दुहितरं समाश्वास्य स भार्गवः।
पुनर्जगाम ब्रह्मर्षिर्भवनं स्वं महायशाः॥ **7.58.24**॥ 2204

स एवमुक्त्वा द्विजपुङ्गवाग्र्यः
सुतां समाश्वास्य च देवयानीम्।
पुनर्ययौ सूर्यसमानतेजा
दत्त्वा च शापं नहुषात्मजाय॥ **7.58.25**॥ 2205

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनषष्टितमः सर्गः ॥

ययातिना पुत्राय पूरवे वार्धक्यं दत्त्वा तदीययौवनस्य ग्रहणं भोगतृप्तेन तेन पुनश्चिरकालमनु तस्मै तदीययौवनस्य प्रत्यावर्तनं पूरोः पितू राज्येऽभिषेको यदुं प्रति पितुः शापश्च

श्रुत्वा तूशनसं क्रुद्धं तदार्तो नहुषात्मजः।
जरां परमिकां प्राप्य यदुं वचनमब्रवीत्॥ **7.59.1**॥ 2206

यदो त्वमसि धर्मज्ञो मदर्थं प्रतिगृह्यताम्।
जरा परमिका पुत्र भोगै रंस्ये महायशः॥ **7.59.2**॥ 2207

न तावत् कृतकृत्योऽस्मि विषयेषु नरर्षभ।
अनुभूय तदा कामं ततः प्राप्स्याम्यहं जराम्॥ **7.59.3**॥ 2208

यदुस्तद्वचनं श्रुत्वा प्रत्युवाच नरर्षभम्।
पुत्रस्ते दयितः पूरुः प्रतिगृह्णातु वै जराम्॥ **7.59.4**॥ 2209

बहिष्कृतोऽहमर्थेषु सन्निकर्षाच्च पार्थिव।
प्रतिगृह्णातु वै राजन् यैः सहाश्नासि भोजनम्॥ **7.59.5**॥ 2210

तस्य तद् वचनं श्रुत्वा राजा पूरुमथाब्रवीत्।
इयं जरा महाबाहो मदर्थं प्रतिगृह्यताम्॥ **7.59.6**॥ 2211

नाहुषेणैवमुक्तस्तु पूरुः प्राञ्जलिरब्रवीत्।
धन्योऽस्म्यनुगृहीतोऽस्मि शासनेऽस्मि तव स्थितः॥ **7.59.7**॥ 2212

पूरोर्वचनमाज्ञाय नाहुषः परया मुदा।
प्रहर्षमतुलं लेभे जरां सङ्क्रामयच्च ताम्॥ **7.59.8**॥ 2213

ततः स राजा तरुणः प्राप्य यज्ञान् सहस्रशः।
बहुवर्षसहस्राणि पालयामास मेदिनीम्॥ **7.59.9**॥ 2214

अथ दीर्घस्य कालस्य राजा पूरुमथाब्रवीत्।
आनयस्व जरां पुत्र न्यासं निर्यातयस्व मे॥ **7.59.10**॥ 2215

न्यासभूता मया पुत्र त्वयि सङ्क्रामिता जरा।
तस्मात् प्रतिगृहीष्यामि तां जरां मा व्यथां कृथाः॥ **7.59.11**॥ 2216

प्रीतश्चास्मि महाबाहो शासनस्य प्रतिग्रहात्।
त्वां चाहमभिषेक्ष्यामि प्रीतियुक्तो नराधिपम्॥ **7.59.12**॥ 2217

एवमुक्त्वा सुतं पूरुं ययातिर्नहुषात्मजः।
देवयानीसुतं क्रुद्धो राजा वाक्यमुवाच ह॥ **7.59.13**॥ 2218

राक्षसस्त्वं मया जातः क्षत्ररूपो दुरासदः।
प्रतिहंसि ममाज्ञां त्वं प्रजार्थे विफलो भव॥ **7.59.14**॥ 2219

पितरं गुरुभूतं मां यस्मात् त्वमवमन्यसे।
राक्षसान् यातुधानांस्त्वं जनयिष्यसि दारुणान्॥ **7.59.15**॥ 2220

न तु सोमकुलोत्पन्ने वंशे स्थास्यति दुर्मतेः।
वंशोऽपि भवतस्तुल्यो दुर्विनीतो भविष्यति॥ **7.59.16**॥ 2221

तमेवमुक्त्वा राजर्षिः पूरुं राज्यविवर्धनम्।
अभिषेकेण सम्पूज्य आश्रमं प्रविवेश ह॥ **7.59.17**॥ 2222

ततः कालेन महता दिष्टान्तमुपजग्मिवान्।
त्रिदिवं स गतो राजा ययातिर्नहुषात्मजः॥ **7.59.18**॥ 2223

पूरुश्चकार तद् राज्यं धर्मेण महता वृतः।
प्रतिष्ठाने पुरवरे काशिराज्ये महायशाः॥ **7.59.19**॥ 2224

यदुस्तु जनयामास यातुधानान् सहस्रशः।
पुरे क्रौञ्चवने दुर्गे राजवंशबहिष्कृतः॥ **7.59.20**॥ 2225

एष तूशनसा मुक्तः शापोत्सर्गो ययातिना।
धारितः क्षत्रधर्मेण यं निमिश्चक्षमे न च॥ **7.59.21**॥ 2226

एतत् ते सर्वमाख्यातं दर्शनं सर्वकारिणाम्।
अनुवर्तामहे सौम्य दोषो न स्याद् यथा नृगे॥ **7.59.22**॥ 2227

इति कथयति रामे चन्द्रतुल्याननेन
प्रविरलतरतारं व्योम जज्ञे तदानीम्।
अरुणकिरणरक्ता दिग् बभौ चैव पूर्वा
कुसुमरसविमुक्तं वस्त्रमागुण्ठितेव॥ **7.59.23**॥ 2228

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रक्षिप्तेषु प्रथमः सर्गः ॥

श्रीरामद्वारि कार्यार्थिनः शुन आगमनं राजसभायां तमानेतुं श्रीरामस्य लक्ष्मणं प्रत्यादेशः

ततः प्रभाते विमले कृत्वा पौर्वाह्णिकी क्रियाम्।
धर्मासनगतो राजा रामो राजीवलोचनः॥ 1 ॥ 2229

राजधर्मानवेक्षन् वै ब्राह्मणैर्नैगमैः सह।
पुरोधसा वसिष्ठेन ऋषिणा कश्यपेन च॥ 2 ॥ 2230

मन्त्रिभिर्व्यवहारज्ञैस्तथान्यैर्धर्मपाठकैः।
नीतिज्ञैरथ सभ्यैश्च राजभिः सा सभा वृता॥ 3 ॥ 2231

सभा यथा महेन्द्रस्य यमस्य वरुणस्य च।
शुशुभे राजसिंहस्य रामस्याक्लिष्टकर्मणः॥ 4 ॥ 2232

अथ रामोऽब्रवीत् तत्र लक्ष्मणं शुभलक्षणम्।
निर्गच्छ त्वं महाबाहो सुमित्रानन्दवर्धन॥ 5 ॥ 2233

कार्यार्थिनश्च सौमित्रे व्याहर्तुं त्वमुपाक्रम।
रामस्य भाषितं श्रुत्वा लक्ष्मणः शुभलक्षणः॥ 6 ॥ 2234

द्वारदेशमुपागम्य कार्यिणश्चाह्वयत् स्वयम्।
न कश्चिदब्रवीत् तत्र मम कार्यमिहाद्य वै॥ 7 ॥ 2235

नाधयो व्याधयश्चैव रामे राज्यं प्रशासति।
पक्वसस्या वसुमती सर्वौषधिसमन्विता॥ 8॥ 2236

न बालो म्रियते तत्र न युवा न च मध्यमः।
धर्मेण शासितं सर्वं न च बाधा विधीयते॥ 9॥ 2237

दृश्यते न च कार्यार्थी रामे राज्यं प्रशासति।
लक्ष्मणः प्राञ्जलिर्भूत्वा रामायैवं न्यवेदयत्॥ 10॥ 2238

अथ रामः प्रसन्नात्मा सौमित्रिमिदमब्रवीत्।
भूय एव तु गच्छ त्वं कार्यिणः प्रविचारय॥ 11॥ 2239

सम्यक्प्रणीतया नीत्या नाधर्मो विद्यते क्वचित्।
तस्माद् राजभयात् सर्वे रक्षन्तीह परस्परम्॥ 12॥ 2240

बाणा इव मया मुक्ता इह रक्षन्ति मे प्रजाः।
तथापि त्वं महाबाहो प्रजा रक्षस्व तत्परः॥ 13॥ 2241

एवमुक्तस्तु सौमित्रिर्निर्जगाम नृपालयात्।
अपश्यद् द्वारदेशे वै श्वानं तावदवस्थितम्॥ 14॥ 2242

तमेव वीक्षमाणं वै विक्रोशन्तं मुहुर्मुहुः।
दृष्ट्वाथ लक्ष्मणस्तं वै स पप्रच्छाथ वीर्यवान्॥ 15॥ 2243

किं ते कार्यं महाभाग ब्रूहि विस्रब्धमानसः।
लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत॥ 16॥ 2244

सर्वभूतशरण्याय रामायाक्लिष्टकर्मणे।
भयेष्वभयदात्रे च तस्मै वक्तुं समुत्सहे॥ 17॥ 2245

एतच्छ्रुत्वा च वचनं सारमेयस्य लक्ष्मणः।
राघवाय तदाख्यातुं प्रविवेशालयं शुभम्॥ **18**॥ 2246

निवेद्य रामस्य पुनर्निर्जगाम नृपालयात्।
वक्तव्यं यदि ते किञ्चित् तत्त्वं ब्रूहि नृपाय वै॥ **19**॥ 2247

लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत।
देवागारे नृपागारे द्विजवेश्मसु वै तथा॥ **20**॥ 2248

वह्निः शतक्रतुश्चैव सूर्यो वायुश्च तिष्ठति।
नात्र योग्यास्तु सौमित्रे योनीनामधमा वयम्॥ **21**॥ 2249

प्रवेष्टुं नात्र शक्ष्यामि धर्मो विग्रहवान् नृपः।
सत्यवादी रणपटुः सर्वसत्त्वहिते रतः॥ **22**॥ 2250

षाड्गुण्यस्य पदं वेत्ति नीतिकर्ता स राघवः।
सर्वज्ञः सर्वदर्शी च रामो रमयतां वरः॥ **23**॥ 2251

स सोमः स च मृत्युश्च स यमो धनदस्तथा।
वह्निः शतक्रतुश्चैव सूर्यो वै वरुणस्तथा॥ **24**॥ 2252

तस्य त्वं ब्रूहि सौमित्रे प्रजापालः स राघवः।
अनाज्ञप्तस्तु सौमित्रे प्रवेष्टुं नेच्छयाम्यहम्॥ **25**॥ 2253

आनृशंस्यान्महाभागः प्रविवेश महाद्युतिः।
नृपालयं प्रविश्याथ लक्ष्मणो वाक्यमब्रवीत्॥ **26**॥ 2254

श्रूयतां मम विज्ञाप्यं कौसल्यानन्दवर्धन।
यन्मयोक्तं महाबाहो तव शासनजं विभो॥ **27**॥ 2255

श्वा वै ते तिष्ठते द्वारि कार्यार्थी समुपागतः।
लक्ष्मणस्य वचः श्रुत्वा रामो वचनमब्रवीत्।
सम्प्रवेशय वै क्षिप्रं कार्यार्थी योऽत्र तिष्ठति॥ 28॥ 2256

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रक्षिप्तेषु प्रथमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रक्षिप्तेषु द्वितीयः सर्गः ॥

श्वानं प्रति श्रीरामस्य न्यायस्तदिच्छया तत्ताडकस्य ब्राह्मणस्य मठाधीशपदे प्रतिष्ठापनं शुना मठाधीशत्वदोषाणां प्रतिपादनम्

श्रुत्वा रामस्य वचनं लक्ष्मणस्त्वरितस्तदा।
श्वानमाहूय मतिमान् राघवाय न्यवेदयत्॥ 1॥ 2257

दृष्ट्वा समागतं श्वानं रामो वचनमब्रवीत्।
विवक्षितार्थं मे ब्रूहि सारमेय न ते भयम्॥ 2॥ 2258

अथापश्यत तत्रस्थं रामं श्वा भिन्नमस्तकः।
ततो दृष्ट्वा स राजानं सारमेयोऽब्रवीद् वचः॥ 3॥ 2259

राजैव कर्ता भूतानां राजा चैव विनायकः।
राजा सुप्तेषु जागर्ति राजा पालयति प्रजाः॥ 4॥ 2260

नीत्या सुनीतया राजा धर्मं रक्षति रक्षिता।
यदा न पालयेद् राजा क्षिप्रं नश्यन्ति वै प्रजाः॥ 5॥ 2261

राजा कर्ता च गोप्ता च सर्वस्य जगतः पिता।
राजा कालो युगं चैव राजा सर्वमिदं जगत्॥ 6॥ 2262

धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।
यस्माद् धारयते सर्वं त्रैलोक्यं सचराचरम्॥ 7॥ 2263

धारणाद् विद्विषां चैव धर्मेणारञ्जयन् प्रजाः।
तस्माद् धारणमित्युक्तं स धर्म इति निश्चयः॥ 8॥ 2264

एष राजन् परो धर्मः फलवान् प्रेत्य राघव।
नहि धर्माद् भवेत् किञ्चिद् दुष्प्रापमिति मे मतिः॥ 9॥ 2265

दानं दया सतां पूजा व्यवहारेषु चार्जवम्।
एष राम परो धर्मो रक्षणात् प्रेत्य चेह च॥ 10॥ 2266

त्वं प्रमाणं प्रमाणानामसि राघव सुव्रत।
विदितश्चैव ते धर्मः सद्भिराचरितस्तु वै॥ 11॥ 2267

धर्माणां त्वं परं धाम गुणानां सागरोपमः।
अज्ञानाच्च मया राजन्नुक्तस्त्वं राजसत्तम॥ 12॥ 2268

प्रसादयामि शिरसा न त्वं क्रोद्धुमिहार्हसि।
शुनः स वचनं श्रुत्वा राघवो वाक्यमब्रवीत्॥ 13॥ 2269

किं ते कार्यं करोम्यद्य ब्रूहि विस्रब्ध मा चिरम्।
रामस्य वचनं श्रुत्वा सारमेयोऽब्रवीदिदम्॥ 14॥ 2270

धर्मेण राष्ट्रं विन्देत धर्मेणैवानुपालयेत्।
धर्माच्छरण्यतां याति राजा सर्वभयापहः॥ 15॥ 2271

इदं विज्ञाय यत् कृत्यं श्रूयतां मम राघव।
भिक्षुः सर्वार्थसिद्धश्च ब्राह्मणावसथे वसन्॥ 16॥ 2272

तेन दत्तः प्रहारो मे निष्कारणमनागसः।
एतच्छ्रुत्वा तु रामेण द्वाःस्थः सम्प्रेषितस्तदा॥ 17॥ 2273

आनीतश्च द्विजस्तेन सर्वसिद्धार्थकोविदः।
अथ द्विजवरस्तत्र रामं दृष्ट्वा महाद्युतिः॥ 18॥ 2274

किं ते कार्यं मया राम तद् ब्रूहि त्वं ममानघ।
एवमुक्तस्तु विप्रेण रामो वचनमब्रवीत्॥ 19॥ 2275

त्वया दत्तः प्रहारोऽयं सारमेयस्य वै द्विज।
किं तवापकृतं विप्र दण्डेनाभिहतो यतः॥ 20॥ 2276

क्रोधः प्राणहरः शत्रुः क्रोधो मित्रमुखो रिपुः।
क्रोधो ह्यसिर्महातीक्ष्णः सर्वं क्रोधोऽपकर्षति॥ 21॥ 2277

तपते यजते चैव यच्च दानं प्रयच्छति।
क्रोधेन सर्वं हरति तस्मात् क्रोधं विसर्जयेत्॥ 22॥ 2278

इन्द्रियाणां प्रदुष्टानां हयानामिव धावताम्।
कुर्वीत धृत्या सारथ्यं संहृत्येन्द्रियगोचरम्॥ 23॥ 2279

मनसा कर्मणा वाचा चक्षुषा च समाचरेत्।
श्रेयो लोकस्य चरतो न द्वेष्टि न च लिप्यते॥ 24॥ 2280

न तत् कुर्यादसिस्तीक्ष्णः सर्पो वा व्याहतः पदा।
अरिर्वा नित्यसङ्क्रुद्धो यथाऽऽत्मा दुरनुष्ठितः॥ 25॥ 2281

विनीतविनयस्यापि प्रकृतिर्न विधीयते।
प्रकृतिं गूहमानस्य निश्चयेन कृतिर्ध्रुवा॥ 26॥ 2282

एवमुक्तः स विप्रो वै रामेणाक्लिष्टकर्मणा।
द्विजः सर्वार्थसिद्धस्तु अब्रवीद् रामसन्निधौ॥ 27॥ 2283

मया दत्तप्रहारोऽयं क्रोधेनाविष्टचेतसा।
भिक्षार्थमटमानेन काले विगतभैक्षके॥ 28॥ 2284

रथ्यास्थितस्त्वयं श्वा वै गच्छ गच्छेति भाषितः।
अथ स्वैरेण गच्छंस्तु रथ्यान्ते विषमं स्थितः॥ 29॥ 2285

क्रोधेन क्षुधयाविष्टस्ततो दत्तोऽस्य राघव।
प्रहारो राजराजेन्द्र शाधि मामपराधिनम्॥ 30॥ 2286

त्वया शस्तस्य राजेन्द्र नास्ति मे नरकाद्भयम्।
अथ रामेण सम्पृष्टाः सर्व एव सभासदः॥ 31॥ 2287

किं कार्यमस्य वै ब्रूत दण्डो वै कोऽस्य पात्यताम्।
सम्यक्प्रणिहिते दण्डे प्रजा भवति रक्षिता॥ 32॥ 2288

भृग्वाङ्गिरसकुत्साद्या वसिष्ठश्च सकाश्यपः।
धर्मपाठकमुख्याश्च सचिवा नैगमास्तथा॥ 33॥ 2289

एते चान्ये च बहवः पण्डितास्तत्र सङ्गताः।
अवध्यो ब्राह्मणो दण्डैरिति शास्त्रविदो विदुः॥ 34॥ 2290

ब्रुवते राघवं सर्वे राजधर्मेषु निष्ठिताः।
अथ ते मुनयः सर्वे राममेवाब्रुवंस्तदा॥ 35॥ 2291

राजा शास्ता हि सर्वस्य त्वं विशेषेण राघव।
त्रैलोक्यस्य भवाशास्ता देवो विष्णुः सनातनः॥ 36॥ 2292

एवमुक्ते तु तैः सर्वैः श्वा वै वचनमब्रवीत्।
यदि तुष्टोऽसि मे राम यदि देयो वरो मम॥ 37॥ 2293

प्रतिज्ञातं त्वया वीर किं करोमीति विश्रुतम्।
प्रयच्छ ब्राह्मणस्यास्य कौलपत्यं नराधिप॥ 38॥ 2294

कालञ्जरे महाराज कौलपत्यं प्रदीयताम्।
एतच्छ्रुत्वा तु रामेण कौलपत्येऽभिषेचितः॥ 39॥ 2295

प्रययौ ब्राह्मणो हृष्टो गजस्कन्धेन सोऽर्चितः।
अथ ते रामसचिवाः स्मयमाना वचोऽब्रुवन्॥ 40॥ 2296

वरोऽयं दत्त एतस्य नायं शापो महाद्युते।
एवमुक्तस्तु सचिवै रामो वचनमब्रवीत्॥ **41**॥ 2297

न यूयं गतितत्त्वज्ञाः श्वा वै जानाति कारणम्।
अथ पृष्टस्तु रामेण सारमेयोऽब्रवीदिदम्॥ **42**॥ 2298

अहं कुलपतिस्तत्र आसं शिष्टान्नभोजनः।
देवद्विजातिपूजायां दासीदासेषु राघव॥ **43**॥ 2299

संविभागी शुभरतिर्देवद्रव्यस्य रक्षिता।
विनीतः शीलसम्पन्नः सर्वसत्त्वहिते रतः॥ **44**॥ 2300

सोऽहं प्राप्त इमां घोरामवस्थामधमां गतिम्।
एवं क्रोधान्वितो विप्रस्त्यक्तधर्माहिते रतः॥ **45**॥ 2301

क्रुद्धो नृशंसः परुष अविद्वांश्चाप्यधार्मिकः।
कुलानि पातयत्येव सप्त सप्त च राघव॥ **46**॥ 2302

तस्मात् सर्वास्ववस्थासु कौलपत्यं न कारयेत्।
यमिच्छेन्नरकं नेतुं सपुत्रपशुबान्धवम्॥ **47**॥ 2303

देवेष्वधिष्ठितं कुर्याद् गोषु च ब्राह्मणेषु च।
ब्रह्मस्वं देवताद्रव्यं स्त्रीणां बालधनं च यत्॥ **48**॥ 2304

दत्तं हरति यो भूय इष्टैः सह विनश्यति।
ब्राह्मणद्रव्यमादत्ते देवानां चैव राघव॥ **49**॥ 2305

सद्यः पतति घोरे वै नरकेऽवीचिसंज्ञके।
मनसापि हि देवस्वं ब्रह्मस्वं च हरेत्तु यः॥ **50**॥ 2306

निरयान्निरयं चैव पतत्येव नराधमः।
तच्छ्रुत्वा वचनं रामो विस्मयोत्फुल्ललोचनः॥ **51**॥ 2307

श्वाप्यगच्छन्महातेजा यत एवागतस्ततः।
मनस्वी पूर्वजात्या स जातिमात्रोऽपदूषितः।
वाराणस्यां महाभागः प्रायं चोपविवेश ह॥ 52॥ 2308

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रक्षिप्तेषु द्वितीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्टितमः सर्गः ॥

श्रीरामस्य राजसभायां यमुनातीरवासिनामृषीणां शुभागमनं श्रीरामेण तान् सत्कृत्य तेषामभीष्टं पूरयितुं प्रतिज्ञापनमृषिभिस्तस्य प्रशंसनं च

तयोः संवदतोरेवं रामलक्ष्मणयोस्तदा।
वासन्तिकी निशा प्राप्ता न शीता न च घर्मदा॥ **7.60.1** ॥ 2309

ततः प्रभाते विमले कृतपूर्वाह्णिकक्रियः।
अभिचक्राम काकुत्स्थो दर्शनं पौरकार्यवित्॥ **7.60.2** ॥ 2310

ततः सुमन्त्रस्त्वागम्य राघवं वाक्यमब्रवीत्।
एते प्रतिहता राजन् द्वारि तिष्ठन्ति तापसाः॥ **7.60.3** ॥ 2311

भार्गवं च्यवनं चैव पुरस्कृत्य महर्षयः।
दर्शनं ते महाराज चोदयन्ति कृतत्वराः॥ **7.60.4** ॥ 2312

प्रीयमाणा नरव्याघ्र यमुनातीरवासिनः।
तस्य तद् वचनं श्रुत्वा रामः प्रोवाच धर्मवित्॥ **7.60.5** ॥ 2313

प्रवेश्यन्तां महाभागा भार्गवप्रमुखा द्विजाः।
राज्ञस्त्वाज्ञां पुरस्कृत्य द्वाःस्थो मूर्ध्ना कृताञ्जलिः॥ **7.60.6** ॥ 2314

प्रवेशयामास तदा तापसान् सुदुरासदान्।
शतं समधिकं तत्र दीप्यमानं स्वतेजसा॥ **7.60.7** ॥ 2315

प्रविष्टं राजभवनं तापसानां महात्मनाम्।
ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बुसत्कृतैः॥ **7.60.8**॥ 2316

गृहीत्वा फलमूलं च रामस्याभ्याहरन् बहु।
प्रतिगृह्य तु तत् सर्वं रामः प्रीतिपुरस्कृतः॥ **7.60.9**॥ 2317

तीर्थोदकानि सर्वाणि फलानि विविधानि च।
उवाच च महाबाहुः सर्वानेव महामुनीन्॥ **7.60.10**॥ 2318

इमान्यासनमुख्यानि यथार्हमुपविश्यताम्।
रामस्य भाषितं श्रुत्वा सर्व एव महर्षयः॥ **7.60.11**॥ 2319

बृसीषु रुचिराख्यासु निषेदुः काञ्चनीषु ते।
उपविष्टानृषीस्तत्र दृष्ट्वा परपुरञ्जयः।
प्रयतः प्राञ्जलिर्भूत्वा राघवो वाक्यमब्रवीत्॥ **7.60.12**॥ 2320

किमागमनकार्यं वः किं करोमि समाहितः।
आज्ञाप्योऽहं महर्षीणां सर्वकामकरः सुखम्॥ **7.60.13**॥ 2321

इदं राज्यं च सकलं जीवितं च हृदि स्थितम्।
सर्वमेतद् द्विजार्थं मे सत्यमेतद् ब्रवीमि वः॥ **7.60.14**॥ 2322

तस्य तद् वचनं श्रुत्वा साधुकारो महानभूत्।
ऋषीणामुग्रतपसां यमुनातीरवासिनाम्॥ **7.60.15**॥ 2323

ऊचुश्चैव महात्मानो हर्षेण महता वृताः।
उपपन्नं नरश्रेष्ठ तवैव भुवि नान्यतः॥ **7.60.16**॥ 2324

बहवः पार्थिवा राजन्नतिक्रान्ता महाबलाः।
कार्यस्य गौरवं मत्वा प्रतिज्ञां नाभ्यरोचयन्॥ **7.60.17**॥ 2325

त्वया पुनर्ब्राह्मणगौरवादियं
कृता प्रतिज्ञा ह्यनवेक्ष्य कारणम्।
ततश्च कर्ता ह्यसि नात्र संशयो
महाभयात् त्रातुमृषींस्त्वमर्हसि॥ 7.60.18॥ 2326

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकषष्टितमः सर्गः ॥

मधुनोपलब्धस्य वरस्य लवणासुरबलस्य तदत्याचारस्य च वर्णनं कृत्वा ततः प्राप्तं भयं दूरीकर्तुं श्रीराघवं प्रति मुनिभिः प्रार्थनाकरणम्

ब्रुवद्भिरेवमृषिभिः काकुत्स्थो वाक्यमब्रवीत्।
किं कार्यं ब्रूत मुनयो भयं तावदपैतु वः॥ **7.61.1** ॥ 2327

तथा ब्रुवति काकुत्स्थे भार्गवो वाक्यमब्रवीत्।
भयानां शृणु यन्मूलं देशस्य च नरेश्वर॥ **7.61.2** ॥ 2328

पूर्वं कृतयुगे राजन् दैतेयः सुमहामतिः।
लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः॥ **7.61.3** ॥ 2329

ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः।
सुरैश्च परमोदारैः प्रीतिस्तस्यातुलाभवत्॥ **7.61.4** ॥ 2330

स मधुर्वीर्यसम्पन्नो धर्मं च सुसमाहितः।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः॥ **7.61.5** ॥ 2331

शूलं शूलाद् विनिष्कृष्य महावीर्यं महाप्रभम्।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह॥ **7.61.6** ॥ 2332

त्वयायमतुलो धर्मो मत्प्रसादकरः कृतः।
प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम्॥ **7.61.7** ॥ 2333

यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति॥ **7.61.8**॥ 2334

यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः।
तं शूलो भस्मसात्कृत्वा पुनरेष्यति ते करम्॥ **7.61.9**॥ 2335

एवं रुद्राद् वरं लब्ध्वा भूय एव महासुरः।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह॥ **7.61.10**॥ 2336

भगवन् मम वंशस्य शूलमेतदनुत्तमम्।
भवेत् तु सततं देव सुराणामीश्वरो ह्यसि॥ **7.61.11**॥ 2337

तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः।
प्रत्युवाच महादेवो नैतदेवं भविष्यति॥ **7.61.12**॥ 2338

मा भूत् ते विफला वाणी मत्प्रसादकृता शुभा।
भवतः पुत्रमेकं तु शूलमेतद् भविष्यति॥ **7.61.13**॥ 2339

यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते।
अवध्यः सर्वभूतानां शूलहस्तो भविष्यति॥ **7.61.14**॥ 2340

एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम्।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्॥ **7.61.15**॥ 2341

तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा॥ **7.61.16**॥ 2342

तस्याः पुत्रो महावीर्यो लवणो नाम दारुणः।
बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरत्॥ **7.61.17**॥ 2343

तं पुत्रं दुर्विनीतं तु दृष्ट्वा क्रोधसमन्वितः।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत्॥ **7.61.18**॥ 2344

स विहाय इमं लोकं प्रविष्टो वरुणालयम्।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्॥ **7.61.19**॥ 2345

स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान्॥ **7.61.20**॥ 2346

एवम्प्रभावो लवणः शूलं चैव तथाविधम्।
श्रुत्वा प्रमाणं काकुत्स्थ त्वं हि नः परमा गतिः॥ **7.61.21**॥ 2347

बहवः पार्थिवा राम भयार्तैर्ऋषिभिः पुरा।
अभयं याचिता वीर त्रातारं न च विद्महे॥ **7.61.22**॥ 2348

ते वयं रावणं श्रुत्वा हतं सबलवाहनम्।
त्रातारं विद्महे तात नान्यं भुवि नराधिपम्।
तत् परित्रातुमिच्छामो लवणाद् भयपीडितान्॥ **7.61.23**॥ 2349

इति राम निवेदितं तु ते
भयजं कारणमुत्थितं च यत्।
विनिवारयितुं भवान् क्षमः
कुरु तं काममहीनविक्रम॥ **7.61.24**॥ 2350

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विषष्टितमः सर्गः ॥

श्रीरामस्य मुनीन् प्रति लवणासुरस्याहारविहारविषये प्रश्नः शत्रुघ्नस्य रुचिं ज्ञात्वा तेन तस्य लवणवधे नियोजनं च

तथोक्ते तानृषीन् रामः प्रत्युवाच कृताञ्जलिः।
किमाहारः किमाचारो लवणः क्व च वर्तते॥ **7.62.1** ॥ 2351

राघवस्य वचः श्रुत्वा ऋषयः सर्व एव ते।
ततो निवेदयामासुर्लवणो ववृधे यथा॥ **7.62.2** ॥ 2352

आहारः सर्वसत्त्वानि विशेषेण च तापसाः।
आचारो रौद्रता नित्यं वासो मधुवने तथा॥ **7.62.3** ॥ 2353

हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान्।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम्॥ **7.62.4** ॥ 2354

ततोऽन्तराणि सत्त्वानि खादते स महाबलः।
संहारे समनुप्राप्ते व्यादितास्य इवान्तकः॥ **7.62.5** ॥ 2355

तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन्।
घातयिष्यामि तद् रक्षो व्यपगच्छतु वो भयम्॥ **7.62.6** ॥ 2356

प्रतिज्ञाय तथा तेषां मुनीनामुग्रतेजसाम्।
स भ्रातॄन् सहितान् सर्वानुवाच रघुनन्दनः॥ **7.62.7** ॥ 2357

को हन्ता लवणं वीरः कस्यांशः स विधीयताम्।
भरतस्य महाबाहोः शत्रुघ्नस्य च धीमतः॥ **7.62.8**॥ 2358

राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत्।
अहमेनं वधिष्यामि ममांशः स विधीयताम्॥ **7.62.9**॥ 2359

भरतस्य वचः श्रुत्वा धैर्यशौर्यसमन्वितम्।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम्॥ **7.62.10**॥ 2360

शत्रुघ्नस्त्वब्रवीद् वाक्यं प्रणिपत्य नराधिपम्।
कृतकर्मा महाबाहुर्मध्यमो रघुनन्दन॥ **7.62.11**॥ 2361

आर्येण हि पुरा शून्या त्वयोध्या परिपालिता।
सन्तापं हृदये कृत्वा आर्यस्यागमनं प्रति॥ **7.62.12**॥ 2362

दुःखानि च बहूनीह अनुभूतानि पार्थिव।
शयानो दुःखशय्यासु नन्दिग्रामे महायशाः॥ **7.62.13**॥ 2363

फलमूलाशनो भूत्वा जटी चीरधरस्तथा।
अनुभूयेदृशं दुःखमेष राघवनन्दनः॥ **7.62.14**॥ 2364

प्रेष्ये मयि स्थिते राजन् न भूयः क्लेशमाप्नुयात्।
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत्॥ **7.62.15**॥ 2365

एवं भवतु काकुत्स्थ क्रियतां मम शासनम्।
राज्ये त्वामभिषेक्ष्यामि मधोस्तु नगरे शुभे॥ **7.62.16**॥ 2366

निवेशय महाबाहो भरतं यद्यवेक्षसे।
शूरस्त्वं कृतविद्यश्च समर्थश्च निवेशने॥ **7.62.17**॥ 2367

नगरं यमुनाजुष्टं तथा जनपदाञ्शुभान्।
यो हि वंशं समुत्पाट्य पार्थिवस्य निवेशने॥ **7.62.18**॥ 2368

न विधत्ते नृपं तत्र नरकं स हि गच्छति।
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम्॥ **7.62.19**॥ 2369

राज्यं प्रशाधि धर्मेण वाक्यं मे यद्यवेक्षसे।
उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम॥ **7.62.20**॥ 2370

बालेन पूर्वजस्याज्ञा कर्तव्या नात्र संशयः।
अभिषेकं च काकुत्स्थ प्रतीच्छस्व ममोद्यतम्।
वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतम्॥ **7.62.21**॥ 2371

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिषष्टितमः सर्गः ॥

श्रीरामेण शत्रुघ्नस्य मधुराराज्येऽभिषेचनं लवणशूलादात्मरक्षां कर्तुमुपायस्य तं प्रति कथनं च

एवमुक्तस्तु रामेण परां व्रीडामुपागमत्।
शत्रुघ्नो वीर्यसम्पन्नो मन्दं मन्दमुवाच ह॥ **7.63.1**॥ 2372

अधर्मं विद्म काकुत्स्थ अस्मिन्नर्थे नरेश्वर।
कथं तिष्ठत्सु ज्येष्ठेषु कनीयानभिषिच्यते॥ **7.63.2**॥ 2373

अवश्यं करणीयं च शासनं पुरुषर्षभ।
तव चैव महाभाग शासनं दुरतिक्रमम्॥ **7.63.3**॥ 2374

त्वत्तो मया श्रुतं वीर श्रुतिभ्यश्च मया श्रुतम्।
नोत्तरं हि मया वाच्यं मध्यमे प्रतिजानति॥ **7.63.4**॥ 2375

व्याहृतं दुर्वचो घोरं हन्तास्मि लवणं मृधे।
तस्यैवं मे दुरुक्तस्य दुर्गतिः पुरुषर्षभ॥ **7.63.5**॥ 2376

उत्तरं नहि वक्तव्यं ज्येष्ठेनाभिहिते पुनः।
अधर्मसहितं चैव परलोकविवर्जितम्॥ **7.63.6**॥ 2377

सोऽहं द्वितीयं काकुत्स्थ न वक्ष्यामीति चोत्तरम्।
मा द्वितीयेन दण्डो वै निपतेन्मयि मानद॥ **7.63.7**॥ 2378

कामकारो ह्यहं राजंस्तवास्मि पुरुषर्षभ।
अधर्मं जहि काकुत्स्थ मत्कृते रघुनन्दन॥ **7.63.8**॥ 2379

एवमुक्ते तु शूरेण शत्रुघ्नेन महात्मना।
उवाच रामः संहृष्टो भरतं लक्ष्मणं तथा॥ **7.63.9**॥ 2380

सम्भारानभिषेकस्य आनयध्वं समाहिताः।
अद्यैव पुरुषव्याघ्रमभिषेक्ष्यामि राघवम्॥ **7.63.10**॥ 2381

पुरोधसं च काकुत्स्थ नैगमानृत्विजस्तथा।
मन्त्रिणश्चैव तान् सर्वानानयध्वं ममाज्ञया॥ **7.63.11**॥ 2382

राज्ञः शासनमाज्ञाय तथाकुर्वन्महारथाः।
अभिषेकसमारम्भं पुरस्कृत्य पुरोधसम्॥ **7.63.12**॥ 2383

प्रविष्टा राजभवनं राजानो ब्राह्मणास्तथा।
ततोऽभिषेको ववृधे शत्रुघ्नस्य महात्मनः॥ **7.63.13**॥ 2384

सम्प्रहर्षकरः श्रीमान् राघवस्य पुरस्य च।
अभिषिक्तस्तु काकुत्स्थो बभौ चादित्यसन्निभः॥ **7.63.14**॥ 2385

अभिषिक्तः पुरा स्कन्दः सेन्द्रैरिव दिवौकसैः।
अभिषिक्ते तु शत्रुघ्ने रामेणाक्लिष्टकर्मणा॥ **7.63.15**॥ 2386

पौराः प्रमुदिताश्चासन् ब्राह्मणाश्च बहुश्रुताः।
कौसल्या च सुमित्रा च मङ्गलं केकयी तथा॥ **7.63.16**॥ 2387

चक्रुस्ता राजभवने याश्चान्या राजयोषितः।
ऋषयश्च महात्मानो यमुनातीरवासिनः॥ **7.63.17**॥ 2388

हतं लवणमाशंसुः शत्रुघ्नस्याभिषेचनात्।
ततोऽभिषिक्तं शत्रुघ्नमङ्कमारोप्य राघवः।
उवाच मधुरां वाणीं तेजस्तस्याभिपूरयन्॥ **7.63.18**॥ 2389

अयं शरस्त्वमोघस्ते दिव्यः परपुरञ्जयः।
अनेन लवणं सौम्य हन्तासि रघुनन्दन॥ **7.63.19**॥ 2390

सृष्टः शरोऽयं काकुत्स्थ यदा शेते महार्णवे।
स्वयम्भूरजितो दिव्यो यं नापश्यन् सुरासुराः॥ **7.63.20**॥ 2391

अदृश्यः सर्वभूतानां तेनायं हि शरोत्तमः।
सृष्टः क्रोधाभिभूतेन विनाशार्थं दुरात्मनोः॥ **7.63.21**॥ 2392

मधुकैटभयोर्वीर विघाते सर्वरक्षसाम्।
स्रष्टकामेन लोकांस्त्रींस्तौ चानेन हतौ युधि॥ **7.63.22**॥ 2393

तौ हत्वा जनभोगार्थे कैटभं तु मधुं तथा।
अनेन शरमुख्येन ततो लोकांश्चकार सः॥ **7.63.23**॥ 2394

नायं मया शरः पूर्वं रावणस्य वधार्थिना।
मुक्तः शत्रुघ्न भूतानां महान् हासो भवेदिति॥ **7.63.24**॥ 2395

यच्च तस्य महच्छूलं त्र्यम्बकेण महात्मना।
दत्तं शत्रुविनाशाय मधोरायुधमुत्तमम्॥ **7.63.25**॥ 2396

तत् सन्निक्षिप्य भवने पूज्यमानं पुनः पुनः।
दिशः सर्वाः समासाद्य प्राप्नोत्याहारमुत्तमम्॥ **7.63.26**॥ 2397

यदा तु युद्धमाकाङ्क्षन् कश्चिदेनं समाह्वयेत्।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि॥ **7.63.27**॥ 2398

स त्वं पुरुषशार्दूल तमायुधविनाकृतम्।
अप्रविष्टं पुरं पूर्वं द्वारि तिष्ठ धृतायुधः॥ **7.63.28**॥ 2399

अप्रविष्टं च भवनं युद्धाय पुरुषर्षभ।
आह्वयेथा महाबाहो ततो हन्तासि राक्षसम्॥ **7.63.29**॥ 2400

अन्यथा क्रियमाणे तु ह्यवध्यः स भविष्यति।
यदि त्वेवं कृतं वीर विनाशमुपयास्यति॥ **7.63.30**॥ 2401

एतत् ते सर्वमाख्यातं शूलस्य च विपर्ययः।
श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम्॥ **7.63.31**॥ 2402

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःषष्टितमः सर्गः ॥

श्रीरामस्याज्ञया सेनामग्रे प्रेष्य मासमनु शत्रुघ्नस्य मधुरां प्रति प्रस्थानम्

एवमुक्त्वा च काकुत्स्थं प्रशस्य च पुनः पुनः।
पुनरेवापरं वाक्यमुवाच रघुनन्दनः॥ **7.64.1** ॥ 2403

इमान्यश्वसहस्राणि चत्वारि पुरुषर्षभ।
रथानां द्वे सहस्रे च गजानां शतमुत्तमम्॥ **7.64.2** ॥ 2404

अन्तरापणवीथ्यश्च नानापण्योपशोभिताः।
अनुगच्छन्तु काकुत्स्थं तथैव नटनर्तकाः॥ **7.64.3** ॥ 2405

हिरण्यस्य सुवर्णस्य नियुतं पुरुषर्षभ।
आदाय गच्छ शत्रुघ्न पर्याप्तधनवाहनः॥ **7.64.4** ॥ 2406

बलं च सुभृतं वीर हृष्टतुष्टमनुद्धतम्।
सम्भाषासम्प्रदानेन रञ्जयस्व नरोत्तम॥ **7.64.5** ॥ 2407

नह्यर्थास्तत्र तिष्ठन्ति न दारा न च बान्धवाः।
सुप्रीतो भृत्यवर्गस्तु यत्र तिष्ठति राघव॥ **7.64.6** ॥ 2408

अतो हृष्टजनाकीर्णां प्रस्थाप्य महतीं चमूम्।
एक एव धनुष्पाणिर्गच्छ त्वं मधुनो वनम्॥ **7.64.7** ॥ 2409

यथा त्वां न प्रजानाति गच्छन्तं युद्धकाङ्क्षिणम्।
लवणस्तु मधोः पुत्रस्तथा गच्छेरशङ्कितम्॥ **7.64.8**॥ 2410

न तस्य मृत्युरन्योऽस्ति कश्चिद्धि पुरुषर्षभ।
दर्शनं योऽभिगच्छेत स वध्यो लवणेन हि॥ **7.64.9**॥ 2411

स ग्रीष्म अपयाते तु वर्षारात्र उपागते।
हन्यास्त्वं लवणं सौम्य स हि कालोऽस्य दुर्मतेः॥ **7.64.10**॥ 2412

महर्षींस्तु पुरस्कृत्य प्रयान्तु तव सैनिकाः।
यथा ग्रीष्मावशेषेण तरेयुर्जाह्नवीजलम्॥ **7.64.11**॥ 2413

तत्र स्थाप्य बलं सर्वं नदीतीरे समाहितः।
अग्रतो धनुषा सार्धं गच्छ त्वं लघुविक्रम॥ **7.64.12**॥ 2414

एवमुक्तस्तु रामेण शत्रुघ्नस्तान् महाबलान्।
सेनामुख्यान् समानीय ततो वाक्यमुवाच ह॥ **7.64.13**॥ 2415

एते वो गणिता वासा यत्र तत्र निवत्स्यथ।
स्थातव्यं चाविरोधेन यथा बाधा न कस्यचित्॥ **7.64.14**॥ 2416

तथा तांस्तु समाज्ञाप्य प्रस्थाप्य च महद्बलम्।
कौसल्यां च सुमित्रां च कैकेयीं चाभ्यवादयत्॥ **7.64.15**॥ 2417

रामं प्रदक्षिणीकृत्य शिरसाभिप्रणम्य च।
लक्ष्मणं भरतं चैव प्रणिपत्य कृताञ्जलिः॥ **7.64.16**॥ 2418

पुरोहितं वसिष्ठं च शत्रुघ्नः प्रयतात्मवान्।
रामेण चाभ्यनुज्ञातः शत्रुघ्नः शत्रुतापनः।
प्रदक्षिणमथो कृत्वा निर्जगाम महाबलः॥ **7.64.17**॥ 2419

प्रस्थाप्य सेनामथ सोऽग्रतस्तदा
गजेन्द्रवाजिप्रवरौघसङ्कुलाम्।
उवास मासं तु नरेन्द्रपार्श्वत -
स्त्वथ प्रयातो रघुवंशवर्धनः॥ 7.64.18॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुःषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चषष्टितमः सर्गः ॥

वाल्मीकिना शत्रुघ्नं प्रति सौदासस्य कल्माषपादस्य कथायाः श्रावणम्

प्रस्थाप्य च बलं सर्वं मासमात्रोषितः पथि।
एक एवाशु शत्रुघ्नो जगाम त्वरितं तदा ॥ **7.65.1** ॥ 2421

द्विरात्रमन्तरे शूर उष्य राघवनन्दनः।
वाल्मीकेराश्रमं पुण्यमगच्छद् वासमुत्तमम् ॥ **7.65.2** ॥ 2422

सोऽभिवाद्य महात्मानं वाल्मीकि मुनिसत्तमम्।
कृताञ्जलिरथो भूत्वा वाक्यमेतदुवाच ह ॥ **7.65.3** ॥ 2423

भगवन् वस्तुमिच्छामि गुरोः कृत्यादिहागतः।
श्वः प्रभाते गमिष्यामि प्रतीची वारुणी दिशम् ॥ **7.65.4** ॥ 2424

शत्रुघ्नस्य वचः श्रुत्वा प्रहस्य मुनिपुङ्गवः।
प्रत्युवाच महात्मानं स्वागतं ते महायशः ॥ **7.65.5** ॥ 2425

स्वमाश्रममिदं सौम्य राघवाणां कुलस्य वै।
आसनं पाद्यमर्घ्यं च निर्विशङ्कः प्रतीच्छ मे ॥ **7.65.6** ॥ 2426

प्रतिगृह्य तदा पूजां फलमूलं च भोजनम्।
भक्षयामास काकुत्स्थस्तृप्तिं च परमां गतः ॥ **7.65.7** ॥ 2427

स भुक्त्वा फलमूलं च महर्षि तमुवाच ह।
पूर्वा यज्ञविभूतीयं कस्याश्रमसमीपतः॥ **7.65.8**॥ 2428

तत् तस्य भाषितं श्रुत्वा वाल्मीकिर्वाक्यमब्रवीत्।
शत्रुघ्न शृणु यस्येदं बभूवायतनं पुरा॥ **7.65.9**॥ 2429

युष्माकं पूर्वको राजा सुदासस्तस्य भूपतेः।
पुत्रो वीरसहो नाम वीर्यवानतिधार्मिकः॥ **7.65.10**॥ 2430

स बाल एव सौदासो मृगयामुपचक्रमे।
चञ्चूर्यमाणं ददृशे स शूरो राक्षसद्वयम्॥ **7.65.11**॥ 2431

शार्दूलरूपिणौ घोरौ मृगान् बहुसहस्रशः।
भक्षमाणावसन्तुष्टौ पर्याप्तिं नैव जग्मतुः॥ **7.65.12**॥ 2432

स तु तौ राक्षसौ दृष्ट्वा निर्मूगं च वनं कृतम्।
क्रोधेन महताविष्टो जघानैकं महेषुणा॥ **7.65.13**॥ 2433

विनिपात्य तमेकं तु सौदासः पुरुषर्षभः।
विज्वरो विगतामर्षो हतं रक्षो ह्युदैक्षत॥ **7.65.14**॥ 2434

निरीक्षमाणं तं दृष्ट्वा सहायं तस्य रक्षसः।
सन्तापमकरोद् घोरं सौदासं चेदमब्रवीत्॥ **7.65.15**॥ 2435

यस्मादनपराधं तं सहायं मम जघ्निवान्।
तस्मात् तवापि पापिष्ठ प्रदास्यामि प्रतिक्रियाम्॥ **7.65.16**॥ 2436

एवमुक्त्वा तु तद् रक्षस्तत्रैवान्तरधीयत।
कालपर्याययोगेन राजा मित्रसहोऽभवत्॥ **7.65.17**॥ 2437

राजापि यजते यज्ञमस्याश्रमसमीपतः।
अश्वमेधं महायज्ञं तं वसिष्ठोऽप्यपालयत्॥ **7.65.18**॥ 2438

तत्र यज्ञो महानासीद् बहुवर्षगणायुतः।
समृद्धः परया लक्ष्या देवयज्ञसमोऽभवत्॥ **7.65.19**॥ 2439

अथावसाने यज्ञस्य पूर्ववैरमनुस्मरन्।
वसिष्ठरूपी राजानमिति होवाच राक्षसः॥ **7.65.20**॥ 2440

अद्य यज्ञावसानान्ते सामिषं भोजनं मम।
दीयतामतिशीघ्रं वै नात्र कार्या विचारणा॥ **7.65.21**॥ 2441

तच्छ्रुत्वा व्याहृतं वाक्यं रक्षसा ब्रह्मरूपिणा।
सूदान् संस्कारकुशलानुवाच पृथिवीपतिः॥ **7.65.22**॥ 2442

हविष्यं सामिषं स्वादु यथा भवति भोजनम्।
तथा कुरुत शीघ्रं वै परितुष्येद् यथा गुरुः॥ **7.65.23**॥ 2443

शासनात् पार्थिवेन्द्रस्य सूदः सभ्भ्रान्तमानसः।
तच्च रक्षः पुनस्तत्र सूदवेषमथाकरोत्॥ **7.65.24**॥ 2444

स मानुषमथो मासं पार्थिवाय न्यवेदयत्।
इदं स्वादु हविष्यं च सामिषं चान्नमाहृतम्॥ **7.65.25**॥ 2445

स भोजनं वसिष्ठाय पल्या सार्धमुपाहरत्।
मदयन्त्या नरश्रेष्ठ सामिषं रक्षसा हृतम्॥ **7.65.26**॥ 2446

ज्ञात्वा तदामिषं विप्रो मानुषं भाजनं गतम्।
क्रोधेन महताविष्टो व्याहर्तुमुपचक्रमे॥ **7.65.27**॥ 2447

यस्मात् त्वं भोजनं राजन् ममैतद् दातुमिच्छसि।
तस्माद् भोजनमेतत् ते भविष्यति न संशयः॥ **7.65.28**॥ 2448

ततः क्रुद्धस्तु सौदासस्तोयं जग्राह पाणिना।
वसिष्ठं शप्तुमारेभे भार्या चैनमवारयत्॥ **7.65.29**॥ 2449

राजन् प्रभुर्यतोऽस्माकं वसिष्ठो भगवानृषिः।
प्रतिशप्तुं न शक्तस्त्वं देवतुल्यं पुरोधसम्॥ **7.65.30**॥ 2450

ततः क्रोधमयं तोयं तेजोबलसमन्वितम्।
व्यसर्जयत धर्मात्मा ततः पादौ सिषेच च॥ **7.65.31**॥ 2451

तेनास्य राज्ञस्तौ पादौ तदा कल्माषतां गतौ।
तदाप्रभृति राजासौ सौदासः सुमहायशाः॥ **7.65.32**॥ 2452

कल्माषपादः संवृत्तः ख्यातश्चैव तथा नृपः।
स राजा सह पत्न्या वै प्रणिपत्य मुहुर्मुहुः।
पुनर्वसिष्ठं प्रोवाच यदुक्तं ब्रह्मरूपिणा॥ **7.65.33**॥ 2453

तच्छ्रुत्वा पार्थिवेन्द्रस्य रक्षसा विकृतं च तत्।
पुनः प्रोवाच राजानं वसिष्ठः पुरुषर्षभम्॥ **7.65.34**॥ 2454

मया रोषपरीतेन यदिदं व्याहृतं वचः।
नैतच्छक्यं वृथा कर्तुं प्रदास्यामि च ते वरम्॥ **7.65.35**॥ 2455

कालो द्वादशवर्षाणि शापस्यान्तो भविष्यति।
मत् प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि॥ **7.65.36**॥ 2456

एवं स राजा तं शापमुपभुज्यारिसूदनः।
प्रतिलेभे पुना राज्यं प्रजाश्चैवान्वपालयत्॥ **7.65.37**॥ 2457

तस्य कल्माषपादस्य यज्ञस्यायतनं शुभम्।
आश्रमस्य समीपेऽस्य यन्मां पृच्छसि राघव॥ **7.65.38**॥ 2458

तस्य तां पार्थिवेन्द्रस्य कथां श्रुत्वा सुदारुणाम्।
विवेश पर्णशालायां महर्षिमभिवाद्य च॥ **7.65.39**॥ 2459

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्ढष्टितमः सर्गः ॥

सीतागर्भतः पुत्रद्वयस्य जन्म वाल्मीकिना तयो रक्षाव्यवस्थाकरणममुना वृत्तेन प्रसन्नस्य शत्रुघ्नस्य ततः प्रस्थाय यमुनातटे गमनं च

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत्।
तामेव रात्रिं सीतापि प्रसूता दारकद्वयम्॥ **7.66.1** ॥ 2460

ततोऽर्धरात्रसमये बालका मुनिदारकाः।
वाल्मीकेः प्रियमाचख्युः सीतायाः प्रसवं शुभम्॥ **7.66.2** ॥ 2461

भगवन् रामपत्नी सा प्रसूता दारकद्वयम्।
ततो रक्षां महातेजः कुरु भूतविनाशिनीम्॥ **7.66.3** ॥ 2462

तेषां तद् वचनं श्रुत्वा महर्षिः समुपागमत्।
बालचन्द्रप्रतीकाशौ देवपुत्रौ महौजसौ॥ **7.66.4** ॥ 2463

जगाम तत्र हृष्टात्मा ददर्श च कुमारकौ।
भूतघ्नीं चाकरोत् ताभ्यां रक्षां रक्षोविनाशिनीम्॥ **7.66.5** ॥ 2464

कुशमुष्टिमुपादाय लवं चैव तु स द्विजः।
वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम्॥ **7.66.6** ॥ 2465

यस्तयोः पूर्वजो जातः स कुशैर्मन्त्रसत्कृतैः।
निर्मार्जनीयस्तु तदा कुश इत्यस्य नाम तत्॥ **7.66.7** ॥ 2466

यश्चावरो भवेत् ताभ्यां लवेन सुसमाहितः।
निर्मार्जनीयो वृद्धाभिर्लवेति च स नामतः॥ **7.66.8**॥ 2467

एवं कुशलवौ नाम्ना तावुभौ यमजातकौ।
मत्कृताभ्यां च नामभ्यां ख्यातियुक्तौ भविष्यतः॥ **7.66.9**॥ 2468

तां रक्षां जगृहुस्तां च मुनिहस्तात् समाहिताः।
अकुर्वंश्च ततो रक्षां तयोर्विगतकल्मषाः॥ **7.66.10**॥ 2469

तथा तां क्रियमाणां च वृद्धाभिर्गोत्रनाम च।
सङ्कीर्तनं च रामस्य सीतायाः प्रसवौ शुभौ॥ **7.66.11**॥ 2470

अर्धरात्रे तु शत्रुघ्नः शुश्राव सुमहत् प्रियम्।
पर्णशालां ततो गत्वा मातर्दिष्ट्येति चाब्रवीत्॥ **7.66.12**॥ 2471

तदा तस्य प्रहृष्टस्य शत्रुघ्नस्य महात्मनः।
व्यतीता वार्षिकी रात्रिः श्रावणी लघुविक्रमा॥ **7.66.13**॥ 2472

प्रभाते सुमहावीर्यः कृत्वा पौर्वाह्णिकीं क्रियाम्।
मुनिं प्राञ्जलिरामन्त्र्य ययौ पश्चान्मुखः पुनः॥ **7.66.14**॥ 2473

स गत्वा यमुनातीरं सप्तरात्रोषितः पथि।
ऋषीणां पुण्यकीर्तीनामाश्रमे वासमभ्ययात्॥ **7.66.15**॥ 2474

स तत्र मुनिभिः सार्धं भार्गवप्रमुखैर्नृपः।
कथाभिरभिरूपाभिर्वासं चक्रे महायशाः॥ **7.66.16**॥ 2475

स काञ्चनाद्यैर्मुनिभिः समेतै रघुप्रवीरो रजनीं तदानीम्।
कथाप्रकारैर्बहुभिर्महात्मा विरामयामास नरेन्द्रसूनुः॥ **7.66.17**॥ 2476

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तषष्टितमः सर्गः ॥

च्यवनेन शत्रुघ्नं प्रति लवणासुरशूलशक्तिं परिचाययता पूर्वघटितस्य राज्ञो मान्धातुर्वधस्य श्रावणम्

अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम्।
पप्रच्छ च्यवनं विप्रं लवणस्य यथाबलम्॥ **7.67.1** ॥ 2477

शूलस्य च बलं ब्रह्मन् के च पूर्वं विनाशिताः।
अनेन शूलमुख्येन द्वन्द्वयुद्धमुपागताः॥ **7.67.2** ॥ 2478

तस्य तद् वचनं श्रुत्वा शत्रुघ्नस्य महात्मनः।
प्रत्युवाच महातेजाश्च्यवनो रघुनन्दनम्॥ **7.67.3** ॥ 2479

असङ्ख्येयानि कर्माणि यान्यस्य रघुनन्दन।
इक्ष्वाकुवंशप्रभवे यद् वृत्तं तच्छृणुष्व मे॥ **7.67.4** ॥ 2480

अयोध्यायां पुरा राजा युवनाश्वसुतो बली।
मान्धाता इति विख्यातस्त्रिषु लोकेषु वीर्यवान्॥ **7.67.5** ॥ 2481

स कृत्वा पृथिवीं कृत्स्नां शासने पृथिवीपतिः।
सुरलोकमितो जेतुमुद्योगमकरोन्नृपः॥ **7.67.6** ॥ 2482

इन्द्रस्य च भयं तीव्रं सुराणां च महात्मनाम्।
मान्धातरि कृतोद्योगे देवलोकजिगीषया॥ **7.67.7** ॥ 2483

अर्धासनेन शक्रस्य राज्यार्धेन च पार्थिवः।
वन्द्यमानः सुरगणैः प्रतिज्ञामध्यरोहत॥ **7.67.8**॥ 2484

तस्य पापमभिप्रायं विदित्वा पाकशासनः।
सान्त्वपूर्वमिदं वाक्यमुवाच युवनाश्वजम्॥ **7.67.9**॥ 2485

राजा त्वं मानुषे लोके न तावत् पुरुषर्षभ।
अकृत्वा पृथिवीं वश्यां देवराज्यमिहेच्छसि॥ **7.67.10**॥ 2486

यदि वीर समग्रा ते मेदिनी निखिला वशे।
देवराज्यं कुरुष्वेह सभृत्यबलवाहनः॥ **7.67.11**॥ 2487

इन्द्रमेवं ब्रुवाणं तं मान्धाता वाक्यमब्रवीत्।
क्व मे शक्र प्रतिहतं शासनं पृथिवीतले॥ **7.67.12**॥ 2488

तमुवाच सहस्राक्षो लवणो नाम राक्षसः।
मधुपुत्रो मधुवने न तेऽज्ञां कुरुतेऽनघ॥ **7.67.13**॥ 2489

तच्छ्रुत्वा विप्रियं घोरं सहस्राक्षेण भाषितम्।
व्रीडितोऽवाङ्मुखो राजा व्याहर्तुं न शशाक ह॥ **7.67.14**॥ 2490

आमन्त्र्य तु सहस्राक्षं प्रायात् किञ्चिदवाङ्मुखः।
पुनरेवागमच्छ्रीमानिमं लोकं नरेश्वरः॥ **7.67.15**॥ 2491

स कृत्वा हृदयेऽमर्षं सभृत्यबलवाहनः।
आजगाम मधोः पुत्रं वशे कर्तुमरिन्दमः॥ **7.67.16**॥ 2492

स काङ्क्षमाणो लवणं युद्धाय पुरुषर्षभः।
दूतं सम्प्रेषयामास सकाशं लवणस्य सः॥ **7.67.17**॥ 2493

स गत्वा विप्रियाण्याह बहूनि मधुनः सुतम्।
वदन्तमेवं तं दूतं भक्षयामास राक्षसः॥ **7.67.18**॥ 2494

चिरायमाणे दूते तु राजा क्रोधसमन्वितः।
अर्दयामास तद् रक्षः शरवृष्ट्या समन्ततः॥ 7.67.19॥ 2495

ततः प्रहस्य तद् रक्षः शूलं जग्राह पाणिना।
वधाय सानुबन्धस्य मुमोचायुधमुत्तमम्॥ 7.67.20॥ 2496

तच्छूलं दीप्यमानं तु सभृत्यबलवाहनम्।
भस्मीकृत्वा नृपं भूयो लवणस्यागमत् करम्॥ 7.67.21॥ 2497

एवं स राजा सुमहान् हतः सबलवाहनः।
शूलस्य तु बलं सौम्य अप्रमेयमनुत्तमम्॥ 7.67.22॥ 2498

श्वः प्रभाते तु लवणं वधिष्यसि न संशयः।
अगृहीतायुधं क्षिप्रं ध्रुवो हि विजयस्तव॥ 7.67.23॥ 2499

लोकानां स्वस्ति चैवं स्यात् कृते कर्मणि च त्वया।
एतत् ते सर्वमाख्यातं लवणस्य दुरात्मनः॥ 7.67.24॥ 2500

शूलस्य च बलं घोरमप्रमेयं नरर्षभ।
विनाशश्चैव मान्धातुर्यत्नेनाभूच्च पार्थिव॥ 7.67.25॥ 2501

त्वं श्वः प्रभाते लवणं महात्मन्
वधिष्यसे नात्र तु संशयो मे।
शूलं विना निर्गतमामिषार्थे
ध्रुवो जयस्ते भविता नरेन्द्र॥ 7.67.26॥ 2502

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टषष्टितमः सर्गः ॥

लवणासुरस्याहारार्थं निर्गमनं शत्रुघ्नस्य मधुपुरीद्वारि समवस्थानं निवृत्तेन लवणेन सह तस्य सरोषो वार्तालापश्च

कथां कथयतां तेषां जयं चाकाङ्क्षतां शुभम्।
व्यतीता रजनी शीघ्रं शत्रुघ्नस्य महात्मनः॥ **7.68.1** ॥ 2503

ततः प्रभाते विमले तस्मिन् काले स राक्षसः।
निर्गतस्तु पुराद् वीरो भक्ष्याहारप्रचोदितः॥ **7.68.2** ॥ 2504

एतस्मिन्नन्तरे वीरः शत्रुघ्नो यमुनां नदीम्।
तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत॥ **7.68.3** ॥ 2505

ततोऽर्धदिवसे प्राप्ते क्रूरकर्मा स राक्षसः।
आगच्छद् बहुसाहस्रं प्राणिनां भारमुद्वहन्॥ **7.68.4** ॥ 2506

ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम्।
तमुवाच ततो रक्षः किमनेन करिष्यसि॥ **7.68.5** ॥ 2507

ईदृशानां सहस्राणि सायुधानां नराधम।
भक्षितानि मया रोषात् कालेनानुगतो ह्यसि॥ **7.68.6** ॥ 2508

आहारश्चाप्यसम्पूर्णो ममायं पुरुषाधम।
स्वयं प्रविष्टोऽद्य मुखं कथमासाद्य दुर्मते॥ **7.68.7** ॥ 2509

तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः।
शत्रुघ्नो वीर्यसम्पन्नो रोषादश्रूण्यवासृजत्॥ **7.68.8**॥ 2510

तस्य रोषाभिभूतस्य शत्रुघ्नस्य महात्मनः।
तेजोमया मरीच्यस्तु सर्वगात्रैर्विनिष्पतन्॥ **7.68.9**॥ 2511

उवाच च सुसङ्क्रुद्धः शत्रुघ्नः स निशाचरम्।
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह॥ **7.68.10**॥ 2512

पुत्रो दशरथस्याहं भ्राता रामस्य धीमतः।
शत्रुघ्नो नाम शत्रुघ्नो वधाकाङ्क्षी तवागतः॥ **7.68.11**॥ 2513

तस्य मे युद्धकामस्य द्वन्द्वयुद्धं प्रदीयताम्।
शत्रुस्त्वं सर्वभूतानां न मे जीवन् गमिष्यसि॥ **7.68.12**॥ 2514

तस्मिंस्तथा ब्रुवाणे तु राक्षसः प्रहसन्निव।
प्रत्युवाच नरश्रेष्ठं दिष्ट्या प्राप्तोऽसि दुर्मते॥ **7.68.13**॥ 2515

मम मातृष्वसुर्भ्राता रावणो नाम राक्षसः।
हतो रामेण दुर्बुद्धे स्त्रीहेतोः पुरुषाधम॥ **7.68.14**॥ 2516

तच्च सर्वं मया क्षान्तं रावणस्य कुलक्षयम्।
अवज्ञा पुरतः कृत्वा मया यूयं विशेषतः॥ **7.68.15**॥ 2517

निहताश्च हि ते सर्वे परिभूतास्तृणं यथा।
भूताश्चैव भविष्याश्च यूयं च पुरुषाधमाः॥ **7.68.16**॥ 2518

तस्य ते युद्धकामस्य युद्धं दास्यामि दुर्मते।
तिष्ठ त्वं च मुहूर्तं तु यावदायुधमानये॥ **7.68.17**॥ 2519

ईप्सितं यादृशं तुभ्यं सज्जये यावदायुधम्।
तमुवाचाशु शत्रुघ्नः क्व मे जीवन् गमिष्यसि॥ **7.68.18**॥ 2520

स्वयमेवागतः शत्रुर्न मोक्तव्यः कृतात्मना।
यो हि विक्लवया बुद्ध्या प्रसरं शत्रवे दिशेत्।
स हतो मन्दबुद्धिः स्याद् यथा कापुरुषस्तथा॥ **7.68.19**॥ 2521

तस्मात् सुदृष्टं कुरु जीवलोकं
शरैः शितैस्त्वां विविधैर्नयामि।
यमस्य गेहाभिमुखं हि पापं
रिपुं त्रिलोकस्य च राघवस्य॥ **7.68.20**॥ 2522

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनसप्ततितमः सर्गः ॥

शत्रुघ्नलवणयोर्युद्धं लवणस्य वधश्च

तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः।
क्रोधमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥ **7.69.1**॥ 2523

पाणी पाणिं च निष्पिष्य दन्तान् कटकटाय्य च।
लवणो रघुशार्दूलमाह्वयामास चासकृत्॥ **7.69.2**॥ 2524

तं ब्रुवाणं तथा वाक्यं लवणं घोरदर्शनम्।
शत्रुघ्नो देवशत्रुघ्न इदं वचनमब्रवीत्॥ **7.69.3**॥ 2525

शत्रुघ्नो न तदा जातो यदान्ये निर्जितास्त्वया।
तदद्य बाणाभिहतो व्रज त्वं यमसादनम्॥ **7.69.4**॥ 2526

ऋषयोऽप्यद्य पापात्मन् मया त्वां निहतं रणे।
पश्यन्तु विप्रा विद्वांसस्त्रिदशा इव रावणम्॥ **7.69.5**॥ 2527

त्वयि मद्बाणनिर्दग्धे पतितेऽद्य निशाचर।
पुरे जनपदे चापि क्षेममेव भविष्यति॥ **7.69.6**॥ 2528

अद्य मद्बाहुनिष्क्रान्तः शरो वज्रनिभाननः।
प्रवेक्ष्यते ते हृदयं पद्ममंशुरिवार्कजः॥ **7.69.7**॥ 2529

एवमुक्तो महावृक्षं लवणः क्रोधमूर्छितः।
शत्रुघ्नोरसि चिक्षेप स च तं शतधाच्छिनत्॥ **7.69.8**॥ 2530

तद् दृष्ट्वा विफलं कर्म राक्षसः पुनरेव तु।
पादपान् सुबहून् गृह्य शत्रुघ्नायासृजद् बली॥ **7.69.9**॥ 2531

शत्रुघ्नश्चापि तेजस्वी वृक्षानापततो बहून्।
त्रिभिश्चतुर्भिरेकैकं चिच्छेद नतपर्वभिः॥ **7.69.10**॥ 2532

ततो बाणमयं वर्षं व्यसृजद् राक्षसोपरि।
शत्रुघ्नो वीर्यसम्पन्नो विव्यथे न स राक्षसः॥ **7.69.11**॥ 2533

ततः प्रहस्य लवणो वृक्षमुद्यम्य वीर्यवान्।
शिरस्यभ्यहनच्छूरं स्रस्ताङ्गः स मुमोह वै॥ **7.69.12**॥ 2534

तस्मिन् निपतिते वीरे हाहाकारो महानभूत्।
ऋषीणां देवसङ्घानां गन्धर्वाप्सरसां तथा॥ **7.69.13**॥ 2535

तमवज्ञाय तु हतं शत्रुघ्नं भुवि पातितम्।
रक्षो लब्धान्तरमपि न विवेश स्वमालयम्॥ **7.69.14**॥ 2536

नापि शूलं प्रजग्राह तं दृष्ट्वा भुवि पातितम्।
ततो हत इति ज्ञात्वा तान् भक्षान् समुदावहत्॥ **7.69.15**॥ 2537

मुहूर्ताल्लब्धसंज्ञस्तु पुनस्तस्थौ धृतायुधः।
शत्रुघ्नो वै पुरद्वारि ऋषिभिः सम्प्रपूजितः॥ **7.69.16**॥ 2538

ततो दिव्यममोघं तं जग्राह शरमुत्तमम्।
ज्वलन्तं तेजसा घोरं पूरयन्तं दिशो दश॥ **7.69.17**॥ 2539

वज्राननं वज्रवेगं मेरुमन्दरसन्निभम्।
नतं पर्वसु सर्वेषु संयुगेष्वपराजितम्॥ **7.69.18**॥ 2540

असृक्चन्दनदिग्धाङ्गं चारुपत्रं पतत्त्रिणम्।
दानवेन्द्राचलेन्द्राणामसुराणां च दारुणम्॥ **7.69.19**॥ 2541

तं दीप्तमिव कालाग्निं युगान्ते समुपस्थिते।
दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन्॥ **7.69.20**॥ 2542

सदेवासुरगन्धर्वं मुनिभिः साप्सरोगणम्।
जगद्धि सर्वमस्वस्थं पितामहमुपस्थितम्॥ **7.69.21**॥ 2543

उवाच देवदेवेशं वरदं प्रपितामहम्।
देवानां भयसम्मोहो लोकानां सङ्क्षयं प्रति॥ **7.69.22**॥ 2544

कच्चिल्लोकक्षयो देव सम्प्राप्तो वा युगक्षयः।
नेदृशं दृष्टपूर्वं च न श्रुतं प्रपितामह॥ **7.69.23**॥ 2545

तेषां तद् वचनं श्रुत्वा ब्रह्मा लोकपितामहः।
भयकारणमाचष्ट लोकानामभयङ्करः॥ **7.69.24**॥ 2546

उवाच मधुरां वाणीं शृणुध्वं सर्वदेवताः।
वधाय लवणस्याजौ शरः शत्रुघ्नधारितः॥ **7.69.25**॥ 2547

तेजसा तस्य सम्मूढाः सर्वे स्मः सुरसत्तमाः।
एष पूर्वस्य देवस्य लोककर्तुः सनातनः॥ **7.69.26**॥ 2548

शरस्तेजोमयो वत्सा येन वै भयमागतम्।
एष वै कैटभस्यार्थे मधुनश्च महाशरः॥ **7.69.27**॥ 2549

सृष्टो महात्मना तेन वधार्थे दैत्ययोस्तयोः।
एक एव प्रजानाति विष्णुस्तेजोमयं शरम्॥ **7.69.28**॥ 2550

एषा एव तनुः पूर्वा विष्णोस्तस्य महात्मनः।
इतो गच्छत पश्यध्वं वध्यमानं महात्मना॥ **7.69.29**॥ 2551

रामानुजेन वीरेण लवणं राक्षसोत्तमम्।
तस्य ते देवदेवस्य निशम्य वचनं सुराः॥ **7.69.30**॥ 2552

आजग्मुर्यत्र युध्येते शत्रुघ्नलवणावुभौ।
तं शरं दिव्यसङ्काशं शत्रुघ्नकरधारितम्॥ **7.69.31**॥ 2553

ददृशुः सर्वभूतानि युगान्ताग्निमिवोत्थितम्।
आकाशमावृतं दृष्ट्वा देवैर्हि रघुनन्दनः॥ **7.69.32**॥ 2554

सिंहनादं भृशं कृत्वा ददर्श लवणं पुनः।
आहूतश्च पुनस्तेन शत्रुघ्नेन महात्मना॥ **7.69.33**॥ 2555

लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः।
आकर्णात् स विकृष्याथ तद् धनुर्धन्विनां वरः॥ **7.69.34**॥ 2556

स मुमोच महाबाणं लवणस्य महोरसि।
उरस्तस्य विदार्याशु प्रविवेश रसातलम्॥ **7.69.35**॥ 2557

गत्वा रसातलं दिव्यः शरो विबुधपूजितः।
पुनरेवागमत् तूर्णमिक्ष्वाकुकुलनन्दनम्॥ **7.69.36**॥ 2558

शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः।
पपात सहसा भूमौ वज्राहत इवाचलः॥ **7.69.37**॥ 2559

तच्च शूलं महद् दिव्यं हते लवणराक्षसे।
पश्यतां सर्वदेवानां रुद्रस्य वशमन्वगात्॥ **7.69.38**॥ 2560

एकेषुपातेन भयं निपात्य
लोकत्रयस्यास्य रघुप्रवीरः।
विनिर्बभावुत्तमचापबाण -
स्तमः प्रणुद्येव सहस्ररश्मिः॥ **7.69.39**॥ 2561

ततो हि देवा ऋषिपन्नगाश्च
प्रपूजिरे ह्यप्सरसश्च सर्वाः।
दिष्ट्या जयो दाशरथेरवाप्त -
स्त्यक्त्वा भयं सर्प इव प्रशान्तः॥ 7.69.40॥ 2562

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ततितमः सर्गः ॥

देवेभ्यो लब्धवरस्य शत्रुघ्नस्य मधुपुरीं निवेश्य ततः श्रीरामपार्श्वे गन्तुं विचारः

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम्॥ **7.70.1** ॥ 2563

दिष्ट्या ते विजयो वत्स दिष्ट्या लवणराक्षसः।
हतः पुरुषशार्दूल वरं वरय सुव्रत॥ **7.70.2** ॥ 2564

वरदास्तु महाबाहो सर्व एव समागताः।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः॥ **7.70.3** ॥ 2565

देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान्॥ **7.70.4** ॥ 2566

इयं मधुपुरी रम्या मधुरा देवनिर्मिता।
निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः॥ **7.70.5** ॥ 2567

तं देवाः प्रीतमनसो बाढमित्येव राघवम्।
भविष्यति पुरी रम्या शूरसेना न संशयः॥ **7.70.6** ॥ 2568

ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत्॥ **7.70.7** ॥ 2569

सा सेना शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम्।
निवेशनं च शत्रुघ्नः श्रावणेन समारभत्॥ **7.70.8**॥ 2570

स पुरा दिव्यसङ्काशो वर्षे द्वादशमे शुभे।
निविष्टः शूरसेनानां विषयश्चाकुतोभयः॥ **7.70.9**॥ 2571

क्षेत्राणि सस्ययुक्तानि काले वर्षति वासवः।
अरोगवीरपुरुषा शत्रुघ्नभुजपालिता॥ **7.70.10**॥ 2572

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता।
शोभिता गृहमुख्यैश्च चत्वरापणवीथिकैः।
चातुर्वर्ण्यसमायुक्ता नानावाणिज्यशोभिता॥ **7.70.11**॥ 2573

यच्च तेन पुरा शुभ्रं लवणेन कृतं महत्।
तच्छोभयति शत्रुघ्नो नानावर्णोपशोभिताम्॥ **7.70.12**॥ 2574

आरामैश्च विहारैश्च शोभमानां समन्ततः।
शोभितां शोभनीयैश्च तथान्यैर्दैवमानुषैः॥ **7.70.13**॥ 2575

तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम्।
नानादेशगतैश्चापि वणिग्भिरुपशोभिताम्॥ **7.70.14**॥ 2576

तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत्॥ **7.70.15**॥ 2577

तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम्।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते॥ **7.70.16**॥ 2578

ततः स तामामरपुरोपमां पुरीं
निवेश्य वै विविधजनाभिसंवृताम्।

नराधिपो रघुपतिपाददर्शने
दधे मतिं रघुकुलवंशवर्धनः ॥ 7.70.17 ॥ 2579

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्ततितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकसप्ततितमः सर्गः ॥

अल्पैः सैनिकैः सह शत्रुघ्नस्यायोध्यां प्रति प्रस्थानं मार्गे वाल्मीक्याश्रमे श्रीरामचरितस्य गानं श्रुत्वा तेषां विस्मयः

ततो द्वादशमे वर्षे शत्रुघ्नो रामपालिताम्।
अयोध्यां चकमे गन्तुमल्पभृत्यबलानुगः॥ **7.71.1** ॥ 2580

ततो मन्त्रिपुरोगांश्च बलमुख्यान् निवर्त्य च।
जगाम हयमुख्येन रथानां च शतेन सः॥ **7.71.2** ॥ 2581

स गत्वा गणितान् वासान् सप्ताष्टौ रघुनन्दनः।
वाल्मीक्याश्रममागत्य वासं चक्रे महायशाः॥ **7.71.3** ॥ 2582

सोऽभिवाद्य ततः पादौ वाल्मीकेः पुरुषर्षभः।
पाद्यमर्घ्यं तथातिथ्यं जग्राह मुनिहस्ततः॥ **7.71.4** ॥ 2583

बहुरूपाः सुमधुराः कथास्तत्र सहस्रशः।
कथयामास स मुनिः शत्रुघ्नाय महात्मने॥ **7.71.5** ॥ 2584

उवाच च मुनिर्वाक्यं लवणस्य वधाश्रितम्।
सुदुष्करं कृतं कर्म लवणं निघ्नता त्वया॥ **7.71.6** ॥ 2585

बहवः पार्थिवाः सौम्य हताः सबलवाहनाः।
लवणेन महाबाहो युध्यमाना महाबलाः॥ **7.71.7** ॥ 2586

स त्वया निहतः पापो लीलया पुरुषर्षभ।
जगतश्च भयं तत्र प्रशान्तं तव तेजसा॥ **7.71.8**॥ 2587

रावणस्य वधो घोरो यत्नेन महता कृतः।
इदं च सुमहत्कर्म त्वया कृतमयत्नतः॥ **7.71.9**॥ 2588

प्रीतिश्चास्मिन् परा जाता देवानां लवणे हते।
भूतानां चैव सर्वेषां जगतश्च प्रियं कृतम्॥ **7.71.10**॥ 2589

तच्च युद्धं मया दृष्टं यथावत् पुरुषर्षभ।
सभायां वासवस्याथ उपविष्टेन राघव॥ **7.71.11**॥ 2590

ममापि परमा प्रीतिर्हृदि शत्रुघ्न वर्तते।
उपाघ्रास्यामि ते मूर्ध्नि स्नेहस्यैषा परा गतिः॥ **7.71.12**॥ 2591

इत्युक्त्वा मूर्ध्नि शत्रुघ्नमुपाघ्राय महामतिः।
आतिथ्यमकरोत् तस्य ये च तस्य पदानुगाः॥ **7.71.13**॥ 2592

स भुक्तवान् नरश्रेष्ठो गीतमाधुर्यमुत्तमम्।
शुश्राव रामचरितं तस्मिन् काले यथाक्रमम्॥ **7.71.14**॥ 2593

तन्त्रीलयसमायुक्तं त्रिस्थानकरणान्वितम्।
संस्कृतं लक्षणोपेतं समतालसमन्वितम्॥ **7.71.15**॥ 2594

शुश्राव रामचरितं तस्मिन् काले पुरा कृतम्।
तान्यक्षराणि सत्यानि यथावृत्तानि पूर्वशः॥ **7.71.16**॥ 2595

श्रुत्वा पुरुषशार्दूलो विसंज्ञो बाष्पलोचनः।
स मुहूर्तमिवासंज्ञो विनिःश्वस्य मुहुर्मुहुः॥ **7.71.17**॥ 2596

तस्मिन् गीते यथावृत्तं वर्तमानमिवाशृणोत्।
पदानुगाश्च ये राज्ञस्तां श्रुत्वा गीतिसम्पदम्॥ **7.71.18**॥ 2597

अवाङ्मुखाश्च दीनाश्च ह्याश्चर्यमिति चाब्रुवन्।
परस्परं च ये तत्र सैनिकाः सम्बभाषिरे॥ **7.71.19**॥ 2598

किमिदं क्व च वर्तामः किमेतत् स्वप्नदर्शनम्।
अर्थो यो नः पुरा दृष्टस्तमाश्रमपदे पुनः॥ **7.71.20**॥ 2599

शृणुमः किमिदं स्वप्ने गीतबन्धनमुत्तमम्।
विस्मयं ते परं गत्वा शत्रुघ्नमिदमब्रुवन्॥ **7.71.21**॥ 2600

साधु पृच्छ नरश्रेष्ठ वाल्मीकिं मुनिपुङ्गवम्।
शत्रुघ्नस्त्वब्रवीत् सर्वान् कौतूहलसमन्वितान्॥ **7.71.22**॥ 2601

सैनिकानक्षमोऽस्माकं परिप्रष्टुमिहेदृशः।
आश्चर्याणि बहूनीह भवन्त्यस्याश्रमे मुनेः॥ **7.71.23**॥ 2602

न तु कौतूहलाद् युक्तमन्वेष्टुं तं महामुनिम्।
एवं तद् वाक्यमुक्त्वा तु सैनिकान् रघुनन्दनः।
अभिवाद्य महर्षिं तं स्वं निवेशं ययौ तदा॥ **7.71.24**॥ 2603

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विसप्ततितमः सर्गः ॥

वाल्मीकितो लब्धानुज्ञस्य शत्रुघ्नस्यायोध्यां गत्वा श्रीरामादिभिः सह समागमः सप्त दिनानि तत्रोषित्वा ततः पुनर्मधुरां प्रति प्रस्थानं च

तं शयानं नरव्याघ्रं निद्रा नाभ्यागमत् तदा।
चिन्तयानमनेकार्थं रामगीतमनुत्तमम्॥ **7.72.1** ॥ 2604

तस्य शब्दं सुमधुरं तन्त्रीलयसमन्वितम्।
श्रुत्वा रात्रिर्जगामाशु शत्रुघ्नस्य महात्मनः॥ **7.72.2** ॥ 2605

तस्यां रजन्यां व्युष्टायां कृत्वा पौर्वाह्णिकक्रमम्।
उवाच प्राञ्जलिर्वाक्यं शत्रुघ्नो मुनिपुङ्गवम्॥ **7.72.3** ॥ 2606

भगवन् द्रष्टुमिच्छामि राघवं रघुनन्दनम्।
त्वयानुज्ञातुमिच्छामि सहैभिः संशितव्रतैः॥ **7.72.4** ॥ 2607

इत्येवंवादिनं तं तु शत्रुघ्नं शत्रुसूदनम्।
वाल्मीकिः सम्परिष्वज्य विससर्ज स राघवम्॥ **7.72.5** ॥ 2608

सोऽभिवाद्य मुनिश्रेष्ठं रथमारुह्य सुप्रभम्।
अयोध्यामगमत् तूर्णं राघवोत्सुकदर्शनः॥ **7.72.6** ॥ 2609

स प्रविष्टः पुरीं रम्यां श्रीमानिक्ष्वाकुनन्दनः।
प्रविवेश महाबाहुर्यत्र रामो महाद्युतिः॥ **7.72.7** ॥ 2610

स रामं मन्त्रिमध्यस्थं पूर्णचन्द्रनिभाननम्।
पश्यन्नमरमध्यस्थं सहस्रनयनं यथा॥ **7.72.8**॥ 2611

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा।
उवाच प्राञ्जलिर्भूत्वा रामं सत्यपराक्रमम्॥ **7.72.9**॥ 2612

यदाज्ञप्तं महाराज सर्वं तत् कृतवानहम्।
हतः स लवणः पापः पुरी चास्य निवेशिता॥ **7.72.10**॥ 2613

द्वादशैतानि वर्षाणि त्वां विना रघुनन्दन।
नोत्सहेयमहं वस्तुं त्वया विरहितो नृप॥ **7.72.11**॥ 2614

स मे प्रसादं काकुत्स्थ कुरुष्वामितविक्रम।
मातृहीनो यथा वत्सो न चिरं प्रवसाम्यहम्॥ **7.72.12**॥ 2615

एवं ब्रुवाणं शत्रुघ्नं परिष्वज्येदमब्रवीत्।
मा विषादं कृथाः शूर नैतत् क्षत्रियचेष्टितम्॥ **7.72.13**॥ 2616

नावसीदन्ति राजानो विप्रवासेषु राघव।
प्रजा च परिपाल्या हि क्षात्रधर्मेण राघव॥ **7.72.14**॥ 2617

काले काले तु मां वीर अयोध्यामवलोकितुम्।
आगच्छ त्वं नरश्रेष्ठ गन्तासि च पुरं तव॥ **7.72.15**॥ 2618

ममापि त्वं सुदयितः प्राणैरपि न संशयः।
अवश्यं करणीयं च राज्यस्य परिपालनम्॥ **7.72.16**॥ 2619

तस्मात् त्वं वस काकुत्स्थ सप्तरात्रं मया सह।
ऊर्ध्वं गन्तासि मधुरां सभृत्यबलवाहनः॥ **7.72.17**॥ 2620

रामस्यैतद् वचः श्रुत्वा धर्मयुक्तं मनोऽनुगम्।
शत्रुघ्नो दीनया वाचा बाढमित्येव चाब्रवीत्॥ **7.72.18**॥ 2621

सप्तरात्रं च काकुत्स्थो राघवस्य यथाज्ञया।
उष्य तत्र महेष्वासो गमनायोपचक्रमे॥ **7.72.19**॥ 2622

आमन्त्र्य तु महात्मानं रामं सत्यपराक्रमम्।
भरतं लक्ष्मणं चैव महारथमुपारुहत्॥ **7.72.20**॥ 2623

दूरं पद्भ्यामनुगतो लक्ष्मणेन महात्मना।
भरतेन च शत्रुघ्नो जगामाशु पुरीं तदा॥ **7.72.21**॥ 2624

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिसप्ततितमः सर्गः ॥

स्वीयं मृतं बालकमुपादाय राजद्वारि समागत्य कस्यचिद् ब्राह्मणस्य विलापः

प्रस्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः।
प्रमुमोद सुखी राज्यं धर्मेण परिपालयन्॥ **7.73.1**॥ 2625

ततः कतिपयाहःसु वृद्धो जानपदो द्विजः।
मृतं बालमुपादाय राजद्वारमुपागमत्॥ **7.73.2**॥ 2626

रुदन् बहुविधा वाचः स्नेहदुःखसमन्वितः।
असकृत् पुत्रपुत्रेति वाक्यमेतदुवाच ह॥ **7.73.3**॥ 2627

किं नु मे दुष्कृतं कर्म पुरा देहान्तरे कृतम्।
यदहं पुत्रमेकं तु पश्यामि निधनं गतम्॥ **7.73.4**॥ 2628

अप्राप्तयौवनं बालं पञ्चवर्षसहस्रकम्।
अकाले कालमापन्नं मम दुःखाय पुत्रक॥ **7.73.5**॥ 2629

अल्पैरहोभिर्निधनं गमिष्यामि न संशयः।
अहं च जननी चैव तव शोकेन पुत्रक॥ **7.73.6**॥ 2630

न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहम्।
सर्वेषां प्राणिनां पापं न स्मरामि कदाचन॥ **7.73.7**॥ 2631

केनाद्य दुष्कृतेनायं बाल एव ममात्मजः।
अकृत्वा पितृकार्याणि गतो वैवस्वतक्षयम्॥ **7.73.8**॥ 2632

नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम्।
मृत्युरप्राप्तकालानां रामस्य विषये ह्ययम्॥ **7.73.9**॥ 2633

रामस्य दुष्कृतं किञ्चिन्महदस्ति न संशयः।
यथा हि विषयस्थानां बालानां मृत्युरागतः॥ **7.73.10**॥ 2634

नह्यन्यविषयस्थानां बालानां मृत्युतो भयम्।
स राजञ्जीवयस्वैनं बालं मृत्युवशं गतम्॥ **7.73.11**॥ 2635

राजद्वारि मरिष्यामि पत्न्या सार्धमनाथवत्।
ब्रह्महत्यां ततो राम समुपेत्य सुखी भव॥ **7.73.12**॥ 2636

भ्रातृभिः सहितो राजन् दीर्घमायुरवाप्स्यसि।
उषिताः स्म सुखं राज्ये तवास्मिन् सुमहाबल॥ **7.73.13**॥ 2637

इदं तु पतितं तस्मात् तव राम वशे स्थितान्।
कालस्य वशमापन्नाः स्वल्पं हि नहि नः सुखम्॥ **7.73.14**॥ 2638

सम्प्रत्यनाथो विषय इक्ष्वाकूणां महात्मनाम्।
रामं नाथमिहासाद्य बालान्तकरणं ध्रुवम्॥ **7.73.15**॥ 2639

राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः।
असद्वृत्ते हि नृपतावकाले म्रियते जनः॥ **7.73.16**॥ 2640

यद् वा पुरेष्वयुक्तानि जना जनपदेषु च।
कुर्वते न च रक्षास्ति तदा कालकृतं भयम्॥ **7.73.17**॥ 2641

सुव्यक्तं राजदोषो हि भविष्यति न संशयः।
पुरे जनपदे चापि तथा बालवधो ह्ययम्॥ **7.73.18**॥ 2642

एवं बहुविधैर्वाक्यैरुपरुध्य मुहुर्मुहुः।
राजानं दुःखसन्तप्तः सुतं तमुपगूहति॥ **7.73.19**॥ 2643

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःसप्ततितमः सर्गः ॥

नारदेन श्रीरामं प्रति तपस्विनः शूद्रस्याधर्माचरणमेव विप्रबालकमरणे कारणमिति कथनम्

तथा तु करुणं तस्य द्विजस्य परिदेवनम्।
शुश्राव राघवः सर्वं दुःखशोकसमन्वितम्॥ **7.74.1** ॥ 2644

स दुःखेन च सन्तप्तो मन्त्रिणस्तानुपाह्वयत्।
वसिष्ठं वामदेवं च भ्रातॄंश्च सह नैगमान्॥ **7.74.2** ॥ 2645

ततो द्विजा वसिष्ठेन सार्धमष्टौ प्रवेशिताः।
राजानं देवसङ्काशं वर्धस्वेति ततोऽब्रुवन्॥ **7.74.3** ॥ 2646

मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः।
कात्यायनोऽथ जाबालिर्गौतमो नारदस्तथा॥ **7.74.4** ॥ 2647

एते द्विजर्षभाः सर्वे आसनेषूपवेशिताः।
महर्षीन् समनुप्राप्तानभिवाद्य कृताञ्जलिः॥ **7.74.5** ॥ 2648

मन्त्रिणो नैगमाश्चैव यथार्हमनुकूलतः।
तेषां समुपविष्टानां सर्वेषां दीप्ततेजसाम्॥ **7.74.6** ॥ 2649

राघवः सर्वमाचष्टे द्विजोऽयमुपरोधते।
तस्य तद् वचनं श्रुत्वा राज्ञो दीनस्य नारदः॥ **7.74.7** ॥ 2650

प्रत्युवाच शुभं वाक्यमृषीणां सन्निधौ स्वयम्।
शृणु राजन् यथाकाले प्राप्तो बालस्य सङ्क्षयः॥ **7.74.8**॥ 2651

श्रुत्वा कर्तव्यतां राजन् कुरुष्व रघुनन्दन।
पुरा कृतयुगे राजन् ब्राह्मणा वै तपस्विनः॥ **7.74.9**॥ 2652

अब्राह्मणस्तदा राजन् न तपस्वी कथञ्चन।
तस्मिन् युगे प्रज्वलिते ब्रह्मभूते त्वनावृते॥ **7.74.10**॥ 2653

अमृत्यवस्तदा सर्वे जज्ञिरे दीर्घदर्शिनः।
ततस्त्रेतायुगं नाम मानवानां वपुष्मताम्॥ **7.74.11**॥ 2654

क्षत्रिया यत्र जायन्ते पूर्वेण तपसान्विताः।
वीर्येण तपसा चैव तेऽधिकाः पूर्वजन्मनि॥ **7.74.12**॥ 2655

मानवा ये महात्मानस्तत्र त्रेतायुगे युगे।
ब्रह्म क्षत्रं च तत् सर्वं यत् पूर्वमवरं च यत्॥ **7.74.13**॥ 2656

युगयोरुभयोरासीत् समवीर्यसमन्वितम्।
अपश्यन्तस्तु ते सर्वे विशेषमधिकं ततः॥ **7.74.14**॥ 2657

स्थापनं चक्रिरे तत्र चातुर्वर्ण्यस्य सम्मतम्।
तस्मिन् युगे प्रज्वलिते धर्मभूते ह्यनावृते॥ **7.74.15**॥ 2658

अधर्मः पादमेकं तु पातयत् पृथिवीतले।
अधर्मेण हि संयुक्तस्तेजो मन्दं भविष्यति॥ **7.74.16**॥ 2659

आमिषं यच्च पूर्वेषां राजसं च मलं भृशम्।
अनृतं नाम तद् भूतं पादेन पृथिवीतले॥ **7.74.17**॥ 2660

अनृतं पातयित्वा तु पादमेकमधर्मतः।
ततः प्रादुष्कृतं पूर्वमायुषः परिनिष्ठितम्॥ **7.74.18**॥ 2661

पातिते त्वनृते तस्मिन्नधर्मेण महीतले।
शुभान्येवाचरन् लोकः सत्यधर्मपरायणः॥ **7.74.19**॥ 2662

त्रेतायुगे च वर्तन्ते ब्राह्मणाः क्षत्रियाश्च ये।
तपोऽतप्यन्त ते सर्वे शुश्रूषामपरे जनाः॥ **7.74.20**॥ 2663

स्वधर्मः परमस्तेषां वैश्यशूद्रं तदागमत्।
पूजां च सर्ववर्णानां शूद्राश्चक्रुर्विशेषतः॥ **7.74.21**॥ 2664

एतस्मिन्नन्तरे तेषामधर्मे चानृते च ह।
ततः पूर्वे पुनर्वासमगमन्नृपसत्तम॥ **7.74.22**॥ 2665

ततः पादमधर्मस्य द्वितीयमवतारयत्।
ततो द्वापरसङ्ख्या सा युगस्य समजायत॥ **7.74.23**॥ 2666

तस्मिन् द्वापरसङ्ख्ये तु वर्तमाने युगक्षये।
अधर्मश्चानृतं चैव ववृधे पुरुषर्षभ॥ **7.74.24**॥ 2667

अस्मिन् द्वापरसङ्ख्याने तपो वैश्यान् समाविशत्।
त्रिभ्यो युगेभ्यस्त्रीन् वर्णान् क्रमाद् वै तप आविशत्॥ **7.74.25**॥ 2668

त्रिभ्यो युगेभ्यस्त्रीन् वर्णान् धर्मश्च परिनिष्ठितः।
न शूद्रो लभते धर्मं युगतस्तु नरर्षभ॥ **7.74.26**॥ 2669

हीनवर्णो नृपश्रेष्ठ तप्यते सुमहत्तपः।
भविष्यच्छूद्रयोन्यां हि तपश्चर्या कलौ युगे॥ **7.74.27**॥ 2670

अधर्मः परमो राजन् द्वापरे शूद्रजन्मनः।
स वै विषयपर्यन्ते तव राजन् महातपाः॥ **7.74.28**॥ 2671

अद्य तप्यति दुर्बुद्धिस्तेन बालवधो ह्ययम्।
यो ह्यधर्ममकार्यं वा विषये पार्थिवस्य तु॥ **7.74.29**॥ 2672

करोति चाश्रीमूलं तत्पुरे वा दुर्मतिर्नरः।
क्षिप्रं च नरकं याति स च राजा न संशयः॥ **7.74.30**॥ 2673

अधीतस्य च तप्तस्य कर्मणः सुकृतस्य च।
षष्ठं भजति भागं तु प्रजा धर्मेण पालयन्॥ **7.74.31**॥ 2674

षड्भागस्य च भोक्तासौ रक्षते न प्रजाः कथम्।
स त्वं पुरुषशार्दूल मार्गस्व विषयं स्वकम्॥ **7.74.32**॥ 2675

दुष्कृतं यत्र पश्येथास्तत्र यत्नं समाचर।
एवं चेद् धर्मवृद्धिश्च नृणां चायुर्विवर्धनम्।
भविष्यति नरश्रेष्ठ बालस्यास्य च जीवितम्॥ **7.74.33**॥ 2676

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुःसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चसप्ततितमः सर्गः ॥

पुष्पकमारूढेन श्रीरामेण स्वराज्यस्य सर्वदिक्षु भ्रान्त्वा दुष्कर्मणोऽनुसन्धानं सर्वत्र सत्कर्मैव दृष्ट्वा दक्षिणस्यां दिशि तपस्विनः शूद्रस्य पार्श्वे गमनम्

नारदस्य तु तद् वाक्यं श्रुत्वामृतमयं यथा।
प्रहर्षमतुलं लेभे लक्ष्मणं चेदमब्रवीत्॥ **7.75.1**॥ 2677

गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय सुव्रत।
बालस्य च शरीरं तत् तैलद्रोण्यां निधापय॥ **7.75.2**॥ 2678

गन्धैश्च परमोदारैस्तैलैश्च सुसुगन्धिभिः।
यथा न क्षीयते बालस्तथा सौम्य विधीयताम्॥ **7.75.3**॥ 2679

यथा शरीरो बालस्य गुप्तः सन् क्लिष्टकर्मणः।
विपत्तिः परिभेदो वा न भवेच्च तथा कुरु॥ **7.75.4**॥ 2680

एवं सन्दिश्य काकुत्स्थो लक्ष्मणं शुभलक्षणम्।
मनसा पुष्पकं दध्यावागच्छेति महायशाः॥ **7.75.5**॥ 2681

इङ्गितं स तु विज्ञाय पुष्पको हेमभूषितः।
आजगाम मुहूर्तेन समीपे राघवस्य वै॥ **7.75.6**॥ 2682

सोऽब्रवीत् प्रणतो भूत्वा अयमस्मि नराधिप।
वश्यस्तव महाबाहो किङ्करः समुपस्थितः॥ **7.75.7**॥ 2683

भाषितं रुचिरं श्रुत्वा पुष्पकस्य नराधिपः।
अभिवाद्य महर्षीन् स विमानं सोऽध्यरोहत॥ **7.75.8**॥ 2684

धनुर्गृहीत्वा तूणीं च खड्गं च रुचिरप्रभम्।
निक्षिप्य नगरे चैतौ सौमित्रिभरतावुभौ॥ **7.75.9**॥ 2685

प्रायात् प्रतीचीं हरितं विचिन्वंश्च ततस्ततः।
उत्तरामगमच्छ्रीमान् दिशं हिमवतावृताम्॥ **7.75.10**॥ 2686

अपश्यमानस्तत्रापि स्वल्पमप्यथ दुष्कृतम्।
पूर्वामपि दिशं सर्वामथापश्यन्नराधिपः॥ **7.75.11**॥ 2687

प्रविशुद्धसमाचारामादर्शतलनिर्मलाम्।
पुष्पकस्थो महाबाहुस्तदापश्यन्नराधिपः॥ **7.75.12**॥ 2688

दक्षिणां दिशमाक्रामत् ततो राजर्षिनन्दनः।
शैवलस्योत्तरे पार्श्वे ददर्श सुमहत्सरः॥ **7.75.13**॥ 2689

तस्मिन् सरसि तप्यन्तं तापसं सुमहत्तपः।
ददर्श राघवः श्रीमाल्लम्बमानमधोमुखम्॥ **7.75.14**॥ 2690

राघवस्तमुपागम्य तप्यन्तं तप उत्तमम्।
उवाच च नृपो वाक्यं धन्यस्त्वमसि सुव्रत॥ **7.75.15**॥ 2691

कस्यां योन्यां तपोवृद्ध वर्तसे दृढविक्रम।
कौतूहलात् त्वां पृच्छामि रामो दाशरथिर्ह्यहम्॥ **7.75.16**॥ 2692

कोऽर्थो मनीषितस्तुभ्यं स्वर्गलाभोऽपरोऽथवा।
वराश्रयो यदर्थं त्वं तपस्यन्यैः सुदुश्चरम्॥ **7.75.17**॥ 2693

यमाश्रित्य तपस्तप्तं श्रोतुमिच्छामि तापस।
ब्राह्मणो वासि भद्रं ते क्षत्रियो वासि दुर्जयः।
वैश्यस्तृतीयो वर्णो वा शूद्रो वा सत्यवाग् भव॥ **7.75.18**॥ 2694

इत्येवमुक्तः स नराधिपेन
अवाक्शिरा दाशरथाय तस्मै।
उवाच जातिं नृपपुङ्गवाय
यत्कारणं चैव तपःप्रयत्नः॥ **7.75.19**॥ 2695

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्ढ्सप्ततितमः सर्गः ॥

श्रीरामेण शम्बूकस्य वधस्तस्य देवैः प्रशंसनम् अगस्त्याश्रमे महर्षिणागस्त्येन तस्य सत्कारस्तदर्थमाभूषणदानं च

तस्य तद् वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः।
अवाक्शिरास्तथाभूतो वाक्यमेतदुवाच ह॥ **7.76.1**॥ 2696

शूद्रयोन्यां प्रजातोऽस्मि तप उग्रं समास्थितः।
देवत्वं प्रार्थये राम सशरीरो महायशः॥ **7.76.2**॥ 2697

न मिथ्याहं वदे राम देवलोकजिगीषया।
शूद्रं मां विद्धि काकुत्स्थ शम्बूकं नाम नामतः॥ **7.76.3**॥ 2698

भाषतस्तस्य शूद्रस्य खड्गं सुरुचिरप्रभम्।
निष्कृष्य कोशाद् विमलं शिरश्चिच्छेद राघवः॥ **7.76.4**॥ 2699

तस्मिञ्शूद्रे हते देवाः सेन्द्राः साग्निपुरोगमाः।
साधुसाध्विति काकुत्स्थं ते शशंसुर्मुहुर्मुहुः॥ **7.76.5**॥ 2700

पुष्पवृष्टिर्महत्यासीद् दिव्यानां सुसुगन्धिनाम्।
पुष्पाणां वायुमुक्तानां सर्वतः प्रपपात ह॥ **7.76.6**॥ 2701

सुप्रीताश्चाब्रुवन् रामं देवाः सत्यपराक्रमम्।
सुरकार्यमिदं देव सुकृतं ते महामते॥ **7.76.7**॥ 2702

गृहाण च वरं सौम्य यं त्वमिच्छस्यरिन्दम।
स्वर्गभाङ् नहि शूद्रोऽयं त्वत्कृते रघुनन्दन॥ **7.76.8**॥ 2703

देवानां भाषितं श्रुत्वा रामः सत्यपराक्रमः।
उवाच प्राञ्जलिर्वाक्यं सहस्राक्षं पुरन्दरम्॥ **7.76.9**॥ 2704

यदि देवाः प्रसन्ना मे द्विजपुत्रः स जीवतु।
दिशन्तु वरमेतं मे ईप्सितं परमं मम॥ **7.76.10**॥ 2705

ममापचाराद् बालोऽसौ ब्राह्मणस्यैकपुत्रकः।
अप्राप्तकालः कालेन नीतो वैवस्वतक्षयम्॥ **7.76.11**॥ 2706

तं जीवयत भद्रं वो नानृतं कर्तुमर्हथ।
द्विजस्य संश्रुतोऽर्थो मे जीवयिष्यामि ते सुतम्॥ **7.76.12**॥ 2707

राघवस्य तु तद् वाक्यं श्रुत्वा विबुधसत्तमाः।
प्रत्यूचू राघवं प्रीता देवाः प्रीतिसमन्वितम्॥ **7.76.13**॥ 2708

निर्वृतो भव काकुत्स्थ सोऽस्मिन्नहनि बालकः।
जीवितं प्राप्तवान् भूयः समेतश्चापि बन्धुभिः॥ **7.76.14**॥ 2709

यस्मिन् मुहूर्ते काकुत्स्थ शूद्रोऽयं विनिपातितः।
तस्मिन् मुहूर्ते बालोऽसौ जीवेन समयुज्यत॥ **7.76.15**॥ 2710

स्वस्ति प्राप्नुहि भद्रं ते साधु याम नरर्षभ।
अगस्त्यस्याश्रमपदं द्रष्टुमिच्छाम राघव॥ **7.76.16**॥ 2711

तस्य दीक्षा समाप्ता हि ब्रह्मर्षेः सुमहाद्युतेः।
द्वादशं हि गतं वर्षं जलशय्यां समासतः॥ **7.76.17**॥ 2712

काकुत्स्थ तद् गमिष्यामो मुनिं समभिनन्दितुम्।
त्वं चापि गच्छ भद्रं ते द्रष्टुं तमृषिसत्तमम्॥ **7.76.18**॥ 2713

स तथेति प्रतिज्ञाय देवानां रघुनन्दनः।
आरुरोह विमानं तं पुष्पकं हेमभूषितम्॥ **7.76.19**॥ 2714

ततो देवाः प्रयातास्ते विमानैर्बहुविस्तरैः।
रामोऽप्यनुजगामाशु कुम्भयोनेस्तपोवनम्॥ **7.76.20**॥ 2715

दृष्ट्वा तु देवान् सम्प्राप्तानगस्त्यस्तपसां निधिः।
अर्चयामास धर्मात्मा सर्वांस्तानविशेषतः॥ **7.76.21**॥ 2716

प्रतिगृह्य ततः पूजां सम्पूज्य च महामुनिम्।
जग्मुस्ते त्रिदशा हृष्टा नाकपृष्ठं सहानुगाः॥ **7.76.22**॥ 2717

गतेषु तेषु काकुत्स्थः पुष्पकादवरुह्य च।
ततोऽभिवादयामास अगस्त्यमृषिसत्तमम्॥ **7.76.23**॥ 2718

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा।
आतिथ्यं परमं प्राप्य निषसाद नराधिपः॥ **7.76.24**॥ 2719

तमुवाच महातेजाः कुम्भयोनिर्महातपाः।
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव॥ **7.76.25**॥ 2720

त्वं मे बहुमतो राम गुणैर्बहुभिरुत्तमैः।
अतिथिः पूजनीयश्च मम राजन् हृदि स्थितः॥ **7.76.26**॥ 2721

सुरा हि कथयन्ति त्वामागतं शूद्रघातिनम्।
ब्राह्मणस्य तु धर्मेण त्वया जीवापितः सुतः॥ **7.76.27**॥ 2722

उष्यतां चेह रजनीं सकाशे मम राघव।
प्रभाते पुष्पकेण त्वं गन्तासि पुरमेव हि॥ **7.76.28**॥ 2723

त्वं हि नारायणः श्रीमांस्त्वयि सर्वं प्रतिष्ठितम्।
त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः॥ **7.76.29**॥ 2724

इदं चाभरणं सौम्य निर्मितं विश्वकर्मणा।
दिव्यं दिव्येन वपुषा दीप्यमानं स्वतेजसा॥ **7.76.30**॥ 2725

प्रतिगृह्णीष्व काकुत्स्थ मत्प्रियं कुरु राघव।
दत्तस्य हि पुनर्दाने सुमहत् फलमुच्यते॥ **7.76.31**॥ 2726

भरणे हि भवाञ्शक्तः फलानां महतामपि।
त्वं हि शक्तस्तारयितुं सेन्द्रानपि दिवौकसः॥ **7.76.32**॥ 2727

तस्मात् प्रदास्ये विधिवत् तत् प्रतीच्छ नराधिप।
अथोवाच महात्मानमिक्ष्वाकूणां महारथः॥ **7.76.33**॥ 2728

रामो मतिमतां श्रेष्ठः क्षत्रधर्ममनुस्मरन्।
प्रतिग्रहोऽयं भगवन् ब्राह्मणस्याविगर्हितः॥ **7.76.34**॥ 2729

क्षत्रियेण कथं विप्र प्रतिग्राह्यं भवेत् ततः।
प्रतिग्रहो हि विप्रेन्द्र क्षत्रियाणां सुगर्हितः॥ **7.76.35**॥ 2730

ब्राह्मणेन विशेषेण दत्तं तद् वक्तुमर्हसि।
एवमुक्तस्तु रामेण प्रत्युवाच महानृषिः॥ **7.76.36**॥ 2731

आसन् कृतयुगे राम ब्रह्मभूते पुरायुगे।
अपार्थिवाः प्रजाः सर्वाः सुराणां तु शतक्रतुः॥ **7.76.37**॥ 2732

ताः प्रजा देवदेवेशं राजार्थं समुपाद्रवन्।
सुराणां स्थापितो राजा त्वया देव शतक्रतुः॥ **7.76.38**॥ 2733

प्रयच्छास्मासु लोकेश पार्थिवं नरपुङ्गवम्।
यस्मै पूजां प्रयुञ्जाना धूतपापाश्चरेमहि॥ **7.76.39**॥ 2734

न वसामो विना राज्ञा एष नो निश्चयः परः।
ततो ब्रह्मा सुरश्रेष्ठो लोकपालान् सवासवान्॥ **7.76.40**॥ 2735

समाहूयाब्रवीत् सर्वांस्तेजोभागान् प्रयच्छत।
ततो ददुर्लोकपालाः सर्वे भागान् स्वतेजसः॥ **7.76.41**॥ 2736

अक्षुपच्च ततो ब्रह्मा यतो जातः क्षुपो नृपः।
तं ब्रह्मा लोकपालानां समांशैः समयोजयत्॥ **7.76.42**॥ 2737

ततो ददौ नृपं तासां प्रजानामीश्वरं क्षुपम्।
तत्रैन्द्रेण च भागेन महीमाज्ञापयन्नृपः॥ **7.76.43**॥ 2738

वारुणेन तु भागेन वपुः पुष्यति पार्थिवः।
कौबेरेण तु भागेन वित्तपाभां ददौ तदा॥ **7.76.44**॥ 2739

यस्तु याम्योऽभवद् भागस्तेन शास्ति स्म स प्रजाः।
तत्रैन्द्रेण नरश्रेष्ठ भागेन रघुनन्दन॥ **7.76.45**॥ 2740

प्रतिगृह्णीष्व भद्रं ते तारणार्थं मम प्रभो।
तद् रामः प्रतिजग्राह मुनेस्तस्य महात्मनः॥ **7.76.46**॥ 2741

दिव्यमाभरणं चित्रं प्रदीप्तमिव भास्करम्।
प्रतिगृह्य ततो रामस्तदाभरणमुत्तमम्॥ **7.76.47**॥ 2742

आगमं तस्य दीप्तस्य प्रष्टुमेवोपचक्रमे।
अत्यद्भुतमिदं दिव्यं वपुषा युक्तमद्भुतम्॥ **7.76.48**॥ 2743

कथं वा भवता प्राप्तं कुतो वा केन वाऽऽहृतम्।
कौतूहलतया ब्रह्मन् पृच्छामि त्वां महायशः॥ **7.76.49**॥ 2744

आश्चर्याणां बहूनां हि निधिः परमको भवान्।
एवं ब्रुवति काकुत्स्थे मुनिर्वाक्यमथाब्रवीत्॥ **7.76.50**॥ 2745

शृणु राम यथावृत्तं पुरा त्रेतायुगे युगे ॥ 7.76.51 ॥ 2746

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्ढ्सप्ततितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तसप्ततितमः सर्गः ॥

महर्षिणागस्त्येन श्रीरामं प्रति स्वर्गिपुरुषकर्तृकशवभक्षणप्रसङ्गस्य श्रावणम्

पुरा त्रेतायुगे राम बभूव बहुविस्तरम्।
समन्ताद् योजनशतं विमृगं पक्षिवर्जितम्॥ **7.77.1** ॥ 2747

तस्मिन् निर्मानुषेऽरण्ये कुर्वाणस्तप उत्तमम्।
अहमाक्रमितुं सौम्य तदरण्यमुपागमम्॥ **7.77.2** ॥ 2748

तस्य रूपमरण्यस्य निर्देष्टुं न शशाक ह।
फलमूलैः सुखास्वादैर्बहुरूपैश्च पादपैः॥ **7.77.3** ॥ 2749

तस्यारण्यस्य मध्ये तु सरो योजनमायतम्।
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम्॥ **7.77.4** ॥ 2750

पद्मोत्पलसमाकीर्णं समतिक्रान्तशैवलम्।
तदाश्चर्यमिवात्यर्थं सुखास्वादमनुत्तमम्॥ **7.77.5** ॥ 2751

अरजस्कं तदक्षोभ्यं श्रीमत्पक्षिगणायुतम्।
तस्मिन् सरःसमीपे तु महदद्भुतमाश्रमम्॥ **7.77.6** ॥ 2752

पुराणं पुण्यमत्यर्थं तपस्विजनवर्जितम्।
तत्राहमवसं रात्रिं नैदाघीं पुरुषर्षभ॥ **7.77.7** ॥ 2753

प्रभाते कल्यमुत्थाय सरस्तदुपचक्रमे।
अथापश्यं शवं तत्र सुपुष्टमरजः क्वचित्॥ **7.77.8**॥ 2754

तिष्ठन्तं परया लक्ष्म्या तस्मिंस्तोयाशये नृप।
तमर्थं चिन्तयानोऽहं मुहूर्तं तत्र राघव॥ **7.77.9**॥ 2755

विष्ठितोऽस्मि सरस्तीरे किं न्विदं स्यादिति प्रभो।
अथापश्यं मुहूर्तात् तु दिव्यमद्भुतदर्शनम्॥ **7.77.10**॥ 2756

विमानं परमोदारं हंसयुक्तं मनोजवम्।
अत्यर्थं स्वर्गिणं तत्र विमाने रघुनन्दन॥ **7.77.11**॥ 2757

उपास्तेऽप्सरसां वीर सहस्रं दिव्यभूषणम्।
गायन्ति काश्चिद् रम्याणि वादयन्ति तथापराः॥ **7.77.12**॥ 2758

मृदङ्गवीणापणवान् नृत्यन्ति च तथापराः।
अपराश्चन्द्ररश्म्याभैर्हेमदण्डैर्महाधनैः॥ **7.77.13**॥ 2759

दोधूयुर्वदनं तस्य पुण्डरीकनिभेक्षणाः।
ततः सिंहासनं हित्वा मेरुकूटमिवांशुमान्॥ **7.77.14**॥ 2760

पश्यतो मे तदा राम विमानादवरुह्य च।
तं शवं भक्षयामास स स्वर्गी रघुनन्दन॥ **7.77.15**॥ 2761

ततो भुक्त्वा यथाकामं मांसं बहु सुपीवरम्।
अवतीर्य सरः स्वर्गी संस्प्रष्टुमुपचक्रमे॥ **7.77.16**॥ 2762

उपस्पृश्य यथान्यायं स स्वर्गी रघुनन्दन।
आरोढुमुपचक्राम विमानवरमुत्तमम्॥ **7.77.17**॥ 2763

तमहं देवसङ्काशमारोहन्तमुदीक्ष्य वै।
अथाहमब्रुवं वाक्यं तमेव पुरुषर्षभ॥ **7.77.18**॥ 2764

को भवान् देवसङ्काश आहारश्च विगर्हितः।
त्वयेदं भुज्यते सौम्य किमर्थं वक्तुमर्हसि॥ **7.77.19**॥ 2765

कस्य स्यादीदृशो भाव आहारो देवसम्मतः।
आश्चर्यं वर्तते सौम्य श्रोतुमिच्छामि तत्त्वतः।
नाहमौपयिकं मन्ये तव भक्ष्यमिमं शवम्॥ **7.77.20**॥ 2766

इत्येवमुक्तः स नरेन्द्र नाकी
कौतूहलात् सूनृतया गिरा च।
श्रुत्वा च वाक्यं मम सर्वमेतत्
सर्वं तथा चाकथयन्ममेति॥ **7.77.21**॥ 2767

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टसप्ततितमः सर्गः ॥

अगस्त्यं प्रति स्वकीयकुत्सिताहारप्राप्तिकारणं वर्णयता श्वेतेन ब्रह्मणा सह सञ्जाताया वार्तायाः उपस्थापनमगस्त्याय दिव्याभूषणस्य दानेन तस्य क्षुत्तृषाकष्टतो मुक्तिश्च

श्रुत्वा तु भाषितं वाक्यं मम राम शुभाक्षरम्।
प्राञ्जलिः प्रत्युवाचेदं स स्वर्गी रघुनन्दन ॥ **7.78.1** ॥ 2768

शृणु ब्रह्मन् पुरा वृत्तं ममैतत् सुखदुःखयोः।
अनतिक्रमणीयं च यथा पृच्छसि मां द्विज ॥ **7.78.2** ॥ 2769

पुरा वैदर्भको राजा पिता मम महायशाः।
सुदेव इति विख्यातस्त्रिषु लोकेषु वीर्यवान् ॥ **7.78.3** ॥ 2770

तस्य पुत्रद्वयं ब्रह्मन् द्वाभ्यां स्त्रीभ्यामजायत।
अहं श्वेत इति ख्यातो यवीयान् सुरथोऽभवत् ॥ **7.78.4** ॥ 2771

ततः पितरि स्वर्याते पौरा मामभ्यषेचयन्।
तत्राहं कृतवान् राज्यं धर्म्यं च सुसमाहितः ॥ **7.78.5** ॥ 2772

एवं वर्षसहस्राणि समतीतानि सुव्रत।
राज्यं कारयतो ब्रह्मन् प्रजा धर्मेण रक्षतः ॥ **7.78.6** ॥ 2773

सोऽहं निमित्ते कस्मिंश्चिद् विज्ञातायुर्द्विजोत्तम।
कालधर्मं हृदि न्यस्य ततो वनमुपागमम्॥ **7.78.7**॥ 2774

सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम्।
तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे॥ **7.78.8**॥ 2775

भ्रातरं सुरथं राज्ये अभिषिच्य महीपतिम्।
इदं सरः समासाद्य तपस्तप्तं मया चिरम्॥ **7.78.9**॥ 2776

सोऽहं वर्षसहस्राणि तपस्त्रीणि महावने।
तप्त्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम्॥ **7.78.10**॥ 2777

तस्येमे स्वर्गभूतस्य क्षुत्पिपासे द्विजोत्तम।
बाधेते परमोदार ततोऽहं व्यथितेन्द्रियः॥ **7.78.11**॥ 2778

गत्वा त्रिभुवनश्रेष्ठं पितामहमुवाच ह।
भगवन् ब्रह्मलोकोऽयं क्षुत्पिपासाविवर्जितः॥ **7.78.12**॥ 2779

कस्यायं कर्मणः पाकः क्षुत्पिपासानुगो ह्यहम्।
आहारः कश्च मे देव तन्मे ब्रूहि पितामह॥ **7.78.13**॥ 2780

पितामहस्तु मामाह तवाहारः सुदेवज।
स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः॥ **7.78.14**॥ 2781

स्वशरीरं त्वया पुष्टं कुर्वता तप उत्तमम्।
अनुप्तं रोहते श्वेत न कदाचिन्महामते॥ **7.78.15**॥ 2782

दत्तं न तेऽस्ति सूक्ष्मोऽपि तप एव निषेवसे।
तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया॥ **7.78.16**॥ 2783

स त्वं सुपुष्टमाहारैः स्वशरीरमनुत्तमम्।
भक्षयित्वामृतरसं तेन वृत्तिर्भविष्यति॥ **7.78.17**॥ 2784

यदा तु तद्वनं श्वेत अगस्त्यः स महानृषिः।
आगमिष्यति दुर्धर्षस्तदा कृच्छ्राद् विमोक्ष्यसे॥ **7.78.18**॥ 2785

स हि तारयितुं सौम्य शक्तः सुरगणानपि।
किं पुनस्त्वां महाबाहो क्षुत्पिपासावशं गतम्॥ **7.78.19**॥ 2786

सोऽहं भगवतः श्रुत्वा देवदेवस्य निश्चयम्।
आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम॥ **7.78.20**॥ 2787

बहून् वर्षगणान् ब्रह्मन् भुज्यमानमिदं मया।
क्षयं नाभ्येति ब्रह्मर्षे तृप्तिश्चापि ममोत्तमा॥ **7.78.21**॥ 2788

तस्य मे कृच्छ्रभूतस्य कृच्छ्रादस्माद् विमोक्षय।
अन्येषां न गतिर्ह्यत्र कुम्भयोनिमृते द्विजम्॥ **7.78.22**॥ 2789

इदमाभरणं सौम्य तारणार्थं द्विजोत्तम।
प्रतिगृह्णीष्व भद्रं ते प्रसादं कर्तुमर्हसि॥ **7.78.23**॥ 2790

इदं तावत् सुवर्णं च धनं वस्त्राणि च द्विज।
भक्ष्यं भोज्यं च ब्रह्मर्षे ददात्याभरणानि च॥ **7.78.24**॥ 2791

सर्वान् कामान् प्रयच्छामि भोगांश्च मुनिपुङ्गव।
तारणे भगवन् मह्यं प्रसादं कर्तुमर्हसि॥ **7.78.25**॥ 2792

तस्याहं स्वर्गिणो वाक्यं श्रुत्वा दुःखसमन्वितम्।
तारणायोपजग्राह तदाभरणमुत्तमम्॥ **7.78.26**॥ 2793

मया प्रतिगृहीते तु तस्मिन्नाभरणे शुभे।
मानुषः पूर्वको देहो राजर्षेर्विननाश ह॥ **7.78.27**॥ 2794

प्रणष्टे तु शरीरेऽसौ राजर्षिः परया मुदा।
तृप्तः प्रमुदितो राजा जगाम त्रिदिवं सुखम्॥ **7.78.28**॥ 2795

तेनेदं शक्रतुल्येन दिव्यमाभरणं मम।
तस्मिन्निमित्ते काकुत्स्थ दत्तमद्भुतदर्शनम्॥ **7.78.29**॥ 2796

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनाशीतितमः सर्गः ॥

इक्ष्वाकुसुतस्य दण्डस्य राज्यम्

तदद्भुततमं वाक्यं श्रुत्वागस्त्यस्य राघवः।
गौरवाद् विस्मयाच्चैव भूयः प्रष्टुं प्रचक्रमे ॥ **7.79.1** ॥ 2797

भगवंस्तद् वनं घोरं तपस्तप्यति यत्र सः।
श्वेतो वैदर्भको राजा कथं तदमृगद्विजम् ॥ **7.79.2** ॥ 2798

तद् वनं स कथं राजा शून्यं मनुजवर्जितम्।
तपश्चर्तुं प्रविष्टः स श्रोतुमिच्छामि तत्त्वतः ॥ **7.79.3** ॥ 2799

रामस्य वचनं श्रुत्वा कौतूहलसमन्वितम्।
वाक्यं परमतेजस्वी वक्तुमेवोपचक्रमे ॥ **7.79.4** ॥ 2800

पुरा कृतयुगे राम मनुर्दण्डधरः प्रभुः।
तस्य पुत्रो महानासीदिक्ष्वाकुः कुलनन्दनः ॥ **7.79.5** ॥ 2801

तं पुत्रं पूर्वकं राज्ये निक्षिप्य भुवि दुर्जयम्।
पृथिव्यां राजवंशानां भव कर्तेत्युवाच तम् ॥ **7.79.6** ॥ 2802

तथैव च प्रतिज्ञातं पितुः पुत्रेण राघव।
ततः परमसन्तुष्टो मनुः पुत्रमुवाच ह ॥ **7.79.7** ॥ 2803

प्रीतोऽस्मि परमोदार कर्ता चासि न संशयः।
दण्डेन च प्रजा रक्ष मा च दण्डमकारणे॥ **7.79.8**॥ 2804

अपराधिषु यो दण्डः पात्यते मानवेषु वै।
स दण्डो विधिवन्मुक्तः स्वर्गं नयति पार्थिवम्॥ **7.79.9**॥ 2805

तस्माद् दण्डे महाबाहो यत्नवान् भव पुत्रक।
धर्मो हि परमो लोके कुर्वतस्ते भविष्यति॥ **7.79.10**॥ 2806

इति तं बहु सन्दिश्य मनुः पुत्रं समाधिना।
जगाम त्रिदिवं हृष्टो ब्रह्मलोकं सनातनम्॥ **7.79.11**॥ 2807

प्रयाते त्रिदिवं तस्मिन्निक्ष्वाकुरमितप्रभः।
जनयिष्ये कथं पुत्रानिति चिन्तापरोऽभवत्॥ **7.79.12**॥ 2808

कर्मभिर्बहुरूपैश्च तैस्तैर्मनुसुतस्तदा।
जनयामास धर्मात्मा शतं देवसुतोपमान्॥ **7.79.13**॥ 2809

तेषामवरजस्तात सर्वेषां रघुनन्दन।
मूढश्चाकृतविद्यश्च न शुश्रूषति पूर्वजान्॥ **7.79.14**॥ 2810

नाम तस्य च दण्डेति पिता चक्रेऽल्पमेधसः।
अवश्यं दण्डपतनं शरीरेऽस्य भविष्यति॥ **7.79.15**॥ 2811

अपश्यमानस्तं देशं घोरं पुत्रस्य राघव।
विन्ध्यशैवलयोर्मध्ये राज्यं प्रादादरिन्दम॥ **7.79.16**॥ 2812

स दण्डस्तत्र राजाभूद् रम्ये पर्वतरोधसि।
पुरं चाप्रतिमं राम न्यवेशयदनुत्तमम्॥ **7.79.17**॥ 2813

पुरस्य चाकरोन्नाम मधुमन्तमिति प्रभो।
पुरोहितं तूशनसं वरयामास सुव्रतम्॥ **7.79.18**॥ 2814

एवं स राजा तद् राज्यमकरोत् सपुरोहितः।
प्रहृष्टमनुजाकीर्णं देवराजो यथा दिवि॥ **7.79.19**॥ 2815

ततः स राजा मनुजेन्द्रपुत्रः
सार्धं च तेनोशनसा तदानीम्।
चकार राज्यं सुमहान्महात्मा
शक्रो दिवीवोशनसा समेतः॥ **7.79.20**॥ 2816

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अशीतितमः सर्गः ॥

दण्डस्य भार्गवकन्यया सह बलात्कारः

एतदाख्याय रामाय महर्षिः कुम्भसम्भवः।
अस्यामेवापरं वाक्यं कथायामुपचक्रमे ॥ **7.80.1** ॥ 2817

ततः स दण्डः काकुत्स्थ बहुवर्षगणायुतम्।
अकरोत् तत्र दान्तात्मा राज्यं निहतकण्टकम् ॥ **7.80.2** ॥ 2818

अथ काले तु कस्मिंश्चिद् राजा भार्गवमाश्रमम्।
रमणीयमुपाक्रामच्चैत्रे मासि मनोरमे ॥ **7.80.3** ॥ 2819

तत्र भार्गवकन्यां स रूपेणाप्रतिमां भुवि।
विचरन्तीं वनोद्देशे दण्डोऽपश्यदनुत्तमाम् ॥ **7.80.4** ॥ 2820

स दृष्ट्वा तां सुदुर्मेधा अनङ्गशरपीडितः।
अभिगम्य सुसंविग्नां कन्यां वचनमब्रवीत् ॥ **7.80.5** ॥ 2821

कुतस्त्वमसि सुश्रोणि कस्य वासि सुता शुभे।
पीडितोऽहमनङ्गेन पृच्छामि त्वां शुभानने ॥ **7.80.6** ॥ 2822

तस्य त्वेवं ब्रुवाणस्य मोहोन्मत्तस्य कामिनः।
भार्गवी प्रत्युवाचेदं वचः सानुनयं त्विदम् ॥ **7.80.7** ॥ 2823

भार्गवस्य सुतां विद्धि देवस्याक्लिष्टकर्मणः।
अरजां नाम राजेन्द्र ज्येष्ठामाश्रमवासिनीम्॥ **7.80.8**॥ 2824

मा मां स्पृश बलाद् राजन् कन्या पितृवशा ह्यहम्।
गुरुः पिता मे राजेन्द्र त्वं च शिष्यो महात्मनः॥ **7.80.9**॥ 2825

व्यसनं सुमहत् क्रुद्धः स ते दद्यान्महातपाः।
यदि वान्यन्मया कार्यं धर्मदृष्टेन सत्पथा॥ **7.80.10**॥ 2826

वरयस्व नरश्रेष्ठ पितरं मे महाद्युतिम्।
अन्यथा तु फलं तुभ्यं भवेद् घोराभिसंहितम्॥ **7.80.11**॥ 2827

क्रोधेन हि पिता मेऽसौ त्रैलोक्यमपि निर्दहेत्।
दास्यते चानवद्याङ्ग तव मां याचितः पिता॥ **7.80.12**॥ 2828

एवं ब्रुवाणामरजां दण्डः कामवशं गतः।
प्रत्युवाच मदोन्मत्तः शिरस्याधाय चाञ्जलिम्॥ **7.80.13**॥ 2829

प्रसादं कुरु सुश्रोणि न कालं क्षेप्तुमर्हसि।
त्वत्कृते हि मम प्राणा विदीर्यन्ते वरानने॥ **7.80.14**॥ 2830

त्वां प्राप्य तु वधो वापि पापं वापि सुदारुणम्।
भक्तं भजस्व मां भीरु भजमानं सुविह्वलम्॥ **7.80.15**॥ 2831

एवमुक्त्वा तु तां कन्यां दोर्भ्यां प्राप्य बलाद् बली।
विस्फुरन्तीं यथाकामं मैथुनायोपचक्रमे॥ **7.80.16**॥ 2832

तमनर्थं महाघोरं दण्डः कृत्वा सुदारुणम्।
नगरं प्रययावाशु मधुमन्तमनुत्तमम्॥ **7.80.17**॥ 2833

अरजापि रुदन्ती सा आश्रमस्याविदूरतः।
प्रतीक्षते सुसन्त्रस्ता पितरं देवसन्निभम्॥ **7.80.18**॥ 2834

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अशीतितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकाशीतितमः सर्गः ॥

शुक्रस्य शापेन सपरिवारस्य दण्डस्य तदीयराज्यस्य च विनाशः

स मुहूर्तादुपश्रुत्य देवर्षिरमितप्रभः।
स्वमाश्रमं शिष्यवृतः क्षुधार्तः सन्न्यवर्तत ॥ **7.81.1** ॥ 2835

सोऽपश्यदरजां दीनां रजसा समभिप्लुताम्।
ज्योत्स्नामिव ग्रहग्रस्तां प्रत्यूषे न विराजतीम् ॥ **7.81.2** ॥ 2836

तस्य रोषः समभवत् क्षुधार्तस्य विशेषतः।
निर्दहन्निव लोकांस्त्रीशिष्यांश्चैतदुवाच ह ॥ **7.81.3** ॥ 2837

पश्यध्वं विपरीतस्य दण्डस्याविदितात्मनः।
विपत्तिं घोरसङ्काशां क्रुद्धादग्निशिखामिव ॥ **7.81.4** ॥ 2838

क्षयोऽस्य दुर्मतेः प्राप्तः सानुगस्य दुरात्मनः।
यः प्रदीप्तां हुताशस्य शिखां वै स्प्रष्टुमर्हति ॥ **7.81.5** ॥ 2839

यस्मात् स कृतवान् पापमीदृशं घोरसंहितम्।
तस्मात् प्राप्स्यति दुर्मेधाः फलं पापस्य कर्मणः ॥ **7.81.6** ॥ 2840

सप्तरात्रेण राजासौ सपुत्रबलवाहनः।
पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः ॥ **7.81.7** ॥ 2841

समन्ताद् योजनशतं विषयं चास्य दुर्मतेः।
धक्ष्यते पांसुवर्षेण महता पाकशासनः॥ **7.81.8**॥ 2842

सर्वसत्त्वानि यानीह स्थावराणि चराणि च।
महता पांसुवर्षेण विलयं सर्वतोऽगमन्॥ **7.81.9**॥ 2843

दण्डस्य विषयो यावत् तावत् सर्वं समुच्छ्रयम्।
पांसुवर्षमिवालक्ष्यं सप्तरात्रं भविष्यति॥ **7.81.10**॥ 2844

इत्युक्त्वा क्रोधताम्राक्षस्तमाश्रमनिवासिनम्।
जनं जनपदान्तेषु स्थीयतामिति चाब्रवीत्॥ **7.81.11**॥ 2845

श्रुत्वा तूशनसो वाक्यं सोऽऽश्रमावसथो जनः।
निष्क्रान्तो विषयात् तस्मात् स्थानं चक्रेऽथ बाह्यतः॥ **7.81.12**॥ 2846

स तथोक्त्वा मुनिजनमरजामिदमब्रवीत्।
इहैव वस दुर्मेधे आश्रमे सुसमाहिता॥ **7.81.13**॥ 2847

इदं योजनपर्यन्तं सरः सुरुचिरप्रभम्।
अरजे विज्वरा भुङ्क्ष्व कालश्चात्र प्रतीक्ष्यताम्॥ **7.81.14**॥ 2848

त्वत्समीपे च ये सत्त्वा वासमेष्यन्ति तां निशाम्।
अवध्याः पांसुवर्षेण ते भविष्यन्ति नित्यदा॥ **7.81.15**॥ 2849

श्रुत्वा नियोगं ब्रह्मर्षेः सारजा भार्गवी तदा।
तथेति पितरं प्राह भार्गवं भृशदुःखिता॥ **7.81.16**॥ 2850

इत्युक्त्वा भार्गवो वासमन्यत्र समकारयत्।
तच्च राज्यं नरेन्द्रस्य सभृत्यबलवाहनम्॥ **7.81.17**॥ 2851

सप्ताहाद् भस्मसाद् भूतं यथोक्तं ब्रह्मवादिना।
तस्यासौ दण्डविषयो विन्ध्यशैवलयोर्नृप॥ **7.81.18**॥ 2852

शप्तो ब्रह्मर्षिणा तेन वैधर्म्ये सहिते कृते।
ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते॥ **7.81.19**॥ 2853

तपस्विनः स्थिता ह्यत्र जनस्थानमतोऽभवत्।
एतत् ते सर्वमाख्यातं यन्मां पृच्छसि राघव॥ **7.81.20**॥ 2854

सन्ध्यामुपासितुं वीर समयो ह्यतिवर्तते।
एते महर्षयः सर्वे पूर्णकुम्भाः समन्ततः॥ **7.81.21**॥ 2855

कृतोदका नरव्याघ्र आदित्यं पर्युपासते।
स तैर्ब्राह्मणमभ्यस्तं सहितैर्ब्रह्मवित्तमैः।
रविरस्तङ्गतो राम गच्छोदकमुपस्पृश॥ **7.81.22**॥ 2856

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्व्यशीतितमः सर्गः ॥

अगस्त्याश्रमाच्छ्रीरामस्यायोध्यां प्रति प्रस्थानम्

ऋषेर्वचनमाज्ञाय रामः सन्ध्यामुपासितुम्।
अपाक्रामत् सरः पुण्यमप्सरोगणसेवितम्॥ **7.82.1** ॥ 2857

तत्रोदकमुपस्पृश्य सन्ध्यामन्वास्य पश्चिमाम्।
आश्रमं प्राविशद् रामः कुम्भयोनेर्महात्मनः॥ **7.82.2** ॥ 2858

तस्यागस्त्यो बहुगुणं कन्दमूलं तथौषधम्।
शाल्यादीनि पवित्राणि भोजनार्थमकल्पयत्॥ **7.82.3** ॥ 2859

स भुक्तवान् नरश्रेष्ठस्तदन्नममृतोपमम्।
प्रीतश्च परितुष्टश्च तां रात्रिं समुपाविशत्॥ **7.82.4** ॥ 2860

प्रभाते काल्यमुत्थाय कृत्वाऽऽह्निकमरिन्दमः।
ऋषिं समुपचक्राम गमनाय रघूत्तमः॥ **7.82.5** ॥ 2861

अभिवाद्याब्रवीद् रामो महर्षिं कुम्भसम्भवम्।
आपृच्छे स्वां पुरीं गन्तुं मामनुज्ञातुमर्हसि॥ **7.82.6** ॥ 2862

धन्योऽस्म्यनुगृहीतोऽस्मि दर्शनेन महात्मनः।
द्रष्टुं चैवागमिष्यामि पावनार्थमिहात्मनः॥ **7.82.7** ॥ 2863

तथा वदति काकुत्स्थे वाक्यमद्भुतदर्शनम्।
उवाच परमप्रीतो धर्मनेत्रस्तपोधनः॥ **7.82.8**॥ 2864

अत्यद्भुतमिदं वाक्यं तव राम शुभाक्षरम्।
पावनः सर्वभूतानां त्वमेव रघुनन्दन॥ **7.82.9**॥ 2865

मुहूर्तमपि राम त्वां येऽनुपश्यन्ति केचन।
पाविताः स्वर्गभूताश्च पूज्यास्ते त्रिदिवेश्वरैः॥ **7.82.10**॥ 2866

ये च त्वां घोरचक्षुर्भिः पश्यन्ति प्राणिनो भुवि।
हतास्ते यमदण्डेन सद्यो निरयगामिनः॥ **7.82.11**॥ 2867

ईदृशस्त्वं रघुश्रेष्ठ पावनः सर्वदेहिनाम्।
भुवि त्वां कथयन्तो हि सिद्धिमेष्यन्ति राघव॥ **7.82.12**॥ 2868

त्वं गच्छारिष्टमव्यग्रः पन्थानमकुतोभयम्।
प्रशाधि राज्यं धर्मेण गतिर्हि जगतो भवान्॥ **7.82.13**॥ 2869

एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः।
अभ्यवादयत प्राज्ञस्तमृषिं सत्यशीलिनम्॥ **7.82.14**॥ 2870

अभिवाद्य ऋषिश्रेष्ठं तांश्च सर्वांस्तपोधनान्।
अध्यारोहत् तदव्यग्रः पुष्पकं हेमभूषितम्॥ **7.82.15**॥ 2871

तं प्रयान्तं मुनिगणा आशीर्वादैः समन्ततः।
अपूजयन् महेन्द्राभं सहस्राक्षमिवामराः॥ **7.82.16**॥ 2872

खस्थः स ददृशे रामः पुष्पके हेमभूषिते।
शशी मेघसमीपस्थो यथा जलधरागमे॥ **7.82.17**॥ 2873

ततोऽर्धदिवसे प्राप्ते पूज्यमानस्ततस्ततः।
अयोध्यां प्राप्य काकुत्स्थो मध्यकक्षामवातरत्॥ **7.82.18**॥ 2874

ततो विसृज्य रुचिरं पुष्पकं कामगामिनम्।
विसर्जयित्वा गच्छेति स्वस्ति तेऽस्त्विति च प्रभुः॥ **7.82.19**॥ 2875

कक्षान्तरस्थितं क्षिप्रं द्वाःस्थं रामोऽब्रवीद् वचः।
लक्ष्मणं भरतं चैव गत्वा तौ लघुविक्रमौ।
ममागमनमाख्याय शब्दापयत मा चिरम्॥ **7.82.20**॥ 2876

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्व्यशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्र्यशीतितमः सर्गः ॥

भरतस्य सम्मत्या श्रीरामस्य राजसूययज्ञकरणविषयकविचारतो विनिवृत्तिः

तच्छ्रुत्वा भाषितं तस्य रामस्याक्लिष्टकर्मणः।
द्वाःस्थः कुमारावाहूय राघवाय न्यवेदयत्॥ **7.83.1**॥ 2877

दृष्ट्वा तु राघवः प्राप्तावुभौ भरतलक्ष्मणौ।
परिष्वज्य ततो रामो वाक्यमेतदुवाच ह॥ **7.83.2**॥ 2878

कृतं मया यथा तथ्यं द्विजकार्यमनुत्तमम्।
धर्मसेतुमथो भूयः कर्तुमिच्छामि राघवौ॥ **7.83.3**॥ 2879

अक्षयश्चाव्ययश्चैव धर्मसेतुर्मतो मम।
धर्मप्रवचनं चैव सर्वपापप्रणाशनम्॥ **7.83.4**॥ 2880

युवाभ्यामात्मभूताभ्यां राजसूयमनुत्तमम्।
सहितो यष्टुमिच्छामि तत्र धर्मस्तु शाश्वतः॥ **7.83.5**॥ 2881

इष्ट्वा तु राजसूयेन मित्रः शत्रुनिबर्हणः।
सुहुतेन सुयज्ञेन वरुणत्वमुपागमत्॥ **7.83.6**॥ 2882

सोमश्च राजसूयेन इष्ट्वा धर्मेण धर्मवित्।
प्राप्तश्च सर्वलोकेषु कीर्तिं स्थानं च शाश्वतम्॥ **7.83.7**॥ 2883

अस्मिन्नहनि यच्छ्रेयश्चिन्त्यतां तन्मया सह।
हितं चायतियुक्तं च प्रयतौ वक्तुमर्हथः॥ **7.83.8**॥ 2884

श्रुत्वा तु राघवस्यैतद् वाक्यं वाक्यविशारदः।
भरतः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह॥ **7.83.9**॥ 2885

त्वयि धर्मः परः साधो त्वयि सर्वा वसुन्धरा।
प्रतिष्ठिता महाबाहो यशश्चामितविक्रम॥ **7.83.10**॥ 2886

महीपालाश्च सर्वे त्वां प्रजापतिमिवामराः।
निरीक्षन्ते महात्मानं लोकनाथं यथा वयम्॥ **7.83.11**॥ 2887

पुत्राश्च पितृवद् राजन् पश्यन्ति त्वां महाबल।
पृथिव्या गतिभूतोऽसि प्राणिनामपि राघव॥ **7.83.12**॥ 2888

स त्वमेवंविधं यज्ञमाहर्तासि कथं नृप।
पृथिव्यां राजवंशानां विनाशो यत्र दृश्यते॥ **7.83.13**॥ 2889

पृथिव्यां ये च पुरुषा राजन् पौरुषमागताः।
सर्वेषां भविता तत्र सङ्क्षयः सर्वकोपजः॥ **7.83.14**॥ 2890

सर्वं पुरुषशार्दूल गुणैरतुलविक्रम।
पृथिवीं नार्हसे हन्तुं वशे हि तव वर्तते॥ **7.83.15**॥ 2891

भरतस्य तु तद् वाक्यं श्रुत्वामृतमयं यथा।
प्रहर्षमतुलं लेभे रामः सत्यपराक्रमः॥ **7.83.16**॥ 2892

उवाच च शुभं वाक्यं कैकेय्यानन्दवर्धनम्।
प्रीतोऽस्मि परितुष्टोऽस्मि तवाद्य वचनेऽनघ॥ **7.83.17**॥ 2893

इदं वचनमक्लीबं त्वया धर्मसमागतम्।
व्याहृतं पुरुषव्याघ्र पृथिव्याः परिपालनम्॥ **7.83.18**॥ 2894

एष्यदस्मदभिप्रायाद् राजसूयात् क्रतूत्तमात्।
निवर्तयामि धर्मज्ञ तव सुव्याहृतेन च॥ **7.83.19**॥ 2895

लोकपीडाकरं कर्म न कर्तव्यं विचक्षणैः।
बालानां तु शुभं वाक्यं ग्राह्यं लक्ष्मणपूर्वज।
तस्माच्छृणोमि ते वाक्यं साधु युक्तं महाबल॥ **7.83.20**॥ 2896

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्र्यशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुरशीतितमः सर्गः ॥

अश्वमेधं प्रस्तुवता लक्ष्मणेनेन्द्रवृत्रयोः कथाया उपस्थापनं वृत्रस्य तप इन्द्रस्य विष्णुं प्रति तद्वधार्थमनुरोधः

तथोक्तवति रामे तु भरते च महात्मनि।
लक्ष्मणोऽथ शुभं वाक्यमुवाच रघुनन्दनम्॥ **7.84.1**॥ 2897

अश्वमेधो महायज्ञः पावनः सर्वपाप्मनाम्।
पावनस्तव दुर्धर्षो रोचतां रघुनन्दन॥ **7.84.2**॥ 2898

श्रूयते हि पुरावृत्तं वासवे सुमहात्मनि।
ब्रह्महत्यावृतः शक्रो हयमेधेन पावितः॥ **7.84.3**॥ 2899

पुरा किल महाबाहो देवासुरसमागमे।
वृत्रो नाम महानासीद् दैतेयो लोकसम्मतः॥ **7.84.4**॥ 2900

विस्तीर्णो योजनशतमुच्छ्रितस्त्रिगुणं ततः।
अनुरागेण लोकांस्त्रीन् स्नेहात् पश्यति सर्वतः॥ **7.84.5**॥ 2901

धर्मज्ञश्च कृतज्ञश्च बुद्ध्या च परिनिष्ठितः।
शशास पृथिवीं स्फीतां धर्मेण सुसमाहितः॥ **7.84.6**॥ 2902

तस्मिन् प्रशासति तदा सर्वकामदुधा मही।
रसवन्ति प्रसूनानि मूलानि च फलानि च॥ **7.84.7**॥ 2903

अकृष्टपच्या पृथिवी सुसम्पन्ना महात्मनः।
स राज्यं तादृशं भुङ्क्ते स्फीतमद्भुतदर्शनम्॥ **7.84.8**॥ 2904

तस्य बुद्धिः समुत्पन्ना तपः कुर्यामनुत्तमम्।
तपो हि परमं श्रेयः सम्मोहमितरत् सुखम्॥ **7.84.9**॥ 2905

स निक्षिप्य सुतं ज्येष्ठं पौरेषु मधुरेश्वरम्।
तप उग्रं समातिष्ठत् तापयन् सर्वदेवताः॥ **7.84.10**॥ 2906

तपस्तप्यति वृत्रे तु वासवः परमार्तवत्।
विष्णुं समुपसङ्क्रम्य वाक्यमेतदुवाच ह॥ **7.84.11**॥ 2907

तपस्यता महाबाहो लोकाः सर्वे विनिर्जिताः।
बलवान् स हि धर्मात्मा नैनं शक्ष्यामि शासितुम्॥ **7.84.12**॥ 2908

यद्यसौ तप आतिष्ठेद् भूय एव सुरेश्वर।
यावल्लोका धरिष्यन्ति तावदस्य वशानुगाः॥ **7.84.13**॥ 2909

तं चैनं परमोदारमुपेक्षसि महाबल।
क्षणं हि न भवेद् वृत्रः क्रुद्धे त्वयि सुरेश्वर॥ **7.84.14**॥ 2910

यदा हि प्रीतिसंयोगं त्वया विष्णो समागतः।
तदाप्रभृति लोकानां नाथत्वमुपलब्धवान्॥ **7.84.15**॥ 2911

स त्वं प्रसादं लोकानां कुरुष्व सुसमाहितः।
त्वत्कृतेन हि सर्वं स्यात् प्रशान्तमरुजं जगत्॥ **7.84.16**॥ 2912

इमे हि सर्वे विष्णो त्वां निरीक्षन्ते दिवौकसः।
वृत्रघातेन महता तेषां साह्यं कुरुष्व ह॥ **7.84.17**॥ 2913

त्वया हि नित्यशः साह्यं कृतमेषां महात्मनाम्।
असह्यमिदमन्येषामगतीनां गतिर्भवान्॥ **7.84.18**॥ 2914

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुरशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशीतितमः सर्गः ॥

इन्द्रे तदीये वज्रादौ च वैष्णवतेजसः प्रवेश इन्द्रवज्रेण वृत्रस्य वधो ब्रह्महत्ययाऽऽक्रान्तस्येन्द्रस्य तमोमयप्रदेशे गमनम्

लक्ष्मणस्य तु तद् वाक्यं श्रुत्वा शत्रुनिबर्हणः।
वृत्रघातमशेषेण कथयेत्याह सुव्रत॥ **7.85.1**॥ 2915

राघवेणैवमुक्तस्तु सुमित्रानन्दवर्धनः।
भूय एव कथां दिव्यां कथयामास सुव्रतः॥ **7.85.2**॥ 2916

सहस्राक्षवचः श्रुत्वा सर्वेषां च दिवौकसाम्।
विष्णुर्देवानुवाचेदं सर्वानिन्द्रपुरोगमान्॥ **7.85.3**॥ 2917

पूर्वं सौहृदबद्धोऽस्मि वृत्रस्येह महात्मनः।
तेन युष्मत्प्रियार्थं हि नाहं हन्मि महासुरम्॥ **7.85.4**॥ 2918

अवश्यं करणीयं च भवतां सुखमुत्तमम्।
तस्मादुपायमाख्यास्ये सहस्राक्षो वधिष्यति॥ **7.85.5**॥ 2919

त्रेधाभूतं करिष्यामि आत्मानं सुरसत्तमाः।
तेन वृत्रं सहस्राक्षो वधिष्यति न संशयः॥ **7.85.6**॥ 2920

एकांशो वासवं यातु द्वितीयो वज्रमेव तु।
तृतीयो भूतलं यातु तदा वृत्रं हनिष्यति॥ **7.85.7**॥ 2921

तथा ब्रुवति देवेशे देवा वाक्यमथाब्रुवन्।
एवमेतन्न सन्देहो यथा वदसि दैत्यहन्॥ **7.85.8**॥ 2922

भद्रं तेऽस्तु गमिष्यामो वृत्रासुरवधैषिणः।
भजस्व परमोदार वासवं स्वेन तेजसा॥ **7.85.9**॥ 2923

ततः सर्वे महात्मानः सहस्राक्षपुरोगमाः।
तदरण्यमुपाक्रामन् यत्र वृत्रो महासुरः॥ **7.85.10**॥ 2924

तेऽपश्यंस्तेजसा भूतं तप्यन्तमसुरोत्तमम्।
पिबन्तमिव लोकांस्त्रीन् निर्दहन्तमिवाम्बरम्॥ **7.85.11**॥ 2925

दृष्ट्वैव चासुरश्रेष्ठं देवास्त्रासमुपागमन्।
कथमेनं वधिष्यामः कथं न स्यात् पराजयः॥ **7.85.12**॥ 2926

तेषां चिन्तयतां तत्र सहस्राक्षः पुरन्दरः।
वज्रं प्रगृह्य पाणिभ्यां प्राहिणोद् वृत्रमूर्धनि॥ **7.85.13**॥ 2927

कालाग्निनेव घोरेण दीप्तेनेव महार्चिषा।
पतता वृत्रशिरसा जगत् त्रासमुपागमत्॥ **7.85.14**॥ 2928

असम्भाव्यं वधं तस्य वृत्रस्य विबुधाधिपः।
चिन्तयानो जगामाशु लोकस्यान्तं महायशाः॥ **7.85.15**॥ 2929

तमिन्द्रं ब्रह्महत्याऽऽशु गच्छन्तमनुगच्छति।
अपतच्चास्य गात्रेषु तमिन्द्रं दुःखमाविशत्॥ **7.85.16**॥ 2930

हतारयः प्रणष्टेन्द्रा देवाः साग्निपुरोगमाः।
विष्णुं त्रिभुवनेशानं मुहुर्मुहुरपूजयन्॥ **7.85.17**॥ 2931

त्वं गतिः परमेशान पूर्वजो जगतः पिता।
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान्॥ **7.85.18**॥ 2932

हतश्चायं त्वया वृत्रो ब्रह्महत्या च वासवम्।
बाधते सुरशार्दूल मोक्षं तस्य विनिर्दिश॥ **7.85.19**॥ 2933

तेषां तद् वचनं श्रुत्वा देवानां विष्णुरब्रवीत्।
मामेव यजतां शक्रः पावयिष्यामि वज्रिणम्॥ **7.85.20**॥ 2934

पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः।
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः॥ **7.85.21**॥ 2935

एवं सन्दिश्य तां वाणीं देवानां चामृतोपमाम्।
जगाम विष्णुर्देवेशः स्तूयमानस्त्रिविष्टपम्॥ **7.85.22**॥ 2936

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षडशीतितमः सर्गः ॥

इन्द्रं विना जगत्यशान्तिरश्वमेधानुष्ठाननेनेन्द्रस्य ब्रह्महत्यातो मुक्तिश्च

तदा वृत्रवधं सर्वमखिलेन स लक्ष्मणः।
कथयित्वा नरश्रेष्ठः कथाशेषं प्रचक्रमे ॥ **7.86.1** ॥ 2937

ततो हते महावीर्ये वृत्रे देवभयङ्करे।
ब्रह्महत्यावृतः शक्रः संज्ञां लेभे न वृत्रहा ॥ **7.86.2** ॥ 2938

सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः।
कालं तत्रावसत् कञ्चिद् वेष्टमान इवोरगः ॥ **7.86.3** ॥ 2939

अथ नष्टे सहस्राक्षे उद्विग्नमभवज्जगत्।
भूमिश्च ध्वस्तसङ्काशा निःस्नेहा शुष्ककानना ॥ **7.86.4** ॥ 2940

निःस्रोतसस्ते सर्वे तु ह्रदाश्च सरितस्तथा।
सङ्क्षोभश्चैव सत्त्वानामनावृष्टिकृतोऽभवत् ॥ **7.86.5** ॥ 2941

क्षीयमाणे तु लोकेऽस्मिन् सम्भ्रान्तमनसः सुराः।
यदुक्तं विष्णुना पूर्वं तं यज्ञं समुपानयन् ॥ **7.86.6** ॥ 2942

ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः।
तं देशं समुपाजग्मुर्यत्रेन्द्रो भयमोहितः ॥ **7.86.7** ॥ 2943

ते तु दृष्ट्वा सहस्राक्षमावृतं ब्रह्महत्यया।
तं पुरस्कृत्य देवेशमश्वमेधं प्रचक्रिरे॥ **7.86.8**॥ 2944

ततोऽश्वमेधः सुमहान् महेन्द्रस्य महात्मनः।
ववृते ब्रह्महत्यायाः पावनार्थं नरेश्वर॥ **7.86.9**॥ 2945

ततो यज्ञे समाप्ते तु ब्रह्महत्या महात्मनः।
अभिगम्याब्रवीद् वाक्यं क्व मे स्थानं विधास्यथ॥ **7.86.10**॥ 2946

ते तामूचुस्ततो देवास्तुष्टाः प्रीतिसमन्विताः।
चतुर्धा विभजात्मानमात्मनैव दुरासदे॥ **7.86.11**॥ 2947

देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम्।
सन्दधौ स्थानमन्यत्र वरयामास दुर्वसा॥ **7.86.12**॥ 2948

एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै।
चतुरो वार्षिकान् मासान् दर्पघ्नी कामचारिणी॥ **7.86.13**॥ 2949

भूम्यामहं सर्वकालमेकेनांशेन सर्वदा।
वसिष्यामि न सन्देहः सत्येनैतद् ब्रवीमि वः॥ **7.86.14**॥ 2950

योऽयमंशस्तृतीयो मे स्त्रीषु यौवनशालिषु।
त्रिरात्रं दर्पपूर्णासु वसिष्ये दर्पघातिनी॥ **7.86.15**॥ 2951

हन्तारो ब्राह्मणान् ये तु मृषापूर्वमदूषकान्।
तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः॥ **7.86.16**॥ 2952

प्रत्यूचुस्तां ततो देवा यथा वदसि दुर्वसे।
तथा भवतु तत् सर्वं साधयस्व यदीप्सितम्॥ **7.86.17**॥ 2953

ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे।
विज्वरः पूतपाप्मा च वासवः समपद्यत॥ **7.86.18**॥ 2954

प्रशान्तं च जगत् सर्वं सहस्राक्षे प्रतिष्ठिते।
यज्ञं चाद्भुतसङ्काशं तदा शक्रोऽभ्यपूजयत्॥ **7.86.19**॥ 2955

ईदृशो ह्यश्वमेधस्य प्रभावो रघुनन्दन।
यजस्व सुमहाभाग हयमेधेन पार्थिव॥ **7.86.20**॥ 2956

इति लक्ष्मणवाक्यमुत्तमं
नृपतिरतीव मनोहरं महात्मा।
परितोषमवाप हृष्टचेता
निशमय्येन्द्रसमानविक्रमौजाः॥ **7.86.21**॥ 2957

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षडशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ताशीतितमः सर्गः ॥

श्रीरामेण लक्ष्मणं प्रतीलोपाख्यानस्य कथनम् - इलस्य मासावधिकस्त्रीत्वस्य मासावधिकपुरुषत्वस्य च प्राप्तिः

तच्छ्रुत्वा लक्ष्मणेनोक्तं वाक्यं वाक्यविशारदः।
प्रत्युवाच महातेजाः प्रहसन् राघवो वचः॥ **7.87.1** ॥ 2958

एवमेव नरश्रेष्ठ यथा वदसि लक्ष्मण।
वृत्रघातमशेषेण वाजिमेधफलं च यत्॥ **7.87.2** ॥ 2959

श्रूयते हि पुरा सौम्य कर्दमस्य प्रजापतेः।
पुत्रो बाह्लीश्वरः श्रीमानिलो नाम सुधार्मिकः॥ **7.87.3** ॥ 2960

स राजा पृथिवीं सर्वां वशे कृत्वा महायशाः।
राज्यं चैव नरव्याघ्र पुत्रवत् पर्यपालयत्॥ **7.87.4** ॥ 2961

सुरैश्च परमोदारैर्दैतेयैश्च महाधनैः।
नागराक्षसगन्धर्वैर्यक्षैश्च सुमहात्मभिः॥ **7.87.5** ॥ 2962

पूज्यते नित्यशः सौम्य भयार्तै रघुनन्दन।
अबिभ्यंश्च त्रयो लोकाः सरोषस्य महात्मनः॥ **7.87.6** ॥ 2963

स राजा तादृशोऽप्यासीद् धर्मे वीर्ये च निष्ठितः।
बुद्ध्या च परमोदारो बाह्लीकेशो महायशाः॥ **7.87.7** ॥ 2964

स प्रचक्रे महाबाहुर्मृगयां रुचिरे वने।
चैत्रे मनोरमे मासे सभृत्यबलवाहनः॥ **7.87.8**॥ 2965

प्रजघ्ने स नृपोऽरण्ये मृगाञ्शतसहस्रशः।
हत्वैव तृप्तिर्नाभूच्च राज्ञस्तस्य महात्मनः॥ **7.87.9**॥ 2966

नानामृगाणामयुतं वध्यमानं महात्मना।
यत्र जातो महासेनस्तं देशमुपचक्रमे॥ **7.87.10**॥ 2967

तस्मिन् प्रदेशे देवेशः शैलराजसुतां हरः।
रमयामास दुर्धर्षः सर्वैरनुचरैः सह॥ **7.87.11**॥ 2968

कृत्वा स्त्रीरूपमात्मानमुमेशो गोपतिध्वजः।
देव्याः प्रियचिकीर्षुः संस्तस्मिन् पर्वतनिर्झरे॥ **7.87.12**॥ 2969

यत्र यत्र वनोद्देशे सत्त्वाः पुरुषवादिनः।
वृक्षाः पुरुषनामानस्ते सर्वे स्त्रीजना भवन्॥ **7.87.13**॥ 2970

यच्च किञ्चन तत् सर्वं नारीसंज्ञं बभूव ह।
एतस्मिन्नन्तरे राजा स इलः कर्दमात्मजः॥ **7.87.14**॥ 2971

निघ्नन् मृगसहस्राणि तं देशमुपचक्रमे।
स दृष्ट्वा स्त्रीकृतं सर्वं सव्यालमृगपक्षिणम्॥ **7.87.15**॥ 2972

आत्मानं स्त्रीकृतं चैव सानुगं रघुनन्दन।
तस्य दुःखं महच्चासीद् दृष्ट्वाऽऽत्मानं तथागतम्॥ **7.87.16**॥ 2973

उमापतेश्च तत् कर्म ज्ञात्वा त्रासमुपागमत्।
ततो देवं महात्मानं शितिकण्ठं कपर्दिनम्॥ **7.87.17**॥ 2974

जगाम शरणं राजा सभृत्यबलवाहनः।
ततः प्रहस्य वरदः सह देव्या महेश्वरः॥ **7.87.18**॥ 2975

प्रजापतिसुतं वाक्यमुवाच वरदः स्वयम्।
उत्तिष्ठोत्तिष्ठ राजर्षे कार्दमेय महाबल॥ **7.87.19**॥ 2976

पुरुषत्वमृते सौम्य वरं वरय सुव्रत।
ततः स राजा शोकार्तः प्रत्याख्यातो महात्मना॥ **7.87.20**॥ 2977

स्त्रीभूतोऽसौ न जग्राह वरमन्यं सुरोत्तमात्।
ततः शोकेन महता शैलराजसुतां नृपः॥ **7.87.21**॥ 2978

प्रणिपत्य उमां देवीं सर्वेणैवान्तरात्मना।
ईशे वराणां वरदे लोकानामसि भामिनी॥ **7.87.22**॥ 2979

अमोघदर्शने देवि भज सौम्येन चक्षुषा।
ह्रद्गतं तस्य राजर्षेर्विज्ञाय हरसन्निधौ॥ **7.87.23**॥ 2980

प्रत्युवाच शुभं वाक्यं देवी रुद्रस्य सम्मता।
अर्धस्य देवो वरदो वरार्धस्य तव ह्यहम्॥ **7.87.24**॥ 2981

तस्मादर्धं गृहाण त्वं स्त्रीपुंसोर्यावदिच्छसि।
तदद्भुततरं श्रुत्वा देव्या वरमनुत्तमम्॥ **7.87.25**॥ 2982

सम्प्रहृष्टमना भूत्वा राजा वाक्यमथाब्रवीत्।
यदि देवि प्रसन्ना मे रूपेणाप्रतिमा भुवि॥ **7.87.26**॥ 2983

मासं स्त्रीत्वमुपासित्वा मासं स्यां पुरुषः पुनः।
ईप्सितं तस्य विज्ञाय देवी सुरुचिरानना॥ **7.87.27**॥ 2984

प्रत्युवाच शुभं वाक्यमेवमेव भविष्यति।
राजन् पुरुषभूतस्त्वं स्त्रीभावं न स्मरिष्यसि॥ **7.87.28**॥ 2985

स्त्रीभूतश्च परं मासं न स्मरिष्यसि पौरुषम्।
एवं स राजा पुरुषो मासं भूत्वाथ कार्दमिः।
त्रैलोक्यसुन्दरी नारी मासमेकमिलाभवत्॥ **7.87.29**॥ 2986

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्ताशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाशीतितमः सर्गः ॥

इलाबुधयोर्मिथो दर्शनं बुधेनेलासहचरीणां किम्पुरुषीति नाम विधाय पर्वतेऽवस्थानाय प्रेषणम्

तां कथामैलसम्बद्धां रामेण समुदीरिताम्।
लक्ष्मणो भरतश्चैव श्रुत्वा परमविस्मितौ॥ **7.88.1** ॥ 2987

तौ रामं प्राञ्जली भूत्वा तस्य राज्ञो महात्मनः।
विस्तरं तस्य भावस्य तदा पप्रच्छतुः पुनः॥ **7.88.2** ॥ 2988

कथं स राजा स्त्रीभूतो वर्तयामास दुर्गतिः।
पुरुषः स यदा भूतः कां वृत्तिं वर्तयत्यसौ॥ **7.88.3** ॥ 2989

तयोस्तद् भाषितं श्रुत्वा कौतूहलसमन्वितम्।
कथयामास काकुत्स्थस्तस्य राज्ञो यथागमम्॥ **7.88.4** ॥ 2990

तमेव प्रथमं मासं स्त्री भूत्वा लोकसुन्दरी।
ताभिः परिवृता स्त्रीभिर्येऽस्य पूर्वं पदानुगाः॥ **7.88.5** ॥ 2991

तत्काननं विगाह्याशु विजह्रे लोकसुन्दरी।
द्रुमगुल्मलताकीर्णं पद्भ्यां पद्मदलेक्षणा॥ **7.88.6** ॥ 2992

वाहनानि च सर्वाणि सन्त्यक्त्वा वै समन्ततः।
पर्वताभोगविवरे तस्मिन् रेमे इला तदा॥ **7.88.7** ॥ 2993

अथ तस्मिन् वनोद्देशे पर्वतस्याविदूरतः।
सरः सुरुचिरप्रख्यं नानापक्षिगणायुतम्॥ **7.88.8**॥ 2994

ददर्श सा इला तस्मिन् बुधं सोमसुतं तदा।
ज्वलन्तं स्वेन वपुषा पूर्णं सोममिवोदितम्॥ **7.88.9**॥ 2995

तपन्तं च तपस्तीव्रमम्भोमध्ये दुरासदम्।
यशस्करं कामकरं तारुण्ये पर्यवस्थितम्॥ **7.88.10**॥ 2996

सा तं जलाशयं सर्वं क्षोभयामास विस्मिता।
सह तैः पूर्वपुरुषैः स्त्रीभूतै रघुनन्दन॥ **7.88.11**॥ 2997

बुधस्तु तां समीक्ष्यैव कामबाणवशं गतः।
नोपलेभे तदात्मानं स चचाल तदाम्भसि॥ **7.88.12**॥ 2998

इलां निरीक्षमाणस्तु त्रैलोक्यादधिकां शुभाम्।
चित्तं समभ्यतिक्रामत् का न्वियं देवताधिका॥ **7.88.13**॥ 2999

न देवीषु न नागीषु नासुरीष्वप्सरःसु च।
दृष्टपूर्वा मया काचिद् रूपेणानेन शोभिता॥ **7.88.14**॥ 3000

सदृशीयं मम भवेद् यदि नान्यपरिग्रहः।
इति बुद्धिं समास्थाय जलात् कूलमुपागमत्॥ **7.88.15**॥ 3001

आश्रमं समुपागम्य ततस्ताः प्रमदोत्तमाः।
शब्दापयत धर्मात्मा ताश्चैनं च ववन्दिरे॥ **7.88.16**॥ 3002

स ताः पप्रच्छ धर्मात्मा कस्यैषा लोकसुन्दरी।
किमर्थमागता चैव सर्वमाख्यात मा चिरम्॥ **7.88.17**॥ 3003

शुभं तु तस्य तद् वाक्यं मधुरं मधुराक्षरम्।
श्रुत्वा स्त्रियश्च ताः सर्वा ऊचुर्मधुरया गिरा॥ **7.88.18**॥ 3004

अस्माकमेषा सुश्रोणी प्रभुत्वे वर्तते सदा।
अपतिः काननान्तेषु सहास्माभिश्चरत्यसौ॥ **7.88.19**॥ 3005

तद् वाक्यमव्यक्तपदं तासां स्त्रीणां निशम्य च।
विद्यामावर्तनीं पुण्यामावर्तयत स द्विजः॥ **7.88.20**॥ 3006

सोऽर्थं विदित्वा सकलं तस्य राज्ञो यथा तथा।
सर्वा एव स्त्रियस्ताश्च बभाषे मुनिपुङ्गवः॥ **7.88.21**॥ 3007

अत्र किम्पुरुषीभूत्वा शैलरोधसि वत्स्यथ।
आवासस्तु गिरावस्मिञ्शीघ्रमेव विधीयताम्॥ **7.88.22**॥ 3008

मूलपत्रफलैः सर्वा वर्तयिष्यथ नित्यदा।
स्त्रियः किम्पुरुषान्नाम भर्तॄन् समुपलप्स्यथ॥ **7.88.23**॥ 3009

ताः श्रुत्वा सोमपुत्रस्य स्त्रियः किम्पुरुषीकृताः।
उपासाञ्चक्रिरे शैलं वध्वस्ता बहुलास्तदा॥ **7.88.24**॥ 3010

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोननवतितमः सर्गः ॥

इलाबुधयोः समागमः पुरूरवस उत्पत्तिश्च

श्रुत्वा किम्पुरुषोत्पत्तिं लक्ष्मणो भरतस्तथा।
आश्चर्यमिति चाब्रूतामुभौ रामं जनेश्वरम्॥ **7.89.1** ॥ 3011

अथ रामः कथामेतां भूय एव महायशाः।
कथयामास धर्मात्मा प्रजापतिसुतस्य वै॥ **7.89.2** ॥ 3012

सर्वास्ता विहृता दृष्ट्वा किन्नरीर्ऋषिसत्तमः।
उवाच रूपसम्पन्नां तां स्त्रियं प्रहसन्निव॥ **7.89.3** ॥ 3013

सोमस्याहं सुदयितः सुतः सुरुचिरानने।
भजस्व मां वरारोहे भक्त्या स्निग्धेन चक्षुषा॥ **7.89.4** ॥ 3014

तस्य तद् वचनं श्रुत्वा शून्ये स्वजनवर्जिते।
इला सुरुचिरप्रख्यं प्रत्युवाच महाप्रभम्॥ **7.89.5** ॥ 3015

अहं कामचरी सौम्य तवास्मि वशवर्तिनी।
प्रशाधि मां सोमसुत यथेच्छसि तथा कुरु॥ **7.89.6** ॥ 3016

तस्यास्तदद्भुतप्रख्यं श्रुत्वा हर्षमुपागतः।
स वै कामी सह तया रेमे चन्द्रमसः सुतः॥ **7.89.7** ॥ 3017

बुधस्य माधवो मासस्तामिलां रुचिराननाम्।
गतो रमयतोऽत्यर्थं क्षणवत् तस्य कामिनः॥ **7.89.8**॥ 3018

अथ मासे तु सम्पूर्णे पूर्णेन्दुसदृशाननः।
प्रजापतिसुतः श्रीमाञ्शयने प्रत्यबुध्यत॥ **7.89.9**॥ 3019

सोऽपश्यत् सोमजं तत्र तपन्तं सलिलाशये।
ऊर्ध्वबाहुं निरालम्बं तं राजा प्रत्यभाषत॥ **7.89.10**॥ 3020

भगवन् पर्वतं दुर्गं प्रविष्टोऽस्मि सहानुगः।
न च पश्यामि तत् सैन्यं क्व नु ते मामका गताः॥ **7.89.11**॥ 3021

तच्छ्रुत्वा तस्य राजर्षेर्नष्टसंज्ञस्य भाषितम्।
प्रत्युवाच शुभं वाक्यं सान्त्वयन् परया गिरा॥ **7.89.12**॥ 3022

अश्मवर्षेण महता भृत्यास्ते विनिपातिताः।
त्वं चाश्रमपदे सुप्तो वातवर्षभयार्दितः॥ **7.89.13**॥ 3023

समाश्वसिहि भद्रं ते निर्भयो विगतज्वरः।
फलमूलाशनो वीर निवसेह यथासुखम्॥ **7.89.14**॥ 3024

स राजा तेन वाक्येन प्रत्याश्वस्तो महामतिः।
प्रत्युवाच ततो वाक्यं दीनो भृत्यजनक्षयात्॥ **7.89.15**॥ 3025

त्यक्ष्याम्यहं स्वकं राज्यं नाहं भृत्यैर्विनाकृतः।
वर्तयेयं क्षणं ब्रह्मन् समनुज्ञातुमर्हसि॥ **7.89.16**॥ 3026

सुतो धर्मपरो ब्रह्मन् ज्येष्ठो मम महायशाः।
शशबिन्दुरिति ख्यातः स मे राज्यं प्रपत्स्यते॥ **7.89.17**॥ 3027

नहि शक्ष्याम्यहं हित्वा भृत्यदारान् सुखान्वितान्।
प्रतिवक्तुं महातेजः किञ्चिदप्यशुभं वचः॥ **7.89.18**॥ 3028

तथा ब्रुवति राजेन्द्रे बुधः परममद्भुतम्।
सान्त्वपूर्वमथोवाच वासस्त इह रोचताम्॥ **7.89.19**॥ 3029

न सन्तापस्त्वया कार्यः कार्दमेय महाबल।
संवत्सरोषितस्येह कारयिष्यामि ते हितम्॥ **7.89.20**॥ 3030

तस्य तद् वचनं श्रुत्वा बुधस्याक्लिष्टकर्मणः।
वासाय विदधे बुद्धिं यदुक्तं ब्रह्मवादिना॥ **7.89.21**॥ 3031

मासं स स्त्री तदा भूत्वा रमयत्यनिशं सदा।
मासं पुरुषभावेन धर्मबुद्धिं चकार सः॥ **7.89.22**॥ 3032

ततः सा नवमे मासि इला सोमसुतात् सुतम्।
जनयामास सुश्रोणी पुरूरवसमूर्जितम्॥ **7.89.23**॥ 3033

जातमात्रे तु सुश्रोणी पितुर्हस्ते न्यवेशयत्।
बुधस्य समवर्णं च इला पुत्रं महाबलम्॥ **7.89.24**॥ 3034

बुधस्तु पुरुषीभूतं स वै संवत्सरान्तरम्।
कथाभी रमयामास धर्मयुक्ताभिरात्मवान्॥ **7.89.25**॥ 3035

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोननवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवतितमः सर्गः ॥

अश्वमेधानुष्ठानेनेलायाः पुरुषत्वस्य प्राप्तिः

तथोक्तवति रामे तु तस्य जन्म तदद्भुतम्।
उवाच लक्ष्मणो भूयो भरतश्च महायशाः॥ **7.90.1** ॥ 3036

इला सा सोमपुत्रस्य संवत्सरमथोषिता।
अकरोत् किं नरश्रेष्ठ तत्त्वं शंसितुमर्हसि॥ **7.90.2** ॥ 3037

तयोस्तद् वाक्यमाधुर्यं निशम्य परिपृच्छतोः।
रामः पुनरुवाचेमां प्रजापतिसुते कथाम्॥ **7.90.3** ॥ 3038

पुरुषत्वं गते शूरे बुधः परमबुद्धिमान्।
संवर्तं परमोदारमाजुहाव महायशाः॥ **7.90.4** ॥ 3039

च्यवनं भृगुपुत्रं च मुनिं चारिष्टनेमिनम्।
प्रमोदनं मोदकरं ततो दुर्वाससं मुनिम्॥ **7.90.5** ॥ 3040

एतान् सर्वान् समानीय वाक्यज्ञस्तत्त्वदर्शनः।
उवाच सर्वान् सुहृदो धैर्येण सुसमाहितान्॥ **7.90.6** ॥ 3041

अयं राजा महाबाहुः कर्दमस्य इलः सुतः।
जानीतैनं यथाभूतं श्रेयो ह्यत्र विधीयताम्॥ **7.90.7** ॥ 3042

तेषां संवदतामेव द्विजैः सह महात्मभिः।
कर्दमस्तु महातेजास्तदाश्रममुपागमत्॥ **7.90.8**॥ 3043

पुलस्त्यश्च क्रतुश्चैव वषट्कारस्तथैव च।
ओङ्कारश्च महातेजास्तमाश्रममुपागमन्॥ **7.90.9**॥ 3044

ते सर्वे हृष्टमनसः परस्परसमागमे।
हितैषिणो बाह्लिपतेः पृथग्वाक्यान्यथाब्रुवन्॥ **7.90.10**॥ 3045

कर्दमस्त्वब्रवीद् वाक्यं सुतार्थं परमं हितम्।
द्विजाः शृणुत मद्वाक्यं यच्छ्रेयः पार्थिवस्य हि॥ **7.90.11**॥ 3046

नान्यं पश्यामि भैषज्यमन्तरा वृषभध्वजम्।
नाश्वमेधात् परो यज्ञः प्रियश्चैव महात्मनः॥ **7.90.12**॥ 3047

तस्माद् यजामहे सर्वे पार्थिवार्थे दुरासदम्।
कर्दमेनैवमुक्तास्तु सर्व एव द्विजर्षभाः॥ **7.90.13**॥ 3048

रोचयन्ति स्म तं यज्ञं रुद्रस्याराधनं प्रति।
संवर्तस्य तु राजर्षिः शिष्यः परपुरञ्जयः॥ **7.90.14**॥ 3049

मरुत्त इति विख्यातस्तं यज्ञं समुपाहरत्।
ततो यज्ञो महानासीद् बुधाश्रमसमीपतः॥ **7.90.15**॥ 3050

रुद्रश्च परमं तोषमाजगाम महायशाः।
अथ यज्ञे समाप्ते तु प्रीतः परमया मुदा॥ **7.90.16**॥ 3051

उमापतिर्द्विजान् सर्वानुवाच इलसन्निधौ।
प्रीतोऽस्मि हयमेधेन भक्त्या च द्विजसत्तमाः॥ **7.90.17**॥ 3052

अस्य बाह्लिपतेश्चैव किं करोमि प्रियं शुभम्।
तथा वदति देवेशे द्विजास्ते सुसमाहिताः॥ **7.90.18**॥ 3053

प्रसादयन्ति देवेशं यथा स्यात् पुरुषस्त्विला।
ततः प्रीतो महादेवः पुरुषत्वं ददौ पुनः॥ **7.90.19**॥ 3054

इलायै सुमहातेजा दत्त्वा चान्तरधीयत।
निवृत्ते हयमेधे च गते चादर्शनं हरे॥ **7.90.20**॥ 3055

यथागतं द्विजाः सर्वे तेऽगच्छन् दीर्घदर्शिनः।
राजा तु बाह्लिमुत्सृज्य मध्यदेशे ह्यनुत्तमम्॥ **7.90.21**॥ 3056

निवेशयामास पुरं प्रतिष्ठानं यशस्करम्।
शशबिन्दुश्च राजर्षिर्बाह्लिं परपुरञ्जयः॥ **7.90.22**॥ 3057

प्रतिष्ठाने इलो राजा प्रजापतिसुतो बली।
स काले प्राप्तवान् लोकमिलो ब्राह्ममनुत्तमम्॥ **7.90.23**॥ 3058

ऐलः पुरूरवा राजा प्रतिष्ठानमवाप्तवान्।
ईदृशो ह्यश्वमेधस्य प्रभावः पुरुषर्षभौ।
स्त्रीभूतः पौरुषं लेभे यच्चान्यदपि दुर्लभम्॥ **7.90.24**॥ 3059

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकनवतितमः सर्गः ॥

श्रीरामस्यादेशेनाश्वमेधयज्ञस्यायोजनम्

एतदाख्याय काकुत्स्थो भ्रातृभ्यामममितप्रभः।
लक्ष्मणं पुनरेवाह धर्मयुक्तमिदं वचः॥ **7.91.1** ॥ 3060

वसिष्ठं वामदेवं च जाबालिमथ काश्यपम्।
द्विजांश्च सर्वप्रवरानश्वमेधपुरस्कृतान्॥ **7.91.2** ॥ 3061

एतान् सर्वान् समानीय मन्त्रयित्वा च लक्ष्मण।
हयं लक्षणसम्पन्नं विमोक्ष्यामि समाधिना॥ **7.91.3** ॥ 3062

तद् वाक्यं राघवेणोक्तं श्रुत्वा त्वरितविक्रमः।
द्विजान् सर्वान् समाहूय दर्शयामास राघवम्॥ **7.91.4** ॥ 3063

ते दृष्ट्वा देवसङ्काशं कृतपादाभिवन्दनम्।
राघवं सुदुराधर्षमाशीभिः समपूजयन्॥ **7.91.5** ॥ 3064

प्राञ्जलिः स तदा भूत्वा राघवो द्विजसत्तमान्।
उवाच धर्मसंयुक्तमश्वमेधाश्रितं वचः॥ **7.91.6** ॥ 3065

तेऽपि रामस्य तच्छ्रुत्वा नमस्कृत्वा वृषध्वजम्।
अश्वमेधं द्विजाः सर्वे पूजयन्ति स्म सर्वशः॥ **7.91.7** ॥ 3066

स तेषां द्विजमुख्यानां वाक्यमद्भुतदर्शनम्।
अश्वमेधाश्रितं श्रुत्वा भृशं प्रीतोऽभवत् तदा॥ **7.91.8**॥ 3067

विज्ञाय कर्म तत् तेषां रामो लक्ष्मणमब्रवीत्।
प्रेषयस्व महाबाहो सुग्रीवाय महात्मने॥ **7.91.9**॥ 3068

यथा महद्भिर्हरिभिर्बहुभिश्च वनौकसाम्।
सार्धमागच्छ भद्रं ते अनुभोक्तुं महोत्सवम्॥ **7.91.10**॥ 3069

विभीषणश्च रक्षोभिः कामगैर्बहुभिर्वृतः।
अश्वमेधं महायज्ञमायात्वतुलविक्रमः॥ **7.91.11**॥ 3070

राजानश्च महाभागा ये मे प्रियचिकीर्षवः।
सानुगाः क्षिप्रमायान्तु यज्ञं भूमिनिरीक्षकाः॥ **7.91.12**॥ 3071

देशान्तरगता ये च द्विजा धर्मसमाहिताः।
आमन्त्रयस्व तान् सर्वानश्वमेधाय लक्ष्मण॥ **7.91.13**॥ 3072

ऋषयश्च महाबाहो आहूयन्तां तपोधनाः।
देशान्तरगताः सर्वे सदाराश्च द्विजातयः॥ **7.91.14**॥ 3073

तथैव तालावचरास्तथैव नटनर्तकाः।
यज्ञवाटश्च सुमहान् गोमत्या नैमिषे वने॥ **7.91.15**॥ 3074

आज्ञाप्यतां महाबाहो तद्धि पुण्यमनुत्तमम्।
शान्तयश्च महाबाहो प्रवर्तन्तां समन्ततः॥ **7.91.16**॥ 3075

शतशश्चापि धर्मज्ञाः क्रतुमुख्यमनुत्तमम्।
अनुभूय महायज्ञं नैमिषे रघुनन्दन॥ **7.91.17**॥ 3076

तुष्टः पुष्टश्च सर्वोऽसौ मानितश्च यथाविधि।
प्रतियास्यति धर्मज्ञ शीघ्रमामन्त्र्यतां जनः॥ **7.91.18**॥ 3077

शतं वाहसहस्राणां तण्डुलानां वपुष्मताम्।
अयुतं तिलमुद्गस्य प्रयात्वग्रे महाबल॥ **7.91.19**॥ 3078

चणकानां कुलित्थानां माषाणां लवणस्य च।
अतोऽनुरूपं स्नेहं च गन्धं सङ्क्षिप्तमेव च॥ **7.91.20**॥ 3079

सुवर्णकोट्यो बहुला हिरण्यस्य शतोत्तराः।
अग्रतो भरतः कृत्वा गच्छत्वग्रे समाधिना॥ **7.91.21**॥ 3080

अन्तरापणवीथ्यश्च सर्वे च नटनर्तकाः।
सूदा नार्यश्च बहवो नित्यं यौवनशालिनः॥ **7.91.22**॥ 3081

भरतेन तु सार्धं ते यान्तु सैन्यानि चाग्रतः।
नैगमान् बालवृद्धांश्च द्विजांश्च सुसमाहितान्॥ **7.91.23**॥ 3082

कर्मान्तिकान् वर्धकिनः कोशाध्यक्षांश्च नैगमान्।
मम मातॄस्तथा सर्वाः कुमारान्तःपुराणि च॥ **7.91.24**॥ 3083

काञ्चनीं मम पत्नीं च दीक्षायां ज्ञांश्च कर्मणि।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः॥ **7.91.25**॥ 3084

उपकार्या महार्हाश्च पार्थिवानां महौजसाम्।
सानुगानां नरश्रेष्ठो व्यादिदेश महाबलः॥ **7.91.26**॥ 3085

अन्नपानानि वस्त्राणि अनुगानां महात्मनाम्।
भरतः स तदा यातः शत्रुघ्नसहितस्तदा॥ **7.91.27**॥ 3086

वानराश्च महात्मानः सुग्रीवसहितास्तदा।
विप्राणां प्रवराः सर्वे चक्रुश्च परिवेषणम्॥ **7.91.28**॥ 3087

विभीषणश्च रक्षोभिः स्त्रीभिश्च बहुभिर्वृतः।
ऋषीणामुग्रतपसां पूजां चक्रे महात्मनाम्॥ 7.91.29॥ 3088

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विनवतितमः सर्गः ॥

श्रीरामाश्वमेधे दानमानयोरुत्कर्षः

तत् सर्वमखिलेनाशु प्रस्थाप्य भरताग्रजः।
हयं लक्षणसम्पन्नं कृष्णसारं मुमोच ह॥ **7.92.1** ॥ 3089

ऋत्विग्भिर्लक्ष्मणं सार्धमश्वे च विनियुज्य च।
ततोऽभ्यगच्छत् काकुत्स्थः सह सैन्येन नैमिषम्॥ **7.92.2** ॥ 3090

यज्ञवाटं महाबाहुर्दृष्ट्वा परममद्भुतम्।
प्रहर्षमतुलं लेभे श्रीमानिति च सोऽब्रवीत्॥ **7.92.3** ॥ 3091

नैमिषे वसतस्तस्य सर्व एव नराधिपाः।
आनिन्युरुपहारांश्च तान् रामः प्रत्यपूजयत्॥ **7.92.4** ॥ 3092

अन्नपानादिवस्त्राणि सर्वोपकरणानि च।
भरतः सहशत्रुघ्नो नियुक्तो राजपूजने॥ **7.92.5** ॥ 3093

वानराश्च महात्मानः सुग्रीवसहितास्तदा।
विप्राणां प्रणताः सर्वे चक्रिरे परिवेषणम्॥ **7.92.6** ॥ 3094

विभीषणश्च रक्षोभिर्बहुभिः सुसमाहितः।
ऋषीणामुग्रतपसां किङ्करः समपद्यत॥ **7.92.7** ॥ 3095

उपकार्या महार्हाश्च पार्थिवानां महात्मनाम्।
सानुगानां नरश्रेष्ठो व्यादिदेश महाबलः॥ **7.92.8**॥ 3096

एवं सुविहितो यज्ञो ह्यश्वमेधो ह्यवर्तत।
लक्ष्मणेन सुगुप्ता सा हयचर्या प्रवर्तत॥ **7.92.9**॥ 3097

ईदृशं राजसिंहस्य यज्ञप्रवरमुत्तमम्।
नान्यः शब्दोऽभवत् तत्र हयमेधे महात्मनः॥ **7.92.10**॥ 3098

छन्दतो देहि देहीति यावत् तुष्यन्ति याचकाः।
तावत् सर्वाणि दत्तानि क्रतुमुख्ये महात्मनः॥ **7.92.11**॥ 3099

विविधानि च गौडानि खाण्डवानि तथैव च।
न निःसृतं भवत्योष्ठाद् वचनं यावदर्थिनाम्॥ **7.92.12**॥ 3100

तावद् वानररक्षोभिर्दत्तमेवाभ्यदृश्यत।
न कश्चिन्मलिनो वापि दीनो वाप्यथवा कृशः॥ **7.92.13**॥ 3101

तस्मिन् यज्ञवरे राज्ञो हृष्टपुष्टजनावृते।
ये च तत्र महात्मानो मुनयश्चिरजीविनः॥ **7.92.14**॥ 3102

नास्मरंस्तादृशं यज्ञं दानौघसमलङ्कृतम्।
यः कृत्यवान् सुवर्णेन सुवर्णं लभते स्म सः॥ **7.92.15**॥ 3103

वित्तार्थी लभते वित्तं रत्नार्थी रत्नमेव च।
हिरण्यानां सुवर्णानां रत्नानामथ वाससाम्॥ **7.92.16**॥ 3104

अनिशं दीयमानानां राशिः समुपदृश्यते।
न शक्रस्य न सोमस्य यमस्य वरुणस्य च॥ **7.92.17**॥ 3105

ईदृशो दृष्टपूर्वो न एवमूचुस्तपोधनाः।
सर्वत्र वानरास्तस्थुः सर्वत्रैव च राक्षसाः॥ **7.92.18**॥ 3106

वासोधनान्नकामेभ्यः पूर्णहस्ता ददुर्भृशम्।
ईदृशो राजसिंहस्य यज्ञः सर्वगुणान्वितः।
संवत्सरमथो साग्रं वर्तते न च हीयते॥ 7.92.19॥ 3107

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिनवतितमः सर्गः ॥

श्रीरामस्य यज्ञे वाल्मीकेरागमनं रामायणगानार्थं तस्य कुशीलवौ प्रत्यादेशः

वर्तमाने तथाभूते यज्ञे च परमाद्भुते।
सशिष्य आजगामाशु वाल्मीकिर्भगवानृषिः॥ **7.93.1** ॥ 3108

स दृष्ट्वा दिव्यसङ्काशं यज्ञमद्भुतदर्शनम्।
एकान्त ऋषिवाटानां चकार उटजाञ्शुभान्॥ **7.93.2** ॥ 3109

शकटांश्च बहून् पूर्णान् फलमूलांश्च शोभनान्।
वाल्मीकिवाटे रुचिरे स्थापयन्नविदूरतः॥ **7.93.3** ॥ 3110

आसीत् सुपूजितो राज्ञा मुनिभिश्च महात्मभिः।
वाल्मीकिः सुमहातेजा न्यवसत् परमात्मवान्॥ **7.93.4** ॥ 3111

स शिष्यावब्रवीद्धृष्टौ युवां गत्वा समाहितौ।
कृत्स्नं रामायणं काव्यं गायेथां परया मुदा॥ **7.93.5** ॥ 3112

ऋषिवाटेषु पुण्येषु ब्राह्मणावसथेषु च।
रथ्यासु राजमार्गेषु पार्थिवानां गृहेषु च॥ **7.93.6** ॥ 3113

रामस्य भवनद्वारि यत्र कर्म च कुर्वते।
ऋत्विजामग्रतश्चैव तत्र गेयं विशेषतः॥ **7.93.7** ॥ 3114

इमानि च फलान्यत्र स्वादूनि विविधानि च।
जातानि पर्वताग्रेषु चास्वाद्यास्वाद्य गायताम्॥ **7.93.8**॥ 3115

न यास्यथः श्रमं वत्सौ भक्षयित्वा फलान्यथ।
मूलानि च सुमृष्टानि न रागात् परिहास्यथः॥ **7.93.9**॥ 3116

यदि शब्दापयेद् रामः श्रवणाय महीपतिः।
ऋषीणामुपविष्टानां यथायोगं प्रवर्तताम्॥ **7.93.10**॥ 3117

दिवसे विंशतिः सर्गा गेया मधुरया गिरा।
प्रमाणैर्बहुभिस्तत्र यथोद्दिष्टं मया पुरा॥ **7.93.11**॥ 3118

लोभश्चापि न कर्तव्यः स्वल्पोऽपि धनवाञ्छया।
किं धनेनाश्रमस्थानां फलमूलाशिनां सदा॥ **7.93.12**॥ 3119

यदि पृच्छेत् स काकुत्स्थो युवां कस्येति दारकौ।
वाल्मीकेरथ शिष्यौ द्वौ ब्रूतमेवं नराधिपम्॥ **7.93.13**॥ 3120

इमास्तन्त्रीः सुमधुराः स्थानं वापूर्वदर्शनम्।
मूर्च्छयित्वा सुमधुरं गायेथां विगतज्वरौ॥ **7.93.14**॥ 3121

आदिप्रभृति गेयं स्यान्न चावज्ञाय पार्थिवम्।
पिता हि सर्वभूतानां राजा भवति धर्मतः॥ **7.93.15**॥ 3122

तद् युवां हृष्टमनसौ श्वः प्रभाते समाहितौ।
गायेथां मधुरं गेयं तन्त्रीलयसमन्वितम्॥ **7.93.16**॥ 3123

इति सन्दिश्य बहुशो मुनिः प्राचेतसस्तदा।
वाल्मीकिः परमोदारस्तूष्णीमासीन्महामुनिः॥ **7.93.17**॥ 3124

सन्दिष्टौ मुनिना तेन तावुभौ मैथिलीसुतौ।
तथैव करवावेति निर्जग्मतुररिन्दमौ॥ **7.93.18**॥ 3125

तामद्भुतां तौ हृदये कुमारौ
निवेश्य वाणीमृषिभाषितां तदा।
समुत्सुकौ तौ सुखमूषतुर्निशां
यथाऽश्विनौ भार्गवनीतिसंहिताम्॥ **7.93.19**॥ 3126

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्नवतितमः सर्गः ॥

कुशलवकर्तृकं रामायणकाव्यगानं श्रीरामेण तस्य सभायां श्रवणम्

तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ।
यथोक्तमृषिणा पूर्वं सर्वं तत्रोपगायताम्॥ **7.94.1**॥ 3127

तां स शुश्राव काकुत्स्थः पूर्वाचार्यविनिर्मिताम्।
अपूर्वां पाठ्यजातिं च गेयेन समलङ्कृताम्॥ **7.94.2**॥ 3128

प्रमाणैर्बहुभिर्बद्धां तन्त्रीलयसमन्विताम्।
बालाभ्यां राघवः श्रुत्वा कौतूहलपरोऽभवत्॥ **7.94.3**॥ 3129

अथ कर्मान्तरे राजा समाहूय महामुनीन्।
पार्थिवांश्च नरव्याघ्रः पण्डितान् नैगमांस्तथा॥ **7.94.4**॥ 3130

पौराणिकाञ्शब्दविदो ये वृद्धाश्च द्विजातयः।
स्वराणां लक्षणज्ञांश्च उत्सुकान् द्विजसत्तमान्॥ **7.94.5**॥ 3131

लक्षणज्ञांश्च गान्धर्वान् नैगमांश्च विशेषतः।
पादाक्षरसमासज्ञांश्छन्दःसु परिनिष्ठितान्॥ **7.94.6**॥ 3132

कलामात्राविशेषज्ञाञ्ज्यौतिषे च परं गतान्।
क्रियाकल्पविदश्चैव तथा कार्यविशारदान्॥ **7.94.7**॥ 3133

भाषाज्ञानिङ्गितज्ञांश्च नैगमांश्चाप्यशेषतः।
हेतूपचारकुशलान् हैतुकांश्च बहुश्रुतान्॥ **7.94.8**॥ 3134

छन्दोविदः पुराणज्ञान् वैदिकान् द्विजसत्तमान्।
चित्रज्ञान् वृत्तसूत्रज्ञान् गीतनृत्यविशारदान्॥ **7.94.9**॥ 3135

शास्त्रज्ञान् नीतिनिपुणान् वेदान्तार्थप्रबोधकान्।
एतान् सर्वान् समानीय गातारौ समवेशयत्॥ **7.94.10**॥ 3136

तेषां संवदतां तत्र श्रोतृणां हर्षवर्धनम्।
गेयं प्रचक्रतुस्तत्र तावुभौ मुनिदारकौ॥ **7.94.11**॥ 3137

ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम्।
न च तृप्तिं ययुः सर्वे श्रोतारो गेयसम्पदा॥ **7.94.12**॥ 3138

हृष्टा मुनिगणाः सर्वे पार्थिवाश्च महौजसः।
पिबन्त इव चक्षुर्भिः पश्यन्ति स्म मुहुर्मुहुः॥ **7.94.13**॥ 3139

ऊचुः परस्परं चेदं सर्व एव समाहिताः।
उभौ रामस्य सदृशौ बिम्बाद् बिम्बमिवोत्थितौ॥ **7.94.14**॥ 3140

जटिलौ यदि न स्यातां न वल्कलधरौ यदि।
विशेषं नाधिगच्छामो गायतो राघवस्य च॥ **7.94.15**॥ 3141

एवं प्रभाषमाणेषु पौरजानपदेषु च।
प्रवृत्तमादितः पूर्वसर्गं नारददर्शितम्॥ **7.94.16**॥ 3142

ततः प्रभृति सर्गाश्च यावद् विंशत्यगायताम्।
ततोऽपराह्णसमये राघवः समभाषत॥ **7.94.17**॥ 3143

श्रुत्वा विंशतिसर्गांस्तान् भ्रातरं भ्रातृवत्सलः।
अष्टादश सहस्राणि सुवर्णस्य महात्मनोः॥ **7.94.18**॥ 3144

प्रयच्छ शीघ्रं काकुत्स्थ यदन्यदभिकाङ्क्षितम्।
ददौ स शीघ्रं काकुत्स्थो बालयोर्वै पृथक् पृथक्॥ **7.94.19**॥ 3145

दीयमानं सुवर्णं तु नागृह्णीतां कुशीलवौ।
ऊचतुश्च महात्मानौ किमनेनेति विस्मितौ॥ **7.94.20**॥ 3146

वन्येन फलमूलेन निरतौ वनवासिनौ।
सुवर्णेन हिरण्येन किं करिष्यावहे वने॥ **7.94.21**॥ 3147

तथा तयोः प्रब्रुवतोः कौतूहलसमन्विताः।
श्रोतारश्चैव रामश्च सर्व एव सुविस्मिताः॥ **7.94.22**॥ 3148

तस्य चैवागमं रामः काव्यस्य श्रोतुमुत्सुकः।
पप्रच्छ तौ महातेजास्तावुभौ मुनिदारकौ॥ **7.94.23**॥ 3149

किम्प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः।
कर्ता काव्यस्य महतः क्व चासौ मुनिपुङ्गवः॥ **7.94.24**॥ 3150

पृच्छन्तं राघवं वाक्यमूचतुर्मुनिदारकौ।
वाल्मीकिर्भगवान् कर्ता सम्प्राप्तो यज्ञसंविधम्।
येनेदं चरितं तुभ्यमशेषं सम्प्रदर्शितम्॥ **7.94.25**॥ 3151

सन्निबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम्।
उपाख्यानशतं चैव भार्गवेण तपस्विना॥ **7.94.26**॥ 3152

आदिप्रभृति वै राजन् पञ्चसर्गशतानि च।
काण्डानि षट्कृतानीह सोत्तराणि महात्मना॥ **7.94.27**॥ 3153

कृतानि गुरुणास्माकमृषिणा चरितं तव।
प्रतिष्ठा जीवितं यावत् तावत् सर्वस्य वर्तते॥ **7.94.28**॥ 3154

यदि बुद्धिः कृता राजञ्छ्रवणाय महारथ।
कर्मान्तरे क्षणीभूतस्तच्छृणुष्व सहानुजः॥ **7.94.29**॥ 3155

बाढमित्यब्रवीद् रामस्तौ चानुज्ञाप्य राघवम्।
प्रहृष्टौ जग्मतुः स्थानं यत्रास्ते मुनिपुङ्गवः॥ **7.94.30**॥ 3156

रामोऽपि मुनिभिः सार्धं पार्थिवैश्च महात्मभिः।
श्रुत्वा तद् गीतिमाधुर्यं कर्मशालामुपागमत्॥ **7.94.31**॥ 3157

शुश्राव तत्तालललयोपपन्नं
सर्गान्वितं सुस्वरशब्दयुक्तम्।
तन्त्रीलयव्यञ्जनयोगयुक्तं
कुशीलवाभ्यां परिगीयमानम्॥ **7.94.32**॥ 3158

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्नवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चनवतितमः सर्गः ॥

स्वीयां शुद्धिं समर्थयितुं सीता शपथं करोत्विति श्रीरामस्य विचारः

रामो बहून्यहान्येव तद् गीतं परमं शुभम्।
शुश्राव मुनिभिः सार्धं पार्थिवैः सह वानरैः॥ **7.95.1** ॥ 3159

तस्मिन् गीते तु विज्ञाय सीतापुत्रौ कुशीलवौ।
तस्याः परिषदो मध्ये रामो वचनमब्रवीत्॥ **7.95.2** ॥ 3160

दूताञ्शुद्धसमाचारानाहूयात्ममनीषया।
मद् वचो ब्रूत गच्छध्वमितो भगवतोऽन्तिके॥ **7.95.3** ॥ 3161

यदि शुद्धसमाचारा यदि वा वीतकल्मषा।
करोत्विहात्मनः शुद्धिमनुमान्य महामुनिम्॥ **7.95.4** ॥ 3162

छन्दं मुनेश्च विज्ञाय सीतायाश्च मनोगतम्।
प्रत्ययं दातुकामायास्ततः शंसत मे लघु॥ **7.95.5** ॥ 3163

श्वः प्रभाते तु शपथं मैथिली जनकात्मजा।
करोतु परिषन्मध्ये शोधनार्थं ममैव च॥ **7.95.6** ॥ 3164

श्रुत्वा तु राघवस्यैतद् वचः परममद्भुतम्।
दूताः सम्प्रययुर्बाढं यत्र वै मुनिपुङ्गवः॥ **7.95.7** ॥ 3165

ते प्रणम्य महात्मानं ज्वलन्तममितप्रभम्।
ऊचुस्ते रामवाक्यानि मृदूनि मधुराणि च॥ **7.95.8**॥ 3166

तेषां तद् भाषितं श्रुत्वा रामस्य च मनोगतम्।
विज्ञाय सुमहातेजा मुनिर्वाक्यमथाब्रवीत्॥ **7.95.9**॥ 3167

एवं भवतु भद्रं वो यथा वदति राघवः।
तथा करिष्यते सीता दैवतं हि पतिः स्त्रियाः॥ **7.95.10**॥ 3168

तथोक्ता मुनिना सर्वे राजदूता महौजसम्।
प्रत्येत्य राघवं सर्वं मुनिवाक्यं बभाषिरे॥ **7.95.11**॥ 3169

ततः प्रहृष्टः काकुत्स्थः श्रुत्वा वाक्यं महात्मनः।
ऋषींस्तत्र समेतांश्च राज्ञश्चैवाभ्यभाषत॥ **7.95.12**॥ 3170

भगवन्तः सशिष्या वै सानुगाश्च नराधिपाः।
पश्यन्तु सीताशपथं यश्चैवान्योऽपि काङ्क्षते॥ **7.95.13**॥ 3171

तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः।
सर्वेषामृषिमुख्यानां साधुवादो महानभूत्॥ **7.95.14**॥ 3172

राजानश्च महात्मानं प्रशंसन्ति स्म राघवम्।
उपपन्नं नरश्रेष्ठ त्वय्येव भुवि नान्यतः॥ **7.95.15**॥ 3173

एवं विनिश्चयं कृत्वा श्वोभूत इति राघवः।
विसर्जयामास तदा सर्वांस्ताञ्छत्रुसूदनः॥ **7.95.16**॥ 3174

इति सम्प्रविचार्य राजसिंहः श्वोभूते शपथस्य निश्चयं वै।
विससर्ज मुनीन् नृपांश्च सर्वान् स महात्मा महतो महानुभावः॥ **7.95.17**॥ 3175

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षण्णनवतितमः सर्गः ॥

वाल्मीकिना सीतायाः शुद्धेः समर्थनम्

तस्यां रजन्यां व्युष्टायां यज्ञवाटं गतो नृपः।
ऋषीन् सर्वान् महातेजाः शब्दापयति राघवः॥ **7.96.1** ॥ 3176

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः।
विश्वामित्रो दीर्घतमा दुर्वासाश्च महातपाः॥ **7.96.2** ॥ 3177

पुलस्त्योऽपि तथा शक्तिर्भार्गवश्चैव वामनः।
मार्कण्डेयश्च दीर्घायुर्मौद्गल्यश्च महायशाः॥ **7.96.3** ॥ 3178

गर्गश्च च्यवनश्चैव शतानन्दश्च धर्मवित्।
भरद्वाजश्च तेजस्वी अग्निपुत्रश्च सुप्रभः॥ **7.96.4** ॥ 3179

नारदः पर्वतश्चैव गौतमश्च महायशाः।
कात्यायनः सुयज्ञश्च ह्यगस्त्यस्तपसां निधिः॥ **7.96.5** ॥ 3180

एते चान्ये च बहवो मुनयः संशितव्रताः।
कौतूहलसमाविष्टाः सर्व एव समागताः॥ **7.96.6** ॥ 3181

राक्षसाश्च महावीर्या वानराश्च महाबलाः।
सर्व एव समाजग्मुर्महात्मानः कुतूहलात्॥ **7.96.7** ॥ 3182

क्षत्रिया ये च शूद्राश्च वैश्याश्चैव सहस्रशः।
नानादेशगताश्चैव ब्राह्मणाः संशितव्रताः॥ **7.96.8**॥ 3183

ज्ञाननिष्ठाः कर्मनिष्ठा योगनिष्ठास्तथापरे।
सीताशपथवीक्षार्थं सर्व एव समागताः॥ **7.96.9**॥ 3184

तदा समागतं सर्वमश्मभूतमिवाचलम्।
श्रुत्वा मुनिवरस्तूर्णं ससीतः समुपागमत्॥ **7.96.10**॥ 3185

तमृषिं पृष्ठतः सीता अन्वगच्छदवाङ्मुखी।
कृताञ्जलिर्बाष्पकला कृत्वा रामं मनोगतम्॥ **7.96.11**॥ 3186

तां दृष्ट्वा श्रुतिमायान्तीं ब्रह्माणमनुगामिनीम्।
वाल्मीकेः पृष्ठतः सीतां साधुवादो महानभूत्॥ **7.96.12**॥ 3187

ततो हलहलाशब्दः सर्वेषामेवमाबभौ।
दुःखजन्मविशालेन शोकेनाकुलितात्मनाम्॥ **7.96.13**॥ 3188

साधु रामेति केचित् तु साधु सीतेति चापरे।
उभावेव च तत्रान्ये प्रेक्षकाः सम्प्रचुक्रुशुः॥ **7.96.14**॥ 3189

ततो मध्ये जनौघस्य प्रविश्य मुनिपुङ्गवः।
सीतासहायो वाल्मीकिरिति होवाच राघवम्॥ **7.96.15**॥ 3190

इयं दाशरथे सीता सुव्रता धर्मचारिणी।
अपवादात् परित्यक्ता ममाश्रमसमीपतः॥ **7.96.16**॥ 3191

लोकापवादभीतस्य तव राम महाव्रत।
प्रत्ययं दास्यते सीता तामनुज्ञातुमर्हसि॥ **7.96.17**॥ 3192

इमौ तु जानकीपुत्रावुभौ च यमजातकौ।
सुतौ तवैव दुर्धर्षौ सत्यमेतद् ब्रवीमि ते॥ **7.96.18**॥ 3193

प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन।
न स्मराम्यनृतं वाक्यमिमौ तु तव पुत्रकौ॥ **7.96.19**॥ 3194

बहुवर्षसहस्राणि तपश्चर्या मया कृता।
नोपाश्नीयां फलं तस्या दुष्टेयं यदि मैथिली॥ **7.96.20**॥ 3195

मनसा कर्मणा वाचा भूतपूर्वं न किल्बिषम्।
तस्याहं फलमश्नामि अपापा मैथिली यदि॥ **7.96.21**॥ 3196

अहं पञ्चसु भूतेषु मनःषष्ठेषु राघव।
विचिन्त्य सीता शुद्धेति जग्राह वननिर्झरे॥ **7.96.22**॥ 3197

इयं शुद्धसमाचारा अपापा पतिदेवता।
लोकापवादभीतस्य प्रत्ययं तव दास्यति॥ **7.96.23**॥ 3198

तस्मादियं नरवरात्मज शुद्धभावा
दिव्येन दृष्टिविषयेण मया प्रविष्टा।
लोकापवादकलुषीकृतचेतसा या
त्यक्ता त्वया प्रियतमा विदितापि शुद्धा॥ **7.96.24**॥ 3199

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षण्णनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तनवतितमः सर्गः ॥

सीताकर्तृकं शपथग्रहणं रसातले प्रवेशनं च

वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत।
प्राञ्जलिर्जगतो मध्ये दृष्ट्वा तां वरवर्णिनीम्॥ **7.97.1** ॥ 3200

एवमेतन्महाभाग यथा वदसि धर्मवित्।
प्रत्ययस्तु मम ब्रह्मंस्तव वाक्यैरकल्मषैः॥ **7.97.2** ॥ 3201

प्रत्ययश्च पुरा वृत्तो वैदेह्याः सुरसन्निधौ।
शपथश्च कृतस्तत्र तेन वेश्म प्रवेशिता॥ **7.97.3** ॥ 3202

लोकापवादो बलवान् येन त्यक्ता हि मैथिली।
सेयं लोकभयाद् ब्रह्मन्नपापेत्यभिजानता।
परित्यक्ता मया सीता तद् भवान् क्षन्तुमर्हति॥ **7.97.4** ॥ 3203

जानामि चेमौ पुत्रौ मे यमजातौ कुशीलवौ।
शुद्धायां जगतो मध्ये मैथिल्यां प्रीतिरस्तु मे॥ **7.97.5** ॥ 3204

अभिप्रायं तु विज्ञाय रामस्य सुरसत्तमाः।
सीतायाः शपथे तस्मिन् महेन्द्राद्या महौजसः॥ **7.97.6** ॥ 3205

पितामहं पुरस्कृत्य सर्व एव समागताः।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः॥ **7.97.7** ॥ 3206

साध्याश्च देवाः सर्वे ते सर्वे च परमर्षयः।
नागाः सुपर्णाः सिद्धाश्च ते सर्वे हृष्टमानसाः॥ **7.97.8**॥ 3207

सीताशपथसम्भ्रान्ताः सर्व एव समागताः।
दृष्ट्वा देवानृषींश्चैव राघवः पुनरब्रवीत्॥ **7.97.9**॥ 3208

प्रत्ययो मे सुरश्रेष्ठ ऋषिवाक्यैरकल्मषैः।
शुद्धायां जगतो मध्ये वैदेह्यां प्रीतिरस्तु मे॥ **7.97.10**॥ 3209

ततो वायुः शुभः पुण्यो दिव्यगन्धो मनोरमः।
तं जनौघं सुरश्रेष्ठो ह्लादयामास सर्वतः॥ **7.97.11**॥ 3210

तदद्भुतमिवाचिन्त्यं निरैक्षन्त समाहिताः।
मानवाः सर्वराष्ट्रेभ्यः पूर्वं कृतयुगे यथा॥ **7.97.12**॥ 3211

सर्वान् समागतान् दृष्ट्वा सीता काषायवासिनी।
अब्रवीत् प्राञ्जलिर्वाक्यमधोदृष्टिरवाङ्मुखी॥ **7.97.13**॥ 3212

यथाहं राघवादन्यं मनसापि न चिन्तये।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.14**॥ 3213

मनसा कर्मणा वाचा यथा रामं समर्चये।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.15**॥ 3214

यथैतत् सत्यमुक्तं मे वेद्मि रामात् परं न च।
तथा मे माधवी देवी विवरं दातुमर्हति॥ **7.97.16**॥ 3215

तथा शपन्त्यां वैदेह्यां प्रादुरासीत् तदद्भुतम्।
भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम्॥ **7.97.17**॥ 3216

ध्रियमाणं शिरोभिस्तु नागैरमितविक्रमैः।
दिव्यं दिव्येन वपुषा दिव्यरत्नविभूषितैः॥ **7.97.18**॥ 3217

तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम्।
स्वागतेनाभिनन्द्यैनामासने चोपवेशयत्॥ **7.97.19**॥ 3218

तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम्।
पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत्॥ **7.97.20**॥ 3219

साधुकारश्च सुमहान् देवानां सहसोत्थितः।
साधुसाध्विति वै सीते यस्यास्ते शीलमीदृशम्॥ **7.97.21**॥ 3220

एवं बहुविधा वाचो ह्यन्तरिक्षगताः सुराः।
व्याजहुर्हृष्टमनसो दृष्ट्वा सीताप्रवेशनम्॥ **7.97.22**॥ 3221

यज्ञवाटगताश्चापि मुनयः सर्व एव ते।
राजानश्च नरव्याघ्रा विस्मयान्नोपरेमिरे॥ **7.97.23**॥ 3222

अन्तरिक्षे च भूमौ च सर्वे स्थावरजङ्गमाः।
दानवाश्च महाकायाः पाताले पन्नगाधिपाः॥ **7.97.24**॥ 3223

केचिद् विनेदुः संहृष्टाः केचिद् ध्यानपरायणाः।
केचिद् रामं निरीक्षन्ते केचित् सीतामचेतसः॥ **7.97.25**॥ 3224

सीताप्रवेशनं दृष्ट्वा तेषामासीत् समागमः।
तन्मुहूर्तमिवात्यर्थं समं सम्मोहितं जगत्॥ **7.97.26**॥ 3225

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टनवतितमः सर्गः ॥

सीतायाः कृते श्रीरामस्य शोकः, ब्रह्मणा तस्य सान्त्वनमुत्तरकाण्डशेषांशं श्रोतुं प्रेरणं च

रसातलं प्रविष्टायां वैदेह्यां सर्ववानराः।
चुक्रुशुः साधुसाध्वीति मुनयो रामसन्निधौ ॥ **7.98.1** ॥ 3226

दण्डकाष्ठमवष्टभ्य बाष्पव्याकुलितेक्षणः।
अवाक्शिरा दीनमना रामो ह्यासीत् सुदुःखितः ॥ **7.98.2** ॥ 3227

स रुदित्वा चिरं कालं बहुशो बाष्पमुत्सृजन्।
क्रोधशोकसमाविष्टो रामो वचनमब्रवीत् ॥ **7.98.3** ॥ 3228

अभूतपूर्वं शोकं मे मनः स्प्रष्टुमिवेच्छति।
पश्यतो मे यथा नष्टा सीता श्रीरिव रूपिणी ॥ **7.98.4** ॥ 3229

सादर्शनं पुरा सीता लङ्कां पारे महोदधेः।
ततश्चापि मयाऽऽनीता किं पुनर्वसुधातलात् ॥ **7.98.5** ॥ 3230

वसुधे देवि भवति सीता निर्यात्यतां मम।
दर्शयिष्यामि वा रोषं यथा मामवगच्छसि ॥ **7.98.6** ॥ 3231

कामं श्वश्रूर्ममैव त्वं त्वत्सकाशात् तु मैथिली।
कर्षता फालहस्तेन जनकेनोद्धृता पुरा ॥ **7.98.7** ॥ 3232

तस्मान्निर्यात्यतां सीता विवरं वा प्रयच्छ मे।
पाताले नाकपृष्ठे वा वसेयं सहितस्तया॥ **7.98.8**॥ 3233

आनय त्वं हि तां सीतां मत्तोऽहं मैथिलीकृते।
न मे दास्यसि चेत् सीतां यथारूपां महीतले॥ **7.98.9**॥ 3234

सपर्वतवनां कृत्स्नां विधमिष्यामि ते स्थितिम्।
नाशयिष्याम्यहं भूमिं सर्वमापो भवन्त्विह॥ **7.98.10**॥ 3235

एवं ब्रुवाणे काकुत्स्थे क्रोधशोकसमन्विते।
ब्रह्मा सुरगणैः सार्धमुवाच रघुनन्दनम्॥ **7.98.11**॥ 3236

राम राम न सन्तापं कर्तुमर्हसि सुव्रत।
स्मर त्वं पूर्वकं भावं मन्त्रं चामित्रकर्शन॥ **7.98.12**॥ 3237

न खलु त्वां महाबाहो स्मारयेयमनुत्तमम्।
इमं मुहूर्तं दुर्धर्ष स्मर त्वं जन्म वैष्णवम्॥ **7.98.13**॥ 3238

सीता हि विमला साध्वी तव पूर्वपरायणा।
नागलोकं सुखं प्रायात् त्वदाश्रयतपोबलात्॥ **7.98.14**॥ 3239

स्वर्गे ते सङ्गमो भूयो भविष्यति न संशयः।
अस्यास्तु परिषन्मध्ये यद् ब्रवीमि निबोध तत्॥ **7.98.15**॥ 3240

एतदेव हि काव्यं ते काव्यानामुत्तमं श्रुतम्।
सर्वं विस्तरतो राम व्याख्यास्यति न संशयः॥ **7.98.16**॥ 3241

जन्मप्रभृति ते वीर सुखदुःखोपसेवनम्।
भविष्यदुत्तरं चेह सर्वं वाल्मीकिना कृतम्॥ **7.98.17**॥ 3242

आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम्।
नह्यन्योऽर्हति काव्यानां यशोभाग् राघवादृते॥ **7.98.18**॥ 3243

श्रुतं ते पूर्वमेतद्धि मया सर्वं सुरैः सह।
दिव्यमद्भुतरूपं च सत्यवाक्यमनावृतम्॥ **7.98.19**॥ 3244

स त्वं पुरुषशार्दूल धर्मेण सुसमाहितः।
शेषं भविष्यं काकुत्स्थ काव्यं रामायणं शृणु॥ **7.98.20**॥ 3245

उत्तरं नाम काव्यस्य शेषमत्र महायशः।
तच्छृणुष्व महातेज ऋषिभिः सार्धमुत्तमम्॥ **7.98.21**॥ 3246

न खल्वन्येन काकुत्स्थ श्रोतव्यमिदमुत्तमम्।
परमम् ऋषिणा वीर त्वयैव रघुनन्दन॥ **7.98.22**॥ 3247

एतावदुक्त्वा वचनं ब्रह्मा त्रिभुवनेश्वरः।
जगाम त्रिदिवं देवो देवैः सह सबान्धवैः॥ **7.98.23**॥ 3248

ये च तत्र महात्मान ऋषयो ब्राह्मलौकिकाः।
ब्रह्मणा समनुज्ञाता न्यवर्तन्त महौजसः॥ **7.98.24**॥ 3249

उत्तरं श्रोतुमनसो भविष्यं यच्च राघवे।
ततो रामः शुभां वाणी देवदेवस्य भाषिताम्॥ **7.98.25**॥ 3250

श्रुत्वा परमतेजस्वी वाल्मीकिमिदमब्रवीत्।
भगवञ्श्रोतुमनस ऋषयो ब्राह्मलौकिकाः॥ **7.98.26**॥ 3251

भविष्यदुत्तरं यन्मे श्वोभूते सम्प्रवर्तताम्।
एवं विनिश्चयं कृत्वा सम्प्रगृह्य कुशीलवौ॥ **7.98.27**॥ 3252

तं जनौघं विसृज्याथ पर्णशालामुपागमत्।
तामेव शोचतः सीतां सा व्यतीता च शर्वरी॥ **7.98.28**॥ 3253

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवनवतितमः सर्गः ॥

सीताया रसातलप्रवेशमनु श्रीरामस्य जीवनचर्या श्रीरामराज्यस्य स्थितिः श्रीराममातॄणां परलोकगमनादेर्वर्णनं च

रजन्यां तु प्रभातायां समानीय महामुनीन्।
गीयतामविशङ्काभ्यां रामः पुत्रावुवाच ह॥ **7.99.1** ॥ 3254

ततः समुपविष्टेषु महर्षिषु महात्मसु।
भविष्यदुत्तरं काव्यं जगतुस्तौ कुशीलवौ॥ **7.99.2** ॥ 3255

प्रविष्टायां तु सीतायां भूतलं सत्यसम्पदा।
तस्यावसाने यज्ञस्य रामः परमदुर्मनाः॥ **7.99.3** ॥ 3256

अपश्यमानो वैदेहीं मेने शून्यमिदं जगत्।
शोकेन परमायस्तो न शान्तिं मनसागमत्॥ **7.99.4** ॥ 3257

विसृज्य पार्थिवान् सर्वानृक्षवानरराक्षसान्।
जनौघं विप्रमुख्यानां वित्तपूर्वं विसृज्य च॥ **7.99.5** ॥ 3258

एवं समाप्य यज्ञं तु विधिवत् स तु राघवः।
ततो विसृज्य तान् सर्वान् रामो राजीवलोचनः॥ **7.99.6** ॥ 3259

हृदि कृत्वा तदा सीतामयोध्यां प्रविवेश ह।
इष्टयज्ञो नरपतिः पुत्रद्वयसमन्वितः॥ **7.99.7** ॥ 3260

न सीतायाः परां भार्यां वव्रे स रघुनन्दनः।
यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनीभवत्॥ **7.99.8**॥ 3261

दशवर्षसहस्राणि वाजिमेधानथाकरोत्।
वाजपेयान् दशगुणांस्तथा बहुसुवर्णकान्॥ **7.99.9**॥ 3262

अग्निष्टोमातिरात्राभ्यां गोसवैश्च महाधनैः।
ईजे क्रतुभिरन्यैश्च स श्रीमानाप्तदक्षिणैः॥ **7.99.10**॥ 3263

एवं स कालः सुमहान् राज्यस्थस्य महात्मनः।
धर्मे प्रयतमानस्य व्यतीयाद् राघवस्य च॥ **7.99.11**॥ 3264

ऋक्षवानररक्षांसि स्थिता रामस्य शासने।
अनुरञ्जन्ति राजानो ह्यहन्यहनि राघवम्॥ **7.99.12**॥ 3265

काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः।
हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा॥ **7.99.13**॥ 3266

नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।
नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति॥ **7.99.14**॥ 3267

अथ दीर्घस्य कालस्य राममाता यशस्विनी।
पुत्रपौत्रैः परिवृता कालधर्ममुपागमत्॥ **7.99.15**॥ 3268

अन्वियाय सुमित्रा च कैकेयी च यशस्विनी।
धर्मं कृत्वा बहुविधं त्रिदिवे पर्यवस्थिता॥ **7.99.16**॥ 3269

सर्वाः प्रमुदिताः स्वर्गे राज्ञा दशरथेन च।
समागता महाभागाः सर्वधर्मं च लेभिरे॥ **7.99.17**॥ 3270

तासां रामो महादानं काले काले प्रयच्छति।
मातृणामविशेषेण ब्राह्मणेषु तपस्विषु॥ **7.99.18**॥ 3271

पित्र्याणि ब्रह्मरत्नानि यज्ञान् परमदुस्तरान्।
चकार रामो धर्मात्मा पितॄन् देवान् विवर्धयन्॥ 7.99.19॥ 3272

एवं वर्षसहस्राणि बहून्यथ ययुः सुखम्।
यज्ञैर्बहुविधं धर्मं वर्धयानस्य सर्वदा॥ 7.99.20॥ 3273

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ शततमः सर्गः ॥

केकयदेशादुपायनमादाय गार्ग्यस्य गमनं तत्प्रत्तं सन्देशमनुसृत्य श्रीरामस्यादेशेन कुमारद्वयसहितस्य भरतस्य गन्धर्वदेशोपर्याक्रमणं कर्तुं प्रस्थानं च

कस्यचित् त्वथ कालस्य युधाजित् केकयो नृपः।
स्वगुरुं प्रेषयामास राघवाय महात्मने॥ **7.100.1**॥ 3274

गार्ग्यमङ्गिरसः पुत्रं ब्रह्मर्षिममितप्रभम्।
दश चाश्वसहस्राणि प्रीतिदानमनुत्तमम्॥ **7.100.2**॥ 3275

कम्बलानि च रत्नानि चित्रवस्त्रमथोत्तमम्।
रामाय प्रददौ राजा शुभान्याभरणानि च॥ **7.100.3**॥ 3276

श्रुत्वा तु राघवो धीमान् महर्षिं गार्ग्यमागतम्।
मातुलस्याश्वपतिनः प्रहितं तन्महाधनम्॥ **7.100.4**॥ 3277

प्रत्युद्गम्य च काकुत्स्थः क्रोशमात्रं सहानुजः।
गार्ग्यं सम्पूजयामास यथा शक्रो बृहस्पतिम्॥ **7.100.5**॥ 3278

तथा सम्पूज्य तमृषिं तद् धनं प्रतिगृह्य च।
पृष्ट्वा प्रतिपदं सर्वं कुशलं मातुलस्य च॥ **7.100.6**॥ 3279

उपविष्टं महाभागं रामः प्रष्टुं प्रचक्रमे।
किमाह मातुलो वाक्यं यदर्थं भगवानिह॥ **7.100.7**॥ 3280

प्राप्तो वाक्यविदां श्रेष्ठः साक्षादिव बृहस्पतिः।
रामस्य भाषितं श्रुत्वा महर्षिः कार्यविस्तरम्॥ **7.100.8**॥ 3281

वक्तुमद्भुतसङ्काशं राघवायोपचक्रमे।
मातुलस्ते महाबाहो वाक्यमाह नरर्षभः॥ **7.100.9**॥ 3282

युधाजित् प्रीतिसंयुक्तं श्रूयतां यदि रोचते।
अयं गन्धर्वविषयः फलमूलोपशोभितः॥ **7.100.10**॥ 3283

सिन्धोरुभयतः पार्श्वे देशः परमशोभनः।
तं च रक्षन्ति गन्धर्वाः सायुधा युद्धकोविदाः॥ **7.100.11**॥ 3284

शैलूषस्य सुता वीर तिस्रः कोट्यो महाबलाः।
तान् विनिर्जित्य काकुत्स्थ गन्धर्वनगरं शुभम्॥ **7.100.12**॥ 3285

निवेशय महाबाहो स्वे पुरे सुसमाहिते।
अन्यस्य न गतिस्तत्र देशः परमशोभनः।
रोचतां ते महाबाहो नाहं त्वामहितं वदे॥ **7.100.13**॥ 3286

तच्छ्रुत्वा राघवः प्रीतो महर्षेर्मातुलस्य च।
उवाच बाढमित्येव भरतं चान्ववैक्षत॥ **7.100.14**॥ 3287

सोऽब्रवीद् राघवः प्रीतः साञ्जलिप्रग्रहो द्विजम्।
इमौ कुमारौ तं देशं ब्रह्मर्षे विचरिष्यतः॥ **7.100.15**॥ 3288

भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च।
मातुलेन सुगुप्तौ तु धर्मेण सुसमाहितौ॥ **7.100.16**॥ 3289

भरतं चाग्रतः कृत्वा कुमारौ सबलानुगौ।
निहत्य गन्धर्वसुतान् द्वे पुरे विभजिष्यतः॥ **7.100.17**॥ 3290

निवेश्य ते पुरवरे आत्मजौ सन्निवेश्य च।
आगमिष्यति मे भूयः सकाशमतिधार्मिकः॥ **7.100.18**॥ 3291

ब्रह्मर्षिमेवमुक्त्वा तु भरतं सबलानुगम्।
आज्ञापयामास तदा कुमारौ चाभ्यषेचयत्॥ **7.100.19**॥ 3292

नक्षत्रेण च सौम्येन पुरस्कृत्याङ्गिरःसुतम्।
भरतः सह सैन्येन कुमाराभ्यां विनिर्ययौ॥ **7.100.20**॥ 3293

सा सेना शक्रयुक्तेव नगरान्निर्ययावथ।
राघवानुगता दूरं दुराधर्षा सुरैरपि॥ **7.100.21**॥ 3294

मांसाशिनश्च ये सत्त्वा रक्षांसि सुमहान्ति च।
अनुजग्मुर्हि भरतं रुधिरस्य पिपासया॥ **7.100.22**॥ 3295

भूतग्रामाश्च बहवो मांसभक्षाः सुदारुणाः।
गन्धर्वपुत्रमांसानि भोक्तुकामाः सहस्रशः॥ **7.100.23**॥ 3296

सिंहव्याघ्रवराहाणां खेचराणां च पक्षिणाम्।
बहूनि वै सहस्राणि सेनाया ययुरग्रतः॥ **7.100.24**॥ 3297

अध्यर्धमासमुषिता पथि सेना निरामया।
हृष्टपुष्टजनाकीर्णा केकयं समुपागमत्॥ **7.100.25**॥ 3298

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे शततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकाधिकशततमः सर्गः ॥

गन्धर्वानाक्रम्य संहृत्य च तत्र द्वे नगरे निवेश्य द्वाभ्यां पुत्राभ्यां समर्प्य भरतस्य पुनरयोध्यायां निवृत्तिः

श्रुत्वा सेनापतिं प्राप्तं भरतं केकयाधिपः।
युधाजिद् गार्ग्यसहितं परां प्रीतिमुपागमत्॥ **7.101.1**॥ 3299

स निर्ययौ जनौघेन महता केकयाधिपः।
त्वरमाणोऽभिचक्राम गन्धर्वान् कामरूपिणः॥ **7.101.2**॥ 3300

भरतश्च युधाजिच्च समेतौ लघुविक्रमैः।
गन्धर्वनगरं प्राप्तौ सबलौ सपदानुगौ॥ **7.101.3**॥ 3301

श्रुत्वा तु भरतं प्राप्तं गन्धर्वास्ते समागताः।
योद्धुकामा महावीर्या व्यनदंस्ते समन्ततः॥ **7.101.4**॥ 3302

ततः समभवद्युद्धं तुमुलं लोमहर्षणम्।
सप्तरात्रं महाभीमं न चान्यतरयोर्जयः॥ **7.101.5**॥ 3303

खड्गशक्तिधनुर्ग्राहा नद्यः शोणितसंस्रवाः।
नृकलेवरवाहिन्यः प्रवृत्ताः सर्वतोदिशम्॥ **7.101.6**॥ 3304

ततो रामानुजः क्रुद्धः कालस्यास्त्रं सुदारुणम्।
संवर्तं नाम भरतो गन्धर्वेष्वभ्यचोदयत्॥ **7.101.7**॥ 3305

ते बद्धाः कालपाशेन संवर्तेन विदारिताः।
क्षणेनाभिहतास्तेन तिस्रः कोट्यो महात्मना॥ **7.101.8**॥ 3306

तद् युद्धं तादृशं घोरं न स्मरन्ति दिवौकसः।
निमेषान्तरमात्रेण तादृशानां महात्मनाम्॥ **7.101.9**॥ 3307

हतेषु तेषु सर्वेषु भरतः केकयीसुतः।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे॥ **7.101.10**॥ 3308

तक्षं तक्षशिलायां तु पुष्कलं पुष्कलावते।
गन्धर्वदेशे रुचिरे गान्धारविषये च सः॥ **7.101.11**॥ 3309

धनरत्नौघसङ्कीर्णे काननैरुपशोभिते।
अन्योन्यसङ्घर्षकृते स्पर्धया गुणविस्तरैः॥ **7.101.12**॥ 3310

उभे सुरुचिरप्रख्ये व्यवहारैरकिल्बिषैः।
उद्यानयानसम्पूर्णे सुविभक्तान्तरापणे॥ **7.101.13**॥ 3311

उभे पुरवरे रम्ये विस्तरैरुपशोभिते।
गृहमुख्यैः सुरुचिरैर्विमानैर्बहुभिर्वृते॥ **7.101.14**॥ 3312

शोभिते शोभनीयैश्च देवायतनविस्तरैः।
तालैस्तमालैस्तिलकैर्बकुलैरुपशोभिते॥ **7.101.15**॥ 3313

निवेश्य पञ्चभिर्वर्षैर्भरतो राघवानुजः।
पुनरायान्महाबाहुरयोध्यां केकयीसुतः॥ **7.101.16**॥ 3314

सोऽभिवाद्य महात्मानं साक्षाद्धर्ममिवापरम्।
राघवं भरतः श्रीमान् ब्रह्माणमिव वासवः॥ **7.101.17**॥ 3315

शशंस च यथावृत्तं गन्धर्ववधमुत्तमम्।
निवेशनं च देशस्य श्रुत्वा प्रीतोऽस्य राघवः॥ 7.101.18॥ 3316

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्व्यधिकशततमः सर्गः ॥

श्रीरामस्याज्ञया भरतलक्ष्मणाभ्यां कारुपथदेशे पृथक् पृथग्राज्येऽङ्गदचन्द्रकेत्वोर्नियोजनम्

तच्छ्रुत्वा हर्षमापेदे राघवो भ्रातृभिः सह।
वाक्यं चाद्भुतसङ्काशं भ्रातॄन् प्रोवाच राघवः॥ **7.102.1** ॥ 3317

इमौ कुमारौ सौमित्रे तव धर्मविशारदौ।
अङ्गदश्चन्द्रकेतुश्च राज्यार्थे दृढविक्रमौ॥ **7.102.2** ॥ 3318

इमौ राज्येऽभिषेक्ष्यामि देशः साधु विधीयताम्।
रमणीयो ह्यसम्बाधो रमेतां यत्र धन्विनौ॥ **7.102.3** ॥ 3319

न राज्ञां यत्र पीडा स्यान्नाश्रमाणां विनाशनम्।
स देशो दृश्यतां सौम्य नापराध्यामहे यथा॥ **7.102.4** ॥ 3320

तथोक्तवति रामे तु भरतः प्रत्युवाच ह।
अयं कारुपथो देशो रमणीयो निरामयः॥ **7.102.5** ॥ 3321

निवेश्यतां तत्र पुरमङ्गदस्य महात्मनः।
चन्द्रकेतोः सुरुचिरं चन्द्रकान्तं निरामयम्॥ **7.102.6** ॥ 3322

तद् वाक्यं भरतेनोक्तं प्रतिजग्राह राघवः।
तं च कृत्वा वशे देशमङ्गदस्य न्यवेशयत्॥ **7.102.7** ॥ 3323

अङ्गदीया पुरी रम्याप्यङ्गदस्य निवेशिता।
रमणीया सुगुप्ता च रामेणाक्लिष्टकर्मणा॥ **7.102.8**॥ 3324

चन्द्रकेतोश्च मल्लस्य मल्लभूम्यां निवेशिता।
चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा॥ **7.102.9**॥ 3325

ततो रामः परां प्रीतिं लक्ष्मणो भरतस्तथा।
ययुर्युद्धे दुराधर्षा अभिषेकं च चक्रिरे॥ **7.102.10**॥ 3326

अभिषिच्य कुमारौ द्वौ प्रस्थाप्य सुसमाहितौ।
अङ्गदं पश्चिमां भूमिं चन्द्रकेतुमुदङ्मुखम्॥ **7.102.11**॥ 3327

अङ्गदं चापि सौमित्रिर्लक्ष्मणोऽनुजगाम ह।
चन्द्रकेतोस्तु भरतः पार्षिग्राहो बभूव ह॥ **7.102.12**॥ 3328

लक्ष्मणस्त्वङ्गदीयायां संवत्सरमथोषितः।
पुत्रे स्थिते दुराधर्षे अयोध्यां पुनरागमत्॥ **7.102.13**॥ 3329

भरतोऽपि तथैवोष्य संवत्सरमतोऽधिकम्।
अयोध्यां पुनरागम्य रामपादावुपास्त सः॥ **7.102.14**॥ 3330

उभौ सौमित्रिभरतौ रामपादावनुव्रतौ।
कालं गतमपि स्नेहान्न जज्ञातेऽतिधार्मिकौ॥ **7.102.15**॥ 3331

एवं वर्षसहस्राणि दश तेषां ययुस्तदा।
धर्मे प्रयतमानानां पौरकार्येषु नित्यदा॥ **7.102.16**॥ 3332

विहृत्य कालं परिपूर्णमानसाः श्रिया वृता धर्मपुरे च संस्थिताः।
त्रयः समिद्धाहुतिदीप्ततेजसो हुताग्नयः साधुमहाध्वरे त्रयः॥ **7.102.17**॥ 3333

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्व्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्र्यधिकशततमः सर्गः ॥

श्रीरामपार्श्वे कालस्यागमनं समयं कृत्वा तेन सह तस्य वार्तालापायोद्यमः

कस्यचित् त्वथ कालस्य रामे धर्मपरे स्थिते।
कालस्तापसरूपेण राजद्वारमुपागमत्॥ **7.103.1** ॥ 3334

सोऽब्रवील्लक्ष्मणं वाक्यं धृतिमन्तं यशस्विनम्।
मां निवेदय रामाय सम्प्राप्तं कार्यगौरवात्॥ **7.103.2** ॥ 3335

दूतो ह्यतिबलस्याहं महर्षेरमितौजसः।
रामं दिदृक्षुरायातः कार्येण हि महाबल॥ **7.103.3** ॥ 3336

तस्य तद् वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः।
न्यवेदयत रामाय तापसं तं समागतम्॥ **7.103.4** ॥ 3337

जयस्व राजधर्मेण उभौ लोकौ महाद्युते।
दूतस्त्वां द्रष्टुमायातस्तपसा भास्करप्रभः॥ **7.103.5** ॥ 3338

तद् वाक्यं लक्ष्मणोक्तं वै श्रुत्वा राम उवाच ह।
प्रवेश्यतां मुनिस्तात महौजास्तस्य वाक्यधृक्॥ **7.103.6** ॥ 3339

सौमित्रिस्तु तथेत्युक्त्वा प्रावेशयत तं मुनिम्।
ज्वलन्तमेव तेजोभिः प्रदहन्तमिवांशुभिः॥ **7.103.7** ॥ 3340

सोऽभिगम्य रघुश्रेष्ठं दीप्यमानं स्वतेजसा।
ऋषिर्मधुरया वाचा वर्धस्वेत्याह राघवम्॥ **7.103.8**॥ 3341

तस्मै रामो महातेजाः पूजामर्घ्यपुरोगमाम्।
ददौ कुशलमव्यग्रं प्रष्टुं चैवोपचक्रमे॥ **7.103.9**॥ 3342

पृष्टश्च कुशलं तेन रामेण वदतां वरः।
आसने काञ्चने दिव्ये निषसाद महायशाः॥ **7.103.10**॥ 3343

तमुवाच ततो रामः स्वागतं ते महामते।
प्रापयास्य च वाक्यानि यतो दूतस्त्वमागतः॥ **7.103.11**॥ 3344

चोदितो राजसिंहेन मुनिर्वाक्यमभाषत।
द्वन्द्वे ह्येतत् प्रवक्तव्यं हितं वै यद्यवेक्षसे॥ **7.103.12**॥ 3345

यः शृणोति निरीक्षेद् वा स वध्यो भविता तव।
भवेद् वै मुनिमुख्यस्य वचनं यद्यवेक्षसे॥ **7.103.13**॥ 3346

तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत्।
द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय॥ **7.103.14**॥ 3347

स मे वध्यः खलु भवेद् वाचं द्वन्द्वसमीरिताम्।
ऋषेर्मम च सौमित्रे पश्येद् वा शृणुयाच्च यः॥ **7.103.15**॥ 3348

ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारि सङ्ग्रहम्।
तमुवाच मुने वाक्यं कथयस्वेति राघवः॥ **7.103.16**॥ 3349

तत् ते मनीषितं वाक्यं येन वासि समाहितः।
कथयस्वाविशङ्कस्त्वं ममापि हृदि वर्तते॥ **7.103.17**॥ 3350

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्र्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुरधिकशततमः सर्गः ॥

श्रीरामं प्रति कालेन ब्रह्मणः सन्देशस्य कथनं श्रीरामेण तस्याङ्गीकरणं च

शृणु राजन् महासत्त्व यदर्थमहमागतः।
पितामहेन देवेन प्रेषितोऽस्मि महाबल॥ **7.104.1** ॥ 3351

तवाहं पूर्वके भावे पुत्रः परपुरञ्जय।
मायासम्भावितो वीर कालः सर्वसमाहरः॥ **7.104.2** ॥ 3352

पितामहश्च भगवानाह लोकपतिः प्रभुः।
समयस्ते कृतः सौम्य लोकान् सम्परिरक्षितुम्॥ **7.104.3** ॥ 3353

सङ्क्षिप्य हि पुरा लोकान् मायया स्वयमेव हि।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः॥ **7.104.4** ॥ 3354

भोगवन्तं ततो नागमनन्तमुदकेशयम्।
मायया जनयित्वा त्वं द्वौ च सत्त्वौ महाबलौ॥ **7.104.5** ॥ 3355

मधुं च कैटभं चैव ययोरस्थिचयैर्वृता।
इयं पर्वतसम्बाधा मेदिनी चाभवत् तदा॥ **7.104.6** ॥ 3356

पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्य मामपि।
प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम्॥ **7.104.7** ॥ 3357

सोऽहं सन्न्यस्तभारो हि त्वामुपासे जगत्पतिम्।
रक्षां विधत्स्व भूतेषु मम तेजस्करो भवान्॥ **7.104.8**॥ 3358

ततस्त्वमसि दुर्धर्षात् तस्माद् भावात् सनातनात्।
रक्षां विधास्यन् भूतानां विष्णुत्वमुपजग्मिवान्॥ **7.104.9**॥ 3359

अदित्यां वीर्यवान् पुत्रो भ्रातृणां वीर्यवर्धनः।
समुत्पन्नेषु कृत्येषु तेषां साह्याय कल्पसे॥ **7.104.10**॥ 3360

स त्वमुज्जास्यमानासु प्रजासु जगतां वर।
रावणस्य वधाकाङ्क्षी मानुषेषु मनोऽदधाः॥ **7.104.11**॥ 3361

दशवर्षसहस्राणि दशवर्षशतानि च।
कृत्वा वासस्य नियमं स्वयमेवात्मना पुरा॥ **7.104.12**॥ 3362

स त्वं मनोमयः पुत्रः पूर्णायुर्मानुषेष्विह।
कालोऽयं ते नरश्रेष्ठ समीपमुपवर्तितुम्॥ **7.104.13**॥ 3363

यदि भूयो महाराज प्रजा इच्छस्युपासितुम्।
वस वा वीर भद्रं ते एवमाह पितामहः॥ **7.104.14**॥ 3364

अथ वा विजिगीषा ते सुरलोकाय राघव।
सनाथा विष्णुना देवा भवन्तु विगतज्वराः॥ **7.104.15**॥ 3365

श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितम्।
राघवः प्रहसन् वाक्यं सर्वसंहारमब्रवीत्॥ **7.104.16**॥ 3366

श्रुत्वा मे देवदेवस्य वाक्यं परममद्भुतम्।
प्रीतिर्हि महती जाता तवागमनसम्भवा॥ **7.104.17**॥ 3367

त्रयाणामपि लोकानां कार्यार्थं मम सम्भवः।
भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः॥ **7.104.18**॥ 3368

हृद्गतो ह्यसि सम्प्राप्तो न मे तत्र विचारणा।
मया हि सर्वकृत्येषु देवानां वशवर्तिना।
स्थातव्यं सर्वसंहार यथा ह्याह पितामहः॥ **7.104.19**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुरधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाधिकशततमः सर्गः ॥

दुर्वाससः शापभयाल्लक्ष्मणस्य नियमभङ्गपूर्वकं श्रीरामपार्श्वे तदागमनं सूचयितुं गमनं श्रीरामेण दुर्वाससे भोजनदानं तस्मिन् गते तस्य मनसि लक्ष्मणविषयिणी चिन्ता

तथा तयोः संवदतोर्दुर्वासा भगवानृषिः।
रामस्य दर्शनाकाङ्क्षी राजद्वारमुपागमत्॥ **7.105.1**॥ 3370

सोऽभिगम्य तु सौमित्रिमुवाच ऋषिसत्तमः।
रामं दर्शय मे शीघ्रं पुरा मेऽर्थोऽतिवर्तते॥ **7.105.2**॥ 3371

मुनेस्तु भाषितं श्रुत्वा लक्ष्मणः परवीरहा।
अभिवाद्य महात्मानं वाक्यमेतदुवाच ह॥ **7.105.3**॥ 3372

किं कार्यं ब्रूहि भगवन् को ह्यर्थः किं करोम्यहम्।
व्यग्रो हि राघवो ब्रह्मन् मुहूर्तं परिपाल्यताम्॥ **7.105.4**॥ 3373

तच्छ्रुत्वा ऋषिशार्दूलः क्रोधेन कलुषीकृतः।
उवाच लक्ष्मणं वाक्यं निर्दहन्निव चक्षुषा॥ **7.105.5**॥ 3374

अस्मिन् क्षणे मां सौमित्रे रामाय प्रतिवेदय।
अस्मिन् क्षणे मां सौमित्रे न निवेदयसे यदि।
विषयं त्वां पुरं चैव शपिष्ये राघवं तथा॥ **7.105.6**॥ 3375

भरतं चैव सौमित्रे युष्माकं या च सन्ततिः।
न हि शक्ष्याम्यहं भूयो मन्युं धारयितुं हृदि॥ **7.105.7**॥ 3376

तच्छ्रुत्वा घोरसङ्काशं वाक्यं तस्य महात्मनः।
चिन्तयामास मनसा तस्य वाक्यस्य निश्चयम्॥ **7.105.8**॥ 3377

एकस्य मरणं मेऽस्तु मा भूत् सर्वविनाशनम्।
इति बुद्ध्या विनिश्चित्य राघवाय न्यवेदयत्॥ **7.105.9**॥ 3378

लक्ष्मणस्य वचः श्रुत्वा रामः कालं विसृज्य च।
निःसृत्य त्वरितो राजा अत्रेः पुत्रं ददर्श ह॥ **7.105.10**॥ 3379

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा।
किं कार्यमिति काकुत्स्थः कृताञ्जलिरभाषत॥ **7.105.11**॥ 3380

तद् वाक्यं राघवेणोक्तं श्रुत्वा मुनिवरः प्रभुः।
प्रत्याह रामं दुर्वासाः श्रूयतां धर्मवत्सल॥ **7.105.12**॥ 3381

अद्य वर्षसहस्रस्य समाप्तिर्मम राघव।
सोऽहं भोजनमिच्छामि यथासिद्धं तवानघ॥ **7.105.13**॥ 3382

तच्छ्रुत्वा वचनं राजा राघवः प्रीतमानसः।
भोजनं मुनिमुख्याय यथासिद्धमुपाहरत्॥ **7.105.14**॥ 3383

स तु भुक्त्वा मुनिश्रेष्ठस्तदन्नममृतोपमम्।
साधु रामेति सम्भाष्य स्वमाश्रममुपागमत्॥ **7.105.15**॥ 3384

तस्मिन् गते मुनिवरे स्वाश्रमं लक्ष्मणाग्रजः।
संस्मृत्य कालवाक्यानि ततो दुःखमुपागमत्॥ **7.105.16**॥ 3385

दुःखेन च सुसन्तप्तः स्मृत्वा तद्घोरदर्शनम्।
अवाङ्मुखो दीनमना व्याहर्तुं न शशाक ह॥ **7.105.17**॥ 3386

ततो बुद्ध्या विनिश्चित्य कालवाक्यानि राघवः।
नैतदस्तीति निश्चित्य तूष्णीमासीन्महायशाः॥ **7.105.18**॥ 3387

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षडधिकशततमः सर्गः ॥

श्रीरामेण परित्यक्तस्य लक्ष्मणस्य सशरीरं स्वर्गे गमनम्

अवाङ्मुखमथो दीनं दृष्ट्वा सोममिवाप्लुतम्।
राघवं लक्ष्मणो वाक्यं हृष्टो मधुरमब्रवीत्॥ **7.106.1** ॥ 3388

न सन्तापं महाबाहो मदर्थं कर्तुमर्हसि।
पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशी॥ **7.106.2** ॥ 3389

जहि मां सौम्य विस्रब्धं प्रतिज्ञां परिपालय।
हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नराः॥ **7.106.3** ॥ 3390

यदि प्रीतिर्महाराज यद्यनुग्राह्यता मयि।
जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव॥ **7.106.4** ॥ 3391

लक्ष्मणेन तथोक्तस्तु रामः प्रचलितेन्द्रियः।
मन्त्रिणः समुपानीय तथैव च पुरोधसम्॥ **7.106.5** ॥ 3392

अब्रवीच्च तदा वृत्तं तेषां मध्ये स राघवः।
दुर्वासोऽभिगमं चैव प्रतिज्ञां तापसस्य च॥ **7.106.6** ॥ 3393

तच्छ्रुत्वा मन्त्रिणः सर्वे सोपाध्यायाः समासत।
वसिष्ठस्तु महातेजा वाक्यमेतदुवाच ह॥ **7.106.7** ॥ 3394

दृष्टमेतन्महाबाहो क्षयं ते रोमहर्षणम्।
लक्ष्मणेन वियोगश्च तव राम महायशः॥ **7.106.8**॥ 3395

त्यजैनं बलवान् कालो मा प्रतिज्ञां वृथा कृथाः।
प्रतिज्ञायां हि नष्टायां धर्मो हि विलयं व्रजेत्॥ **7.106.9**॥ 3396

ततो धर्मे विनष्टे तु त्रैलोक्यं सचराचरम्।
सदेवर्षिगणं सर्वं विनश्येत् तु न संशयः॥ **7.106.10**॥ 3397

स त्वं पुरुषशार्दूल त्रैलोक्यस्याभिपालनात्।
लक्ष्मणेन विना चाद्य जगत् स्वस्थं कुरुष्व ह॥ **7.106.11**॥ 3398

तेषां तत् समवेतानां वाक्यं धर्मार्थसंहितम्।
श्रुत्वा परिषदो मध्ये रामो लक्ष्मणमब्रवीत्॥ **7.106.12**॥ 3399

विसर्जये त्वां सौमित्रे मा भूद् धर्मविपर्ययः।
त्यागो वधो वा विहितः साधूनां ह्युभयं समम्॥ **7.106.13**॥ 3400

रामेण भाषिते वाक्ये बाष्पव्याकुलितेन्द्रियः।
लक्ष्मणस्त्वरितं प्रायात् स्वगृहं न विवेश ह॥ **7.106.14**॥ 3401

स गत्वा सरयूतीरमुपस्पृश्य कृताञ्जलिः।
निगृह्य सर्वस्रोतांसि निःश्वासं न मुमोच ह॥ **7.106.15**॥ 3402

अनिःश्वसन्तं युक्तं तं सशक्राः साप्सरोगणाः।
देवाः सर्षिगणाः सर्वे पुष्पैरभ्यकिरंस्तदा॥ **7.106.16**॥ 3403

अदृश्यं सर्वमनुजैः सशरीरं महाबलम्।
प्रगृह्य लक्ष्मणं शक्रस्त्रिदिवं संविवेश ह॥ **7.106.17**॥ 3404

ततो विष्णोश्चतुर्भागमागतं सुरसत्तमाः।
हृष्टाः प्रमुदिताः सर्वे पूजयन्ति स्म राघवम्॥ **7.106.18**॥ 3405

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षडधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ताधिकशततमः सर्गः ॥

वसिष्ठस्याज्ञया पौरानात्मना सह परमधाम नेतुं श्रीरामस्य विचारः कुशस्य लवस्य च तेन राज्येऽभिषेचनम्

विसृज्य लक्ष्मणं रामो दुःखशोकसमन्वितः।
पुरोधसं मन्त्रिणश्च नैगमांश्चेदमब्रवीत्॥ **7.107.1**॥ 3406

अद्य राज्येऽभिषेक्ष्यामि भरतं धर्मवत्सलम्।
अयोध्यायाः पतिं वीरं ततो यास्याम्यहं वनम्॥ **7.107.2**॥ 3407

प्रवेशयत सम्भारान् मा भूत् कालात्ययो यथा।
अद्यैवाहं गमिष्यामि लक्ष्मणेन गतां गतिम्॥ **7.107.3**॥ 3408

तच्छ्रुत्वा राघवेणोक्तं सर्वाः प्रकृतयो भृशम्।
मूर्धभिः प्रणता भूमौ गतसत्त्वा इवाभवन्॥ **7.107.4**॥ 3409

भरतश्च विसंज्ञोऽभूच्छ्रुत्वा राघवभाषितम्।
राज्यं विगर्हयामास वचनं चेदमब्रवीत्॥ **7.107.5**॥ 3410

सत्येनाहं शपे राजन् स्वर्गभोगेन चैव हि।
न कामये यथा राज्यं त्वां विना रघुनन्दन॥ **7.107.6**॥ 3411

इमौ कुशीलवौ राजन्नभिषिच्य नराधिप।
कोशलेषु कुशं वीरमुत्तरेषु तथा लवम्॥ **7.107.7**॥ 3412

शत्रुघ्नस्य च गच्छन्तु दूतास्त्वरितविक्रमाः।
इदं गमनमस्माकं शीघ्रमाख्यातु मा चिरम्॥ **7.107.8**॥ 3413

तच्छ्रुत्वा भरतेनोक्तं दृष्ट्वा चापि ह्यधोमुखान्।
पौरान् दुःखेन सन्तप्तान् वसिष्ठो वाक्यमब्रवीत्॥ **7.107.9**॥ 3414

वत्स राम इमाः पश्य धरणिं प्रकृतीर्गताः।
ज्ञात्वैषामीप्सितं कार्यं मा चैषां विप्रियं कृथाः॥ **7.107.10**॥ 3415

वसिष्ठस्य तु वाक्येन उत्थाप्य प्रकृतीजनम्।
किं करोमीति काकुत्स्थः सर्वान् वचनमब्रवीत्॥ **7.107.11**॥ 3416

ततः सर्वाः प्रकृतयो रामं वचनमब्रुवन्।
गच्छन्तमनुगच्छामो यत्र राम गमिष्यसि॥ **7.107.12**॥ 3417

पौरेषु यदि ते प्रीतिर्यदि स्नेहो ह्यनुत्तमः।
सपुत्रदाराः काकुत्स्थ समं गच्छाम सत्पथम्॥ **7.107.13**॥ 3418

तपोवनं वा दुर्गं वा नदीमभ्भोनिधिं तथा।
वयं ते यदि न त्याज्याः सर्वान्नो नय ईश्वर॥ **7.107.14**॥ 3419

एषा नः परमा प्रीतिरेष नः परमो वरः।
हृद्गता नः सदा प्रीतिस्तवानुगमने नृप॥ **7.107.15**॥ 3420

पौराणां दृढभक्तिं च बाढमित्येव सोऽब्रवीत्।
स्वकृतान्तं चान्ववेक्ष्य तस्मिन्नहनि राघवः॥ **7.107.16**॥ 3421

कोशलेषु कुशं वीरमुत्तरेषु तथा लवम्।
अभिषिच्य महात्मानावुभौ रामः कुशीलवौ॥ **7.107.17**॥ 3422

अभिषिक्तौ सुतावङ्के प्रतिष्ठाप्य पुरे ततः।
परिष्वज्य महाबाहुर्मूर्ध्न्युपाघ्राय चासकृत्॥ **7.107.18**॥ 3423

रथानां तु सहस्राणि नागानामयुतानि च।
दशायुतानि चाश्वानामेकैकस्य धनं ददौ॥ **7.107.19**॥ 3424

बहुरत्नौ बहुधनौ हृष्टपुष्टजनावृतौ।
स्वे पुरे प्रेषयामास भ्रातरौ तौ कुशीलवौ॥ **7.107.20**॥ 3425

अभिषिच्य ततो वीरौ प्रस्थाप्य स्वपुरे तदा।
दूतान् सम्प्रेषयामास शत्रुघ्नाय महात्मने॥ **7.107.21**॥ 3426

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्ताधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाधिकशततमः सर्गः ॥

भ्रातृभिः कपिभिरृक्षैश्च सह परमधाम गन्तुं श्रीरामस्य निश्चयो विभीषणं हनुमन्तं जाम्बवन्तं मैन्दं द्विविदं च प्रति भूतल एव स्थातुं तस्यादेशः

ते दूता रामवाक्येन चोदिता लघुविक्रमाः।
प्रजग्मुर्मधुरां शीघ्रं चक्रुर्वासं न चाध्वनि ॥ **7.108.1** ॥ 3427

ततस्त्रिभिरहोरात्रैः सम्प्राप्य मधुरामथ।
शत्रुघ्नाय यथातत्त्वमाचख्युः सर्वमेव तत् ॥ **7.108.2** ॥ 3428

लक्ष्मणस्य परित्यागं प्रतिज्ञां राघवस्य च।
पुत्रयोरभिषेकं च पौरानुगमनं तथा ॥ **7.108.3** ॥ 3429

कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि।
कुशावतीति नाम्ना सा कृता रामेण धीमता ॥ **7.108.4** ॥ 3430

श्रावस्तीति पुरी रम्या श्रावितो च लवस्य ह।
अयोध्यां विजनां कृत्वा राघवो भरतस्तथा ॥ **7.108.5** ॥ 3431

स्वर्गस्य गमनोद्योगं कृतवन्तौ महारथौ।
एवं सर्वं निवेद्याशु शत्रुघ्नाय महात्मने ॥ **7.108.6** ॥ 3432

विरेमुस्ते ततो दूतास्त्वर राजेति चाब्रुवन्।
तच्छ्रुत्वा घोरसङ्काशं कुलक्षयमुपस्थितम् ॥ **7.108.7** ॥ 3433

प्रकृतीस्तु समानीय काञ्चनं च पुरोधसम्।
तेषां सर्वं यथावृत्तमब्रवीद् रघुनन्दनः॥ **7.108.8**॥ 3434

आत्मनश्च विपर्यासं भविष्यं भ्रातृभिः सह।
ततः पुत्रद्वयं वीरः सोऽभ्यषिञ्चन्नराधिपः॥ **7.108.9**॥ 3435

सुबाहुर्मधुरां लेभे शत्रुघाती च वैदिशम्।
द्विधा कृत्वा तु तां सेनां माधुरीं पुत्रयोर्द्वयोः।
धनं च युक्तं कृत्वा वै स्थापयामास पार्थिवः॥ **7.108.10**॥ 3436

सुबाहुं मधुरायां च वैदिशे शत्रुघातिनम्।
ययौ स्थाप्य तदायोध्यां रथेनैकेन राघवः॥ **7.108.11**॥ 3437

स ददर्श महात्मानं ज्वलन्तमिव पावकम्।
सूक्ष्मक्षौमाम्बरधरं मुनिभिः सार्धमक्षयैः॥ **7.108.12**॥ 3438

सोऽभिवाद्य ततो रामं प्राञ्जलिः प्रयतेन्द्रियः।
उवाच वाक्यं धर्मज्ञं धर्ममेवानुचिन्तयन्॥ **7.108.13**॥ 3439

कृत्वाभिषेकं सुतयोर्द्वयो राघवनन्दन।
तवानुगमने राजन् विद्धि मां कृतनिश्चयम्॥ **7.108.14**॥ 3440

न चान्यदद्य वक्तव्यमतो वीर न शासनम्।
विहन्यमानमिच्छामि मद्विधेन विशेषतः॥ **7.108.15**॥ 3441

तस्य तां बुद्धिमक्लीबां विज्ञाय रघुनन्दनः।
बाढमित्येव शत्रुघ्नं रामो वाक्यमुवाच ह॥ **7.108.16**॥ 3442

तस्य वाक्यस्य वाक्यान्ते वानराः कामरूपिणः।
ऋक्षराक्षससङ्घाश्च समापेतुरनेकशः॥ **7.108.17**॥ 3443

सुग्रीवं ते पुरस्कृत्य सर्व एव समागताः।
तं रामं द्रष्टुमनसः स्वर्गायाभिमुखं स्थितम्॥ **7.108.18**॥ 3444

देवपुत्रा ऋषिसुता गन्धर्वाणां सुतास्तथा।
रामक्षयं विदित्वा ते सर्व एव समागताः॥ **7.108.19**॥ 3445

ते राममभिवाद्योचुः सर्वे वानरराक्षसाः।
तवानुगमने राजन् सम्प्राप्ताः स्म समागताः॥ **7.108.20**॥ 3446

यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषोत्तम।
यमदण्डमिवोद्यम्य त्वया स्म विनिपातिताः॥ **7.108.21**॥ 3447

एतस्मिन्नन्तरे रामं सुग्रीवोऽपि महाबलः।
प्रणम्य विधिवद् वीरं विज्ञापयितुमुद्यतः॥ **7.108.22**॥ 3448

अभिषिच्याङ्गदं वीरमागतोऽस्मि नरेश्वर।
तवानुगमने राजन् विद्धि मां कृतनिश्चयम्॥ **7.108.23**॥ 3449

तस्य तद् वचनं श्रुत्वा रामो रमयतां वरः।
वानरेन्द्रमथोवाच मैत्रं तस्यानुचिन्तयन्॥ **7.108.24**॥ 3450

सखे शृणुष्व सुग्रीव न त्वयाहं विनाकृतः।
गच्छेयं देवलोकं वा परमं वा पदं महत्॥ **7.108.25**॥ 3451

तैरेवमुक्तः काकुत्स्थो बाढमित्यब्रवीत् स्मयन्।
विभीषणमथोवाच राक्षसेन्द्रं महायशाः॥ **7.108.26**॥ 3452

यावत् प्रजा धरिष्यन्ति तावत् त्वं वै विभीषण।
राक्षसेन्द्र महावीर्य लङ्कास्थः स्वं धरिष्यसि॥ **7.108.27**॥ 3453

यावच्चन्द्रश्च सूर्यश्च यावत् तिष्ठति मेदिनी।
यावच्च मत्कथा लोके तावद् राज्यं तवास्त्विह॥ **7.108.28**॥ 3454

शासितश्च सखित्वेन कार्यं ते मम शासनम्।
प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि॥ **7.108.29**॥ 3455

किञ्चान्यद् वक्तुमिच्छामि राक्षसेन्द्र महाबल।
आराधय जगन्नाथमिक्ष्वाकुकुलदैवतम्॥ **7.108.30**॥ 3456

आराधनीयमनिशं देवैरपि सवासवैः।
तथेति प्रतिजग्राह रामवाक्यं विभीषणः॥ **7.108.31**॥ 3457

राजा राक्षसमुख्यानां राघवाज्ञामनुस्मरन्।
तमेवमुक्त्वा काकुत्स्थो हनूमन्तमथाब्रवीत्॥ **7.108.32**॥ 3458

जीविते कृतबुद्धिस्त्वं मा प्रतिज्ञां वृथा कृथाः।
मत्कथाः प्रचरिष्यन्ति यावल्लोके हरीश्वर॥ **7.108.33**॥ 3459

तावद् रमस्व सुप्रीतो मद्वाक्यमनुपालयन्।
एवमुक्तस्तु हनुमान् राघवेण महात्मना॥ **7.108.34**॥ 3460

वाक्यं विज्ञापयामास परं हर्षमवाप च।
यावत् तव कथा लोके विचरिष्यति पावनी॥ **7.108.35**॥ 3461

तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्।
जाम्बवन्तं तथोक्त्वा तु वृद्धं ब्रह्मसुतं तदा॥ **7.108.36**॥ 3462

मैन्दं च द्विविदं चैव पञ्च जाम्बवता सह।
यावत् कलिश्च सम्प्राप्तस्तावज्जीवत सर्वदा॥ **7.108.37**॥ 3463

तानेवमुक्त्वा काकुत्स्थः सर्वांस्तानृक्षवानरान्।
उवाच बाढं गच्छध्वं मया सार्धं यथोदितम्॥ **7.108.38**॥ 3464

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवाधिकशततमः सर्गः ॥

परं धाम गन्तुं निर्गतेन श्रीरामेण सह समेषामयोध्यावासिनामपि प्रस्थानम्

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः।
रामः कमलपत्राक्षः पुरोधसमथाब्रवीत्॥ **7.109.1** ॥ 3465

अग्निहोत्रं व्रजत्वग्रे दीप्यमानं सह द्विजैः।
वाजपेयातपत्रं च शोभमानं महापथे॥ **7.109.2** ॥ 3466

ततो वसिष्ठस्तेजस्वी सर्वं निरवशेषतः।
चकार विधिवद् धर्मं माहाप्रस्थानिकं विधिम्॥ **7.109.3** ॥ 3467

ततः सूक्ष्माम्बरधरो ब्रह्ममावर्तयन् परम्।
कुशान् गृहीत्वा पाणिभ्यां सरयूं प्रययावथ॥ **7.109.4** ॥ 3468

अव्याहरन् क्वचित् किञ्चिन्निश्चेष्टो निःसुखः पथि।
निर्जगाम गृहात् तस्माद् दीप्यमानो यथांशुमान्॥ **7.109.5** ॥ 3469

रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपाश्रिता।
सव्येऽपि च मही देवी व्यवसायस्तथाग्रतः॥ **7.109.6** ॥ 3470

शरा नानाविधाश्चापि धनुरायत्तमुत्तमम्।
तथायुधाश्च ते सर्वे ययुः पुरुषविग्रहाः॥ **7.109.7** ॥ 3471

वेदा ब्राह्मणरूपेण गायत्री सर्वरक्षिणी।
ओङ्कारोऽथ वषट्कारः सर्वे राममनुव्रताः॥ **7.109.8**॥ 3472

ऋषयश्च महात्मानः सर्व एव महीसुराः।
अन्वगच्छन् महात्मानं स्वर्गद्वारमपावृतम्॥ **7.109.9**॥ 3473

तं यान्तमनुगच्छन्ति ह्यन्तःपुरचराः स्त्रियः।
सवृद्धबालदासीकाः सवर्षवरकिङ्कराः॥ **7.109.10**॥ 3474

सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ।
रामं गतिमुपागम्य साग्निहोत्रमनुव्रताः॥ **7.109.11**॥ 3475

ते च सर्वे महात्मानः साग्निहोत्राः समागताः।
सपुत्रदाराः काकुत्स्थमनुजग्मुर्महामतिम्॥ **7.109.12**॥ 3476

मन्त्रिणो भृत्यवर्गाश्च सपुत्रपशुबान्धवाः।
सर्वे सहानुगा राममन्वगच्छन् प्रहृष्टवत्॥ **7.109.13**॥ 3477

ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः।
गच्छन्तमनुगच्छन्ति राघवं गुणरञ्जिताः॥ **7.109.14**॥ 3478

ततः सस्त्रीपुमांसस्ते सपक्षिपशुबान्धवाः।
राघवस्यानुगाः सर्वे हृष्टा विगतकल्मषाः॥ **7.109.15**॥ 3479

स्नाताः प्रमुदिताः सर्वे हृष्टपुष्टाश्च वानराः।
दृढं किलकिलाशब्दैः सर्वं राममनुव्रतम्॥ **7.109.16**॥ 3480

न तत्र कश्चिद् दीनो वा व्रीडितो वापि दुःखितः।
हृष्टं समुदितं सर्वं बभूव परमाद्भुतम्॥ **7.109.17**॥ 3481

द्रष्टुकामोऽथ निर्यान्तं रामं जानपदो जनः।
यः प्राप्तः सोऽपि दृष्ट्वैव स्वर्गायानुगतो जनः॥ **7.109.18**॥ 3482

ऋक्षवानररक्षांसि जनाश्च पुरवासिनः।
आगच्छन् परया भक्त्या पृष्ठतः सुसमाहिताः॥ **7.109.19**॥ 3483

यानि भूतानि नगरेऽप्यन्तर्धानगतानि च।
राघवं तान्यनुययुः स्वर्गाय समुपस्थितम्॥ **7.109.20**॥ 3484

यानि पश्यन्ति काकुत्स्थं स्थावराणि चराणि च।
सर्वाणि रामगमने अनुजग्मुर्हि तान्यपि॥ **7.109.21**॥ 3485

नोच्छ्वसत् तदयोध्यायां सुसूक्ष्ममपि दृश्यते।
तिर्यग्योनिगताश्चैव सर्वे राममनुव्रताः॥ **7.109.22**॥ 3486

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशाधिकशततमः सर्गः ॥

भ्रातृभिः सहितस्य सदेहस्य श्रीरामस्य स्वीये वैष्णवे तेजसि प्रवेशस्तेन सहागतानां लोकानां सन्तानकाख्यस्य लोकस्य प्राप्तिः

अध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रिताम्।
सरयूं पुण्यसलिलां ददर्श रघुनन्दनः॥ **7.110.1** ॥ 3487

तां नदीमाकुलावर्तां सर्वत्रानुसरन् नृपः।
आगतः सप्रजो रामस्तं देशं रघुनन्दनः॥ **7.110.2** ॥ 3488

अथ तस्मिन् मुहूर्ते तु ब्रह्मा लोकपितामहः।
सर्वैः परिवृतो देवैर्ऋषिभिश्च महात्मभिः॥ **7.110.3** ॥ 3489

आययौ यत्र काकुत्स्थः स्वर्गाय समुपस्थितः।
विमानशतकोटीभिर्दिव्याभिरभिसंवृतः॥ **7.110.4** ॥ 3490

दिव्यतेजोवृतं व्योम ज्योतिर्भूतमनुत्तमम्।
स्वयम्प्रभैः स्वतेजोभिः स्वर्गिभिः पुण्यकर्मभिः॥ **7.110.5** ॥ 3491

पुण्या वाता ववुश्चैव गन्धवन्तः सुखप्रदाः।
पपात पुष्पवृष्टिश्च देवैर्मुक्ता महौघवत्॥ **7.110.6** ॥ 3492

तस्मिंस्तूर्यशतैः कीर्णे गन्धर्वाप्सरसङ्कुले।
सरयूसलिलं रामः पद्भ्यां समुपचक्रमे॥ **7.110.7** ॥ 3493

ततः पितामहो वाणीं त्वन्तरिक्षादभाषत।
आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव॥ **7.110.8**॥ 3494

भ्रातृभिः सह देवाभैः प्रविशस्व स्विकां तनुम्।
यामिच्छसि महाबाहो तां तनुं प्रविश स्विकाम्॥ **7.110.9**॥ 3495

वैष्णवीं तां महातेजो यद्धाऽऽकाशं सनातनम्।
त्वं हि लोकगतिर्देव न त्वां केचित् प्रजानते॥ **7.110.10**॥ 3496

ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्।
त्वामचिन्त्यं महद् भूतमक्षयं चाजरं तथा।
यामिच्छसि महातेजस्तां तनुं प्रविश स्वयम्॥ **7.110.11**॥ 3497

पितामहवचः श्रुत्वा विनिश्चित्य महामतिः।
विवेश वैष्णवं तेजः सशरीरः सहानुजः॥ **7.110.12**॥ 3498

ततो विष्णुमयं देवं पूजयन्ति स्म देवताः।
साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः॥ **7.110.13**॥ 3499

ये च दिव्या ऋषिगणा गन्धर्वाप्सरसश्च याः।
सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः॥ **7.110.14**॥ 3500

सर्वं पुष्टं प्रमुदितं सुसम्पूर्णमनोरथम्।
साधुसाध्विति तैर्देवैस्त्रिदिवं गतकल्मषम्॥ **7.110.15**॥ 3501

अथ विष्णुर्महातेजाः पितामहमुवाच ह।
एषां लोकं जनौघानां दातुमर्हसि सुव्रत॥ **7.110.16**॥ 3502

इमे हि सर्वे स्नेहान्मामनुयाता यशस्विनः।
भक्ता हि भजितव्याश्च त्यक्तात्मानश्च मत्कृते॥ **7.110.17**॥ 3503

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः।
लोकान् सन्तानकान् नाम यास्यन्तीमे समागताः॥ **7.110.18**॥ 3504

यच्च तिर्यग्गतं किञ्चित् त्वामेवमनुचिन्तयत्।
प्राणांस्त्यक्ष्यति भक्त्या तत् सन्तानेषु निवत्स्यति॥ **7.110.19**॥ 3505

सर्वैर्ब्रह्मगुणैर्युक्ते ब्रह्मलोकादनन्तरे।
वानराश्च स्विकां योनिमृक्षाश्चैव तथा ययुः॥ **7.110.20**॥ 3506

येभ्यो विनिःसृताः सर्वे सुरेभ्यः सुरसम्भवाः।
तेषु प्रविविशे चैव सुग्रीवः सूर्यमण्डलम्॥ **7.110.21**॥ 3507

पश्यतां सर्वदेवानां स्वान् पितॄन् प्रतिपेदिरे।
तथा ब्रुवति देवेशे गोप्रतारमुपागताः॥ **7.110.22**॥ 3508

भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः।
अवगाह्याप्सु यो यो वै प्राणांस्त्यक्त्वा प्रहृष्टवत्॥ **7.110.23**॥ 3509

मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत।
तिर्यग्योनिगतानां च शतानि सरयूजलम्॥ **7.110.24**॥ 3510

सम्प्राप्य त्रिदिवं जग्मुः प्रभासुरवपूंषि तु।
दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन्॥ **7.110.25**॥ 3511

गत्वा तु सरयूतोयं स्थावराणि चराणि च।
प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन्॥ **7.110.26**॥ 3512

तस्मिन् येऽपि समापन्ना ऋक्षवानरराक्षसाः।
तेऽपि स्वर्गं प्रविविशुर्देहान् निक्षिप्य चाम्भसि॥ **7.110.27**॥ 3513

ततः समागतान् सर्वान् स्थाप्य लोकगुरुर्दिवि।
हृष्टैः प्रमुदितैर्देवैर्जगाम त्रिदिवं महत्॥ **7.110.28**॥ 3514

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे दशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशाधिकशततमः सर्गः ॥

श्रीरामायणकाव्यस्योपसंहारस्तस्य महिमा च

एतावदेतदाख्यानं सोत्तरं ब्रह्मपूजितम्।
रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम्॥ **7.111.1** ॥ 3515

ततः प्रतिष्ठितो विष्णुः स्वर्गलोके यथा पुरा।
येन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्॥ **7.111.2** ॥ 3516

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
नित्यं शृण्वन्ति संहृष्टाः काव्यं रामायणं दिवि॥ **7.111.3** ॥ 3517

इदमाख्यानमायुष्यं सौभाग्यं पापनाशनम्।
रामायणं वेदसमं श्राद्धेषु श्रावयेद् बुधः॥ **7.111.4** ॥ 3518

अपुत्रो लभते पुत्रमधनो लभते धनम्।
सर्वपापैः प्रमुच्येत पादमप्यस्य यः पठेत्॥ **7.111.5** ॥ 3519

पापान्यपि च यः कुर्यादहन्यहनि मानवः।
पठत्येकमपि श्लोकं पापात् स परिमुच्यते॥ **7.111.6** ॥ 3520

वाचकाय च दातव्यं वस्त्रं धेनुहिरण्यकम्।
वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः॥ **7.111.7** ॥ 3521

एतदाख्यानमायुष्यं पठन् रामायणं नरः।
सपुत्रपौत्रो लोकेऽस्मिन् प्रेत्य चेह महीयते॥ **7.111.8**॥ 3522

रामायणं गोविसर्गे मध्याह्ने वा समाहितः।
सायाह्ने वापराह्णे च वाचयन् नावसीदति॥ **7.111.9**॥ 3523

अयोध्यापि पुरी रम्या शून्या वर्षगणान् बहून्।
ऋषभं प्राप्य राजानं निवासमुपयास्यति॥ **7.111.10**॥ 3524

एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम्।
कृतवान् प्रचेतसः पुत्रस्तद् ब्रह्माप्यन्वमन्यत॥ **7.111.11**॥ 3525

अश्वमेधसहस्रस्य वाजपेयायुतस्य च।
लभते श्रवणादेव सर्गस्यैकस्य मानवः॥ **7.111.12**॥ 3526

प्रयागादीनि तीर्थानि गङ्गाद्याः सरितस्तथा।
नैमिषादीन्यरण्यानि कुरुक्षेत्रादिकान्यपि॥ **7.111.13**॥ 3527

गतानि तेन लोकेऽस्मिन् येन रामायणं श्रुतम्।
हेमभारं कुरुक्षेत्रे ग्रस्ते भानौ प्रयच्छति॥ **7.111.14**॥ 3528

यश्च रामायणं लोके शृणोति सदृशावुभौ।
सम्यक्श्रद्धासमायुक्तः शृणुते राघवीं कथाम्॥ **7.111.15**॥ 3529

सर्वपापात् प्रमुच्येत विष्णुलोकं स गच्छति।
आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम्॥ **7.111.16**॥ 3530

यः शृणोति सदा भक्त्या स गच्छेद् वैष्णवीं तनुम्।
पुत्रदाराश्च वर्धन्ते सम्पदः सन्ततिस्तथा॥ **7.111.17**॥ 3531

सत्यमेतद् विदित्वा तु श्रोतव्यं नियतात्मभिः।
गायत्र्याश्च स्वरूपं तद् रामायणमनुत्तमम्॥ **7.111.18**॥ 3532

यः पठेच्छृणुयान्नित्यं चरितं राघवस्य ह।
भक्त्या निष्कल्मषो भूत्वा दीर्घमायुरवाप्नुयात्॥ **7.111.19**॥ 3533

चिन्तयेद् राघवं नित्यं श्रेयः प्राप्तुं य इच्छति।
श्रावयेदिदमाख्यानं ब्राह्मणेभ्यो दिने दिने॥ **7.111.20**॥ 3534

यस्त्विदं रघुनाथस्य चरितं सकलं पठेत्।
सोऽसुक्षये विष्णुलोकं गच्छत्येव न संशयः॥ **7.111.21**॥ 3535

पिता पितामहस्तस्य तथैव प्रपितामहः।
तत्पिता तत्पिता चैव विष्णुं यान्ति न संशयः॥ **7.111.22**॥ 3536

चतुर्वर्गप्रदं नित्यं चरितं राघवस्य तु।
तस्माद् यत्नवता नित्यं श्रोतव्यं परमं सदा॥ **7.111.23**॥ 3537

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥ **7.111.24**॥ 3538

एवमेतत् पुरावृत्तमाख्यानं भद्रमस्तु वः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्॥ **7.111.25**॥ 3539

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकादशाधिकशततमः सर्गः॥